॥ शिशुपालवधम् ॥

॥ श्रीमाघकविकृतम् ॥

साधारणविद्योत्कर्षकसमाजाधिपतीप्सितम्

श्रीमत्तारानाथतर्कवाचस्पतिभट्टाचार्य्यादिविबुधवरैर्विशोधितम्

श्रीमद्दत्तवंशावतंसश्रीबाबूरममयदत्तमहाशयानामाज्ञया
कलिकाताराजधान्यां सारसुधानिधिमुद्रायन्त्रे
मुद्रितमभूत्

नन्दार्ण्यम्बरशाङ्कसम्मितशके माघस्य शेषं दृशं
यन्त्रे सारसुधानिधौ सुललितं सर्व्वाङ्गालङ्कृतम् ।
तारानाथधरामरादिविबुधैः श्रौतैः समाशोधितं
श्रीमद्दत्तकुलाग्रणीरममयादेशादभून्मुद्रितम् ॥

॥ शिशुपालवधम् ॥

॥ एकादशः सर्गः ॥

श्रुतिसमधिकमुच्चैः पञ्चमं पीडयन्तः
सततमृषभहीनं भिन्नकीकृत्य षड्जम्।
प्रणिजगदुरकाकुश्रावकस्निग्धकण्ठाः
परिणतिमिति रात्रेर्मागधा माधवाय॥ १ ॥

अथ प्रस्तुतप्रभातवर्णनं प्रारभते। श्रुतीति। नास्ति काकुर्यस्येत्यकाकुरविकृतध्वनिः। काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेरित्यमरः। श्रावयतीति श्रावको दूरध्वनिः। स्निग्धो मधुरः कण्ठः स्वरो येषां ते अकाकुश्रावकस्निग्धकण्ठाः रक्तकण्ठा इत्यर्थः। मागधा वैतालिकाः श्रुतयो नाम षड्जादिस्वरारम्भकावयवाः शब्दविशेषाः। तदुक्तं प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रिकः सा श्रुतिः सम्परिज्ञेया स्वरावयवलक्षणेति। ताभिः श्रुतिभिः समधिकमुत्कृष्टं षड्जविशेषणं पञ्चमविशेषणं वा उभयोरपि तथात्वात्। तदुक्तं चतुश्चतुश्चतुश्चैव षड्जमध्यमपञ्चमाः। द्वे द्वे निषादगान्धारौ। त्रीस्त्रीनृषभधैवताविति। षड्जो मयूरस्य कूजितानुकारी स्वरविशेषः। षड्जं मयूरो वदतीति लक्षणात्। तं षड्जं भिन्न

रतिरभसविलासाभ्यासतान्तन्न याव
न्नयनयुगममीलत्तावदेवाहतोऽसौ।
रजनिविरतिशंसी कामिनीनाम्भविष्य
द्विरहविहितनिद्राभङ्गमुच्चैर्मृदङ्गः ॥ २ ॥

एत भिन्नकस्तं कृत्वा भिन्नकीकृत्य तत्कालनिषिद्धस्वरामङ्कीर्णं कृत्वे त्यर्थः। पञ्चमोनाम कोकिलकूजितानुकारी स्वरविशेषः। पिकः कूजति पञ्चममिति लक्षणात्। तम्पञ्चममपोज्झयन्तः तत्कालनिषे धात्परित्यजन्त इत्यर्थः। सततं वीणादिवाद्ययुक्तम्। ततं वीणा दिकं वाद्यमित्यमरः। ऋषभोऽपि वृषभनर्दितानुकारी स्वरभेद एव। गावस्त्वृषभभाषिण इति लक्षणात्। तेन हीनं तस्यापि तत्कालनिषिद्धत्वादित्यर्थः सततं ऋषभहीनञ्च यथा तथा रात्रेः परिणतिं परिवृत्तिमित्यर्थः इति वक्ष्यमाणप्रकारेणोच्चैर्यथा तथा माधवाय कृष्णाय। क्रियाग्रहणात् सम्प्रदानत्वम्। प्रणि जगदुर्गानेनाचख्युरित्यर्थः। नेर्गदनदेत्यादिना णत्वम्। पञ्चमा दिनिषेधे भरतः। प्रभाते सुरतेनिन्द्य ऋषभःपञ्चमोऽपि च। जनयेत्प्रधनं मृत्युं पञ्चत्वं पञ्चमोऽपि च। पञ्चमस्य विशेषोऽयं कथितः पूर्व्वसूरिभिः। प्रगे प्रगीतो जनयेद्धनस्य विपर्यय मिति। वृत्त्यनुप्रासोऽलङ्कारः। अस्मिन्सर्गे मालिनी वृत्तम्। ननमयययुतेयं मालिनी भोगिलोकैरिति लक्षणात् ॥ १ ॥

अथ पूर्व्वश्लोके इतिशब्दपरामृष्टगानपरशतप्रभृत्युत्तरोत्तर क्रमभाविनः प्रभातवृत्तान्तानासर्गसमाप्ति वर्णयन्नाह। रतीति। रतिरभसविलासानां सुरतसम्भ्रमलीलानां अभ्यासेनावर्त्तनेन

स्फुटतरमुपरिष्टादल्पमूर्त्तेर्ध्रुवस्य
स्फुरति सुरमुनीनाम्मण्डलं व्यस्तमेतत्।
शकटमिव महीयः शैशवे शार्ङ्गपाणे
श्चपलचरणकाञ्जप्रेरणोत्तुङ्गिताग्रम्॥ ३ ॥

तान्तं क्लान्तं नयनयुगं कर्त्तृ कामिनामिति शेषः। यावन्ना मीलन्न मुकुलीभवति तावदेवासौ रजनिविरतिशंसी निशाव सानसूचकउच्चैर्महद्ध्वः कामिनीनां भविष्यता उत्तरक्षणभाविना विरहेण विहितः कृतोनिद्राभङ्गोयस्मिन् कर्म्मणि तद्यथा तथा आहतस्ताडितः। अत्र विरहशब्देन सामर्थ्यात्तच्चिन्ता लक्ष्यते अन्यथा असतः साम्प्रतिकनिद्राभङ्गहेतुत्वायोगादिति। अत्र रतितान्तत्वरजनिविरतिशंसनयोर्विशेषणगत्या नेत्रनिमीलननिद्रा भङ्गहेतुत्वात्पदार्थहेतुके काव्यलिङ्गे॥ २॥

स्फुटेति। अल्पमूर्त्तेर्दूरत्वात्सूक्ष्मविम्बस्य ध्रुवस्योत्तानपादेः। ध्रुवश्चोत्तानपादिः स्यादित्यमरः। उपरिष्टात स्फुटतरं उज्ज्वल तरं व्यस्तमव्यस्तमेतत् सुरमुनीनां सप्तर्षीणां मण्डलं शार्ङ्गपाणेः केशवस्य कृष्णस्य तवेत्यर्थः शैशवे प्रचलितस्य चपलस्य चरणकाञ्ज स्याम्बुचरणारविन्दस्य। अल्पे इत्यल्पार्थे कन्प्रत्ययः। प्रेरणया नोदनेनोत्तुङ्गितमुत्तुङ्गीकृतमग्रं यस्य तत् विपर्य्यासिताग्रमित्यर्थः। महीयोमहत्तरं शकटमिव शकटाकारं शकटासुरशरीरमिव स्फुरति दीप्यते। उपमालङ्कारः। पुरा किल बाल्ये कृष्णः शकट रूपधारिणं शकटासुरम्पादघातेन पातयामासेति पौराणिकी कथाचानुसन्धेया॥ ३॥

प्रहरकमपनीय स्वं निदिद्रासतोच्चैः
प्रतिपदमुपहूतः केनचिज्जागृहीति ।
मुहुरविशदवर्णां निद्रया शून्यशून्यां
ददपि गिरमन्तर्बुध्यते नो मनुष्यः ॥ ४ ॥

प्रहरकमिति । स्वं स्वकीयं स्वपाल्यमित्यर्थः प्रहर एव प्रहरको यामः । द्वौ यामप्रहरौ समावित्यमरः । तमपनीय नीत्वा निदिद्रासता निद्रातुमिच्छता । निद्रातेः सन्नन्ताल्लटः शत्रादेशः । केनचिदतीतप्रहरपालेनेत्यर्थः । जागृहि प्रबुध्यस्वेति प्रतिपदम्पदेपदे उच्चैरुपहूतो मनुष्योऽनन्तरयामिको मुहुर्निद्रया अविशदवर्णा अस्पष्टाक्षरामत एव शून्यशून्यां शून्यप्रकारामनर्थप्रायामित्यर्थः । प्रकारे गुणवचनस्येति द्विर्भावः कर्मधारयवदुत्तरेष्विति कर्मधारयवद्भावाद्वयवसुपोलुक् । गिरमयमहन्नागमीति प्रतिवाचन्ददपि प्रयच्छन्नपि । नाभ्यस्ताच्छतुरिति नुमागमप्रतिषेधः । अन्तरन्तःकरणे नो बुध्यते न जागर्त्ति । बुध्यते दैवादिकात्कर्त्तरि लट् । अत्राप्रबोधप्रतिवचनदानयोर्विरोधे अपिशब्दः निद्राज्ञानाभ्यान्तत्समाधानाद्विरोधाभासोऽलङ्कारः ॥ ४ ॥

विपुलेति । रमण्या विपुलतरस्य नितम्बस्याभोगेन विस्तारेण रुद्धे आक्रान्ते शयनीये शयितुमवकाशमनधिगच्छन् अलभमानो जीवितेशः प्रेयान् रतिपरिखेदेन पुनःपुनः सुरतायासेन नश्यन्ती निवर्त्तमाना निद्रायाद्यं तन्द्री निद्राप्रयुक्ता तन्द्रा आलस्यं यस्य स तथाभूतः सन् शर्वरीं कथञ्चिद्गमयति कष्टेण नयति किञ्चरोतु

विपुलतरनितम्बाभोगरुद्धे रमण्याः
शयितुमनधिगच्छन् जीवितेशोऽवकाशम् ।
रतिपरिचयनश्यन्नैद्रतन्द्रः कथञ्चि
द्गमयति शयनीये शर्वरीं किङ्करोतु ॥ ५ ॥
क्षणशयितविबुद्धाः कल्पयन्तः प्रयोगा
नुदधिमहति राज्ये काव्यवद्दुर्विगाहे ।
गहनमपररात्रप्राप्तबुद्धिप्रसादाः
कवयइव महीपाश्चिन्तयन्त्यर्थजातम् ॥ ६ ॥

किमन्यत्कुर्यात् । शयनानवकाशे सुरतमेव कालयापनोपाय इति तत्रैव प्रवृत्तइति भावः । अत्र शयनीयस्येद्दग्रोधासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिरलङ्कारः । ताद्दग्रोधस्य विशेषणगत्या शयनावकाशानधिगमहेतुत्वात्काव्यलिङ्गभेदइति सङ्करः ॥ ५ ॥

क्षणेति । क्षणं शयिताः सुरतश्रमापनोदाय विघुप्ताः विबुद्धाः तदैव प्रबुद्धाः यथाकालं प्रबुद्धत्वादिति भावः क्षणशयितविबुद्धाः । स्नातानुलिप्तवत्पूर्व्वकालेति समासः । महीपाः कवयइव अपररात्रे रात्रेः पश्चिमयामइत्यर्थः । पूर्व्वापरेत्यादिना एकदेशिसमासे समासान्तः अच् । रात्राह्नाहाः पुंसीति पुंस्त्वम् । तत्र प्राप्तबुद्धिप्रसादालब्धबुद्धिप्रकाशाः सन्तः उदधिमहति समुद्रगम्भीरे एकत्र रागादिभिरपरत्र रसभावादिभिश्चेति भावः । अतएव दुर्विगाहे दुष्प्रवेशे राज्ये काव्ये इव काव्यवत् । तत्र तस्येवेति वति प्रत्ययः । प्रयोगान् सामाद्युपायानुष्ठानानि । अन्यत्रार्थगुणसाधुशब्दगुम्फान् कल्पयन्तस्तर्कयन्तः । ब्राह्मे मुहूर्त्ते उत्थाय चिन्तये

क्षितितटशयनान्तादुत्थितं दानपङ्क-
प्लुतबहुलशरीरं शाययत्येष भूयः ।
मृदुचलदपराङ्गोदीरिताऽन्दूनिनाद-
ङ्गजपतिमधिरोढुः पक्षकव्यत्ययेन ॥ ७ ॥

दात्मनो हितमिति स्मरणादिति भावः । गहनं दुष्प्रापमन्यत्र दुर्दर्शमर्थजातं पुरुषार्थजातं त्रिवर्गमित्यर्थः अन्यत्र वाच्यलक्ष्यव्यङ्ग्य रूपमभिधेयजातं चिन्तयन्ति विचारयन्ति । इवशब्दस्योपलक्षणत्वा त्काव्यवदिति वतिप्रत्ययेऽप्यनेकशब्दार्थगता श्रौती पूर्णा वाक्यार्थोपमा काव्यवदिति तद्धितगता कवयइति समासगता चेति सङ्कीर्णा ॥ ६ ॥

क्षितीति । क्षितितटमभूतलमेव शयनान्तः शयनस्थानन्तस्मा दुत्थितं सुप्तोत्थितमित्यर्थः । अतएव दानपङ्कप्लुतबहुलशरीरं मद कर्दमोचितमहाकायङ्गजपतिमेषः अधिरोढतीत्यधिरोहआरोहणः । पश्चाद्यच् । मृदु मन्दं चलता अपराङ्गेन पश्चिमपादेनोदी रितउत्पादितोऽन्दूनिनादः शृङ्खलारवो यस्मिन् कर्म्मणि तद्यथा तथा पक्षएव पक्षकः पार्श्वः । पक्षः पार्श्वगरुत्साध्यसहायबलभित्ति ष्विति वैजयन्ती । तस्य व्यत्ययेन पार्श्वान्तरेणेत्यर्थः । भूयः शाय यति शयनङ्कारयति । गतिबुद्धीत्यादिना अणिकर्त्तुः कर्म्मत्वम् । स्वभावोक्तिरलङ्कारः ॥ ७ ॥

द्रुतेति । द्रुततरकराश्चातिलघुहस्तास्ते च ते दक्षाश्च वल्लवा गोपालाः । आभीरः स्यान्महाशूद्रो गोपालो वल्लवस्तथेति वैजयन्ती । विशाखाप्रयोजनमस्येति वैशाखो मन्थनदण्डः । वैशाखमन्थमन्थान मन्थानो मन्थदण्डके इत्यमरः । विशाखाषाढादण् मन्थदण्डयो

द्रुततरकरदक्षाः क्षिप्तवैशाखशैले
दधति दधनि धीरानारवान्वारिणीव ।
शशिनमिव सुरौघाः सारमुद्धर्त्तुमेते
कलशिमुदधिगुर्वीं वल्लवालोडयन्ति ॥ ८ ॥
अनुनयमगृहीत्वा व्याजसुप्ता पराची
रुतमथ कृकवाकोस्तारमाकर्ण्य कल्ये ।
कथमपि परिवृत्ता निद्रयाऽन्धा किल स्त्री
मुकुलितनयनैवाश्लिष्यति प्राणनाथम् ॥ ९ ॥

रित्यण् प्रत्ययः । वैशाखः शैल इवेत्युपमितसमासः साहचर्य्यात् क्षिप्तो वैशाखशैलो यस्मिन् धीरान् गम्भीरानारवान्दधति दधनि दध्नि । विभाषा ङिश्योरिति विकल्पादल्लोपाभावः । वारिणीव सुरौघाः शशिनमिव सारं नवनीतमुद्धर्त्तुं उत्कृष्टमुदधिरिव गुर्वीं । उपमानानि सामान्यवचनैरिति समासः । तां कलशिं कुम्भीमेते लोडयन्ति मथ्नन्ति । एषापि पूर्ब्बतरवत पूर्णा वाक्यार्थोपमा वाक्यसमाससङ्कीर्णा च ॥ ८ ॥

अनुनयमिति । अनुनयं प्रियप्रार्थनामगृहीत्वा नाङ्गीकृत्य पराची पराङ्मुखी व्याजेन कपटेन सुप्ता स्त्री । अथ कल्ये प्रभाते । प्रत्यूषोऽहर्मुखं कल्यमित्यमरः । कृकवाकोः कुक्कुटस्य । कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुध इत्यमरः । कृके वचः कश्चेत्यण् प्रत्ययः । तारमुच्चैः रुतं कूजितमाकर्ण्य कथमपि गात्रजृम्भणादिव्याजेन परिवृत्ता सम्मुखीभूता निद्रयान्धा किल अजानतीव मुकुलित

गतमनुगतवीणैरेकतां वेणुनादैः
कलमविकलतालं गायकैर्बोधहेतोः।
असकृदनवगीतङ्गीतमाकर्णयन्तः
सुखमुकुलितनेत्रायान्ति निद्रान्नरेन्द्राः ॥१०॥

नयनेत्र मीलिताक्षी सत्येव प्राणनाथमाश्लिष्यति । एषा कलहा न्तरिता ॥ ९ ॥

गतमिति । अनुगतवीणैरनुसृततन्त्रीणैर्वीणासंवादिभिर्वेणुनादैर्वंशस्वरैः एकतामेकरूपताङ्गतं कलमव्यक्तमधुरं अविकलोऽविसंवादी तालः कांस्यादितालो यस्य तत् बोधएव हेतुस्तस्य बोधहेतोः बोधकारणेन बोधनार्थमित्यर्थः । फलस्यापि कारणत्वमिच्छा द्वारा स्वर्गादिवत् फलरागस्य तत्साधनप्रवृत्तिहेतुत्वात् षष्ठी । गायकैर्वैतालिकैरनवगीतमगर्हितं । अवगीतं तु निर्वादे मुहुर्दृष्टेऽपि गर्हिते इति विश्वः । गीतङ्गीयमानं वस्तु आवृत्तिर्वा गीतशब्दस्य गीतङ्गानं समाकर्णयन्तोनरेन्द्राः सुखेन गामसुखेन मुकुलितनेत्रा निमीलिताक्षाः सन्तः निद्रां यान्ति भजन्ति । वृत्त्यनुप्रासोऽलङ्कारः ॥ १० ॥

परीति । अयमश्वः परिश्लिथिलितं स्रस्तमुक्तं कर्णग्रीवं कर्णौ च ग्रीवा च यस्मिन् कर्मणि तद्यथा तथा आमीलिताक्षः ऊर्ध्वे जानुनी यस्य स ऊर्ध्वज्ञुः ऊर्ध्वजानुस्तिष्ठन्नित्यर्थः । ऊर्ध्वज्ञुरूर्ध्वजानुः स्यादित्यमरः । ऊर्ध्वाद्विभाषेति जानुशब्दस्य ज्ञुरादेशः । क्षणं स्वप्नं निद्रामनुभूय उक्तमाश्वलक्षणमेतत् । भूयः पुनरपि पटुतरौ ग्रासग्रहणसमर्थौ चपलौ चञ्चलौ चोष्ठौ यस्य स सन् प्रस्फुरत्

परिशिथिलितकर्णग्रीवमामीलिताक्षः
क्षणमयमनुभूय स्वप्नमूर्द्धाङ्कुरेव।
रिरसयिषति भूयः शष्पमग्रे विकीर्णं
पटुतरचपलौष्ठः प्रस्फुरत्प्रोथमश्वः ॥ ११ ॥

उदयमुदितदीप्तिर्याति यः सङ्गतौ मे
पतति न वरमिन्दुः सोऽपरामेष गत्वा।
स्मितरुचिरिव सद्यः साभ्यसूयम्प्रभेति
स्फुरति विशदमेषा पूर्व्वकाष्ठाङ्गनायाः॥१२॥

प्रोथम्प्रस्फुरमाणघोणं यथा तथा। घोणा तु प्रोथमस्त्रियामित्य मरः। अग्रे विकीर्णं क्षिप्तं शष्पं घासं। शष्पं बालतृणं घासइत्य मरः। रिरसयिषति रसयितुमास्वादयितुमिच्छति। रसयतेः सन्नन्ताल्लट्। स्वभावोक्तिरलङ्कारः। स्वभावोक्तिरसौ चारु यथाव द्वस्तुवर्णनम्॥ ११ ॥

उदयमिति। यदिन्दुः मे मम सङ्गतावुदितदीप्तिः सद्धृद्युतिः सन् उदयमुदयाद्रिं अभ्युदयञ्च याति सइन्दुरेषोऽपराम्पश्चिमा शाम्पराङ्गनाञ्च गत्वा पतति अस्तमेति पातित्यञ्च गच्छति स वरमनर्हमित्यर्थः। इति सद्यः साभ्यसूयं यथा तथा पूर्व्वकाष्ठा प्राची सैवाङ्गना पूर्व्वनायिका च गम्यते तस्याः स्मितरुचिर्मन्द हासकान्तिरिवैषा प्रभा विशदं निर्म्मलं स्फुरति प्रकाशते प्राच्या मीषद्विशदा प्रभा प्रादुरभूदित्यर्थः। अत्र प्राचीगतप्राभातिक प्रभायामिन्दोः पराङ्गनासङ्गपातित्यनिमित्ता चेतनधर्म्मस्मित

चिररतिपरिखेदप्राप्तनिद्रासुखानां
चरममपि शयित्वा पूर्व्वमेव प्रबुद्धाः ।
अपरिचलितगात्राः कुर्व्वते न प्रियाणा
मशिथिलभुजचक्राश्लेषभेदन्तरुण्यः ॥ १३ ॥
कृतधवलिमभेदैः कुङ्कुमेनेव किञ्चि
न्मलयरुहरजोभिर्भूषयन्पश्चिमाशाम् ।
हिमरुचिररुणिम्ना राजते रज्यमानै
र्जरठकमलकन्दच्छेदगौरैर्मयूखैः ॥ १४ ॥

रुचिरोत्प्रेक्षा पूर्व्वकाष्ठाङ्गनायाइति रूढिव्यूढेत्यनयोरङ्गाङ्गिभावेन सङ्करः ॥ १२ ॥

चिरेति । चरममपि शयित्वा पश्चात् सुप्तापि पूर्व्वमेव प्रबुद्धाः । सुप्ते पश्चाच्च या शेते पूर्व्वमेव प्रबुध्यते । नान्यङ्कामयते चित्ते सा स्त्री ज्ञेया पतिव्रतेति स्मरणादिति भावः । तथापि तरुण्यः अपरिचलितगात्राः अस्पन्दवपुष्काः सत्यः चिररतिपरिखेदेन प्राप्तनिद्रासुखानां प्रियाणां अशिथिलो गाढो यो भुजचक्रेण परस्पर भुजवलयेनाश्लेषः तस्य भेदं विश्लेषं विस्रंसनं न कुर्व्वते किन्त्वाश्लिष्यैव स्थिताः अन्यथा तन्निद्राभङ्गः स्यात् । शयानं न प्रबोधयेदिति निषे धास्कन्दनभयादिति भावः । रतिश्रमोऽत्र सञ्चारी तदनु भावो निद्रा ॥ १३ ॥

कृतेति । हिमरुचिश्चन्द्रः अरुणिम्ना अस्तमयरागेण हेतुना रज्यमानैर्लोहितायमानैः । रञ्जेर्दैवादिकात्कर्त्तरि शानच् अनिदितामिति नलोपः । त्रीणि रज्यति राजति लोहितायति

दधदसकलमेकङ्खण्डितामानमद्भिः
श्रियमपरमपूर्णामुच्छ्वसद्भिः पलाशैः ।
कलरवमुपगीते षट्पदौघेन धत्तः
कुमुदकमलषण्डे तुल्यरूपामवस्थाम् ॥१५॥

चात्मनइति भट्टमल्लः । जरठस्य परिणतस्य कमलकन्दस्य छेदा इव गौराः शुभ्राः । छेदग्रहणन्धावल्यार्थं । गौरः पीते सिते ऽरुणइति विश्वः । तैर्मयूखैः कुङ्कुमेन किञ्चित्कृताधवलिमभेदा धावल्यभङ्गा येषान्तैरीषद्भग्नस्वधावल्यैः मलयरुहरजोभिश्चन्दनरेणुभिरिव पश्चिमाशां प्रेयसीमिवेति भावः । भूषयन् राजते । उपमालङ्कारः ॥ १४ ॥

दधदिति । एकं कुमुदषण्डमानमद्भिर्मुकुलीभवद्भिः पलाशैर्दलैरसकलमर्द्धं खण्डितां चीयमाणामित्यर्थः श्रियन्दधत् अपरं कमलषण्डमुच्छ्वसद्भिः विकसद्भिः पलाशैरपूर्णा वर्द्धमानां श्रियन्दधत् षट्पदौघेन कलरवं यथा तथा उपगीते उभे अपीत्यर्थः । कुमुदकमलषण्डे कुमुदानां कमलानां च षण्डे कदम्बे । कदम्बे षण्डमस्त्रियामित्यमरः । तुल्यरूपामवस्थान्धत्तः दधाते । अत्र चयवृद्ध्योरर्थप्रवृत्तेरैकरूप्य कस्य चयः कस्य वा वृद्धिरिति दुर्ग्रहमिति भावः । अत्रोभयविशेषणानान्तुल्यावस्थाधारणहेतुकत्वात् काव्यलिङ्गम् । तेन द्वयोः क्रमेणोपमानोपमेयभावरूपोपमेयोपमा व्यज्यते ॥ १५ ॥

मदेति । सम्प्रति सितकरस्येन्दोः इदं करजालं कर्तृ उदञ्चन्ता उद्यता अरुणेन अनूरुणा मदरुचिमत्तत्स्यां रुचिं

मदरुचिमरुणेनोद्गच्छता लम्भितस्य
त्यजत इव चिराय स्वायिनीमाशु लज्जाम्।
वसनमिव मुखस्य स्रंसते सम्प्रतीदं
सितकरकरजालं वासवाशायुवत्याः ॥ १६ ॥
अविरतरतलीलायासजातश्रमाणा
मुपशममुपयान्तं निःसहेऽङ्गेऽङ्गनानाम्।
पुनरुषसि विविक्तैर्मातरिश्वावचूर्ण्य
ज्वलयति मदनाग्निं मालतीनां रजोभिः ॥१७॥

अरुणिमानमित्यर्थः अतएव निदर्शनालङ्कारः । लम्भितस्य प्रापितस्य । लभेर्ण्यन्तात्कर्म्मणि क्तः लभेश्चाब्लिटोरिति नुमागमः । अतएव चिराय स्थायिनीं लज्जामाशु त्यजत इव मुखप्रकाशना दियमुत्प्रेक्षा । वासवाशा प्राची तस्याएव युवत्यामुखस्य प्राग्भागस्याननस्य च वसनमिवावगुण्ठनपटइव स्रंसते गलति रक्ताः स्त्रियः पाटलमुखानिर्लज्जा स्रस्तवस्त्राश्च भवन्तीति भावः । अत्र मुखस्येति प्राग्भागवदनयोरभेदाध्यवसायात् श्लेषमूलाति शयोक्तिः तया पूर्व्वोक्तनिदर्शनोत्प्रेक्षाभ्यां चानुगृह्यते वसनमिवेत्यु त्प्रेक्षेति सङ्करः ॥ १६ ॥

अविरतेति । अविरतरतलीलायासेनाविच्छिन्नसुरतक्रीडाप्रयासेन जातश्रमाणामङ्गनानां सम्बन्धिनि निःसहतइति निःसहे अक्षमे । पचाद्यच् । अङ्गे उपशममुपयान्तं शाम्यन्तं मदनएवाग्निस्तं पुन रुषसि मातरि अन्तरिक्षे श्वयति वर्द्धते इति मातरिश्वा । श्वन्नुक्षन्नित्यादिना औणादिकोनिपातः । विविक्तैरमलैरनार्द्रैश्च

अनिमिषमविरामा रागिणां सर्व्वरात्रं
नवनिधुवनलीलाः कौतुकेनातिवीच्य।
इदमुदवसितानामस्फुटालोकसम्प
न्नयनमिव सनिद्रं घूर्णते दैपमर्च्चिः ॥ १८ ॥

मालतीनां जातीकुसुमानाम्। सुमना मालती जातिरित्यमरः। रजोभिः परागैः करीषैरिवेति भावः। अवचूर्ण्य अवध्वस्य संयुज्येति भावः। ज्वलयत्युद्दीपयति प्राभातिकमालतीवातस्पर्शात्पुनरुद्बुद्धो मदन इत्यर्थः ॥ १७ ॥

अनिमिषमिति। इदं पुरोवर्त्ति अस्फुटा सूर्य्यतेजोभिभवान्मन्दायमाना आलोकसम्पत् प्रकाशसम्पत्तिर्यस्य तत् अन्यत्र निद्राभिभवादनुद्बुद्धविषयावधानशक्तिकं दीपस्येदं दैपमर्च्चिर्ज्वाला। ज्वालाभासोर्नपुंस्यर्च्चिरित्यमरः। सर्वस्यां रात्राविति सर्वरात्रं। पूर्व्वकालेत्यादिना समासः अहः सर्व्वेत्यादिना समासान्तः रात्राह्नाहाः पुंसीति पुंलिङ्गता अत्यन्तसंयोगे द्वितीया। अविरामाः अविच्छिन्नाः रागिणां कामिनां कामिनीनां च। पुमान् स्त्रियेत्येकशेषः। नवानिधुवनलीलाः सुरतविलासान्। व्यवायो ग्राम्यधर्म्मश्च रतं निधुवनञ्च स इत्यमरः। कौतुकेन न निमिषतीत्यनिमिषं यथा तथा। पचाद्यच् कुटादित्वान्न गुणः। अतिवीक्ष्य अतएव सनिद्रं उदवसितानां गृहाणां सम्बन्धि। गृहगेहोदवसितं वेश्म सद्म निकेतनमित्यमरः। नयनमिवेत्युत्प्रेक्षा। घूर्णते भ्रमति ॥ १८ ॥

विकचेति। प्रमदमदनाभ्यां हर्षमन्मथाभ्यां माद्यन्तीनां यौवनेनोद्दामानां च रामाणां स्त्रीणां रमणरभसखेदेन

विकचकमलगन्धैरन्धयन्भृङ्गमालाः
सुरभितमकरन्दं मन्दमावाति वातः ।
प्रमदमदनमाद्यद्यौवनोद्दामरामा
रमणरभसखेदस्वेदविच्छेददक्षः ॥ १९ ॥
लुलितनयनताराः क्षामवक्त्रेन्दुविम्बा
रजनय इव निद्राक्लान्तनीलोत्पलाक्ष्यः ।
तिमिरमिव दधानाः स्रंसिनः केशपाशा
नवनिपतिगृहेभ्यो यान्त्यमूर्वारवध्वः ॥ २० ॥

सुरतसंरम्भश्रमेण यः स्वेदः तस्य छेदे हरणे दक्षो वातः प्रभात मारुतः विकचकमलगन्धैर्भृङ्गमालाः अन्धयन्नन्धाः कुर्वन्मोहयन् । अन्धयतेस्तत्करोतीति ण्यन्ताल्लटः शत्रादेशः । सुरभितः सुरभी कृतो मकरन्दो यस्मिन् कर्म्मणि तद्यथा तथा मन्दमावाति प्रचलति । अत्र वृत्त्यनुप्रासोऽलङ्कारः । श्लेषः प्रसादः समता माधुर्य्यं सुकुमारता । अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयइति आचार्य्योक्ता दश गुणाः प्रायेणात्र सम्भवन्तीति निपुणैरूह्याः ॥ १९ ॥

लुलितेति । लुलितनयनताराः निद्राकलुषिताक्षिकनीनिकाः अन्यत्राप्रसन्ननक्षत्राः । स्यात्ताक्षिमध्ये तारेति विश्वः । वक्त्राण्येवेन्दुविम्बानीत्युपमितसमासः । तिमिरमिवेत्यादिलिङ्गात् अन्यत्र वक्त्राण्येवेन्दुविम्बानि तानि क्षामाणि सुरतप्रभाताभ्यां म्लानानि यासान्ताः निद्रया स्वप्नेन मुकुलीभावेन क्लान्तानि नीलोत्पलानि अक्षीणीव नीलोत्पलानीव वाक्षीणि यासान्ताः स्रंसिनः केशपाशान् तिमिरमिवान्यत्र तु तानिव तिमिरन्दधानाः

शिशिरकिरणकान्तं वासरान्तेऽभिसार्य
श्वसनसुरभिगन्धिः साम्प्रतं सत्वरेव।
व्रजति रजनिरेषा तन्मयूखाङ्गरागैः
परिमिलितमनिन्द्यैरम्बरान्तं वहन्ती ॥ २१ ॥
नवकुमुदवनश्रीहासकेलिप्रसङ्गा
दधिकरुचिरशेषामप्युषाञ्जागरित्वा।
अयमपरदिशोऽङ्के मुञ्चति स्रस्तहस्तः
शिशयिषुरिव पाण्डुं म्लानमात्मानमिन्दुः ॥२२॥

अतएव रजनयइव स्थिताः। अमूर्वारवध्वो वेश्याः। वारस्त्री गणिका वेश्येत्यमरः। अवनिपतिगृहेभ्यो यान्ति। निर्यान्ति। श्लिष्टविशेषणेयमुपमेत्येके श्लेषएवायमुभयविषयः उपमा तु प्रतिभामात्रसारा इत्यन्ये॥ २० ॥

शिशिरेति। एषा रजनिर्वासरान्ते रात्रौ शिशिरकिरण श्चन्द्रस्तमेव कान्तमभिसार्य्याभिसृत्य। स्वार्थे णिच्। साम्प्रतं श्वसनैः तत्कालवातैः निश्वासैश्च सुरभिगन्धिः सुगन्धिः अनिन्द्यैः मनोहरैर्मयूखैरेवाङ्गरागैः परिमिलितं व्याप्तं वासितञ्चाम्बरान्तं नभःप्रान्तं वस्त्रान्तञ्च वहन्ती भजन्ती सत्वरेव व्रजति। अत्रेन्दु तन्मयूखादीनां कान्तत्वाङ्गरागत्वादिरूपणावगमादेकदेशविवर्त्ति रूपकम्॥ २१ ॥

नवेति। अधिकरुचिरयमिन्दुर्नवकुमुदवनश्रियो विकाशः परि हासश्च सएव केलिस्तस्याःप्रसङ्गादासङ्गादशेषामप्युषां सकलामपि रात्रिं। विभावरी नक्तमुषा शर्व्वरीति विश्वः। अत्यन्तसंयोगे

सरभसपरिरम्भारम्भसंरम्भभाजा
यदधिनिशमपास्तं वल्लभेनाङ्गनायाः ।
वसनमपि निशान्ते नेष्यते तत्प्रदातुं
रथचरणविशालश्रोणिलोलेक्षणेन ॥ २३ ॥

द्वितीया । जागरित्वा जागरणं कृत्वा शिशयिषुः शयितुमिच्छुरिव । शेतेः सन्नन्तादुप्रत्ययः । हस्तो हस्तोनक्षत्रविशेषः करश्च यस्य स मन् अपरदिशः पश्चिमदिशोऽङ्के समीपे उत्सङ्गे च पाण्डुं पाण्डुवर्णं म्लानं कान्तमात्मानं स्वशरीरं मुञ्चति दक्षिणनायकः कयाचित्सह विहृत्य श्रान्तः कस्याश्चिदङ्के शेते तद्वदिति भावः । अत्र प्रस्तावकेऽप्यङ्कक रम्भंसनादिव्यवहारादिन्दुकुमुदवनश्रीपश्चिमानां नायकत्वप्रतीतेः समासोक्तिरलङ्कारः । विशेषणसाम्यं तूपलक्षणमित्यलङ्कारसर्वस्वकारः साचेत्प्रेक्षासङ्कीर्णा ॥ २२ ॥

सेति । अधिनिशं निशायां । विभक्त्यर्थेऽव्ययीभावः । सरभसः सत्वरः परिरम्भणत्वारम्भोव्यापारस्तत्र संरम्भस्तद्भाजा वल्लभेनाङ्गनायाः सम्बन्धि यद्वसनं अपास्तन्तद्वसनं निशान्ते प्रभातेऽपि रथचरणश्चक्रन्तद्वद्विशालायां श्रोणौ लोलं सतृष्णमीक्षणं यस्य तेन वल्लभेन प्रदातुं नेष्यते । अत्र वसनाप्रतिदानस्य श्रोणीक्षणलौल्यहेतुकत्वात्काव्यलिङ्गम् ॥ २३ ॥

सपदीति । सपदि सद्यः कुमुदिनीभिर्मीलितं । भावे क्तः । हा हन्त क्षपा रात्रिरपि क्षयमगमत् ताः समस्तास्तारकाः अस्तेतादिति शुचा शोकेन चिन्तयन्निव दयितकलत्रः प्रियभार्य्यः

सपदि कुमुदिनीभिर्मीलितं हा क्षपापि
क्षयमगमदपेतास्तारकास्ताः समस्ताः ।
इति दयितकलत्रश्चिन्तयन्नङ्गमिन्दु-
र्वहति कृशमशेषं भ्रष्टशोभं शुचेव ॥ २४ ॥
व्रजति विषयमक्ष्णामंशुमाली न याव-
त्तिमिरमखिलमस्तं तावदेवारुणेन ।
परपरिभवि तेजस्तन्वतामाशु कर्त्तुं
प्रभवति हि विपक्षोच्छेदमग्रेसरोऽपि ॥२५॥

इन्दुः कृशमशेषं निःशेषं यथा तथा भ्रष्टशोभं नष्टप्रभमङ्गं वहति कलत्रप्रियस्य युगपत्सकलकलत्रनाशे महान् शोको भवतीति भावः । अत्रेन्दोः प्रभातप्रयुक्ताङ्गकार्श्यशोभाभ्रंशयोर्युगपत्कुमुदिन्यादिसकलकलत्रनाशनिमित्तहेतुकत्वमुत्प्रेक्ष्यते ॥ २४ ॥

व्रजतीति । अंशुमाली सूर्य्यः । व्रीह्यादित्वादिनिप्रत्ययः । यावदक्ष्णां विषयभूमिं न व्रजति न दृश्यत इत्यर्थः तावदेवारुणेनानूरुणा अखिलन्तिमिरमस्तमपास्तं परेषाम्परिभवि तिरस्कारकं । जिदृक्षीत्यादिना इनिप्रत्ययः । तेजः प्रतापन्तन्वतां प्रथयतां अग्रे सरतीत्यग्रेसरः पुरःसरोऽपि । पुरोऽग्रतोऽग्रेषु सर्त्तेरिति टप्रत्ययः । विपक्षस्य शत्रोरुच्छेदं कर्त्तुमाशु प्रभवति शक्नोति हि । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ २५ ॥

विगतेति । विरहेण खिन्नः रथचरणेन चक्रेण समाङ्कस्तुल्याख्यः तस्यैव समाङ्का समाख्या यस्येति वा रथचरणसमाङ्कश्चक्रवाक इत्यर्थः । कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामक इत्यमरः । तिमिर

विगततिमिरपङ्कं पश्यति व्योम यावत्
धुवति विरहखिन्नः पक्षती यावदेव।
रथचरणसमाह्वस्तावदौत्सुक्यनुन्ना
सरिदपरतटान्तादागता चक्रवाकी ॥२६॥
मुदितयुवमनस्काास्तुल्यमेव प्रदोषे
रुचमदधुरुभय्यः कल्पिताभूषिताश्च।
परिमलरुचिराभिर्न्यकृतास्तु प्रभाते
युवतिभिरुपभोगान्नीरुचः पुष्पमालाः ॥२७॥

पङ्कमिवेत्युपमितसमासः। तद्विगतं यस्मात्तद्व्योम यावत्पश्यति यावदेव पक्षती पक्षमूले। स्त्री पक्षतिः पक्षमूलमित्यमरः। पक्षात्तिरिति तिप्रत्ययः। धुवति उत्पतितुं धुनोति। धू विधूनन इति धातोस्तौदादिकत्वादुवङादेशः। तावदेवोत्पतनात् प्रागेव चक्रवाकी चक्रवाकस्य स्त्री। जातेरस्त्रीविषयादयोपधादिति ङीप्। औत्सुक्येनोत्कण्ठया नुन्ना प्रेरिता सती सरितोऽपरतटान्तात्परभूमेः सकाशादागता एतेनानयोरन्यमनस्कता समश्चानुराग इत्युक्तं। अत्र रागोत्सुक्ययो रसभावयोस्तिर्यग्गतत्वेनाभासयोर्निबन्धनादूर्जस्वी नामालङ्कारः। रसभावतदाभासप्रशमानां निबन्धने रसवत्प्रेयऊर्जस्विसमाहितानीति लक्षणात् ॥ २६ ॥

मुदितेति। प्रदोषे रात्रौ मुदितानि यूनां मनांसि याभिस्ताः मुदितयुवमनस्काः। उरःप्रभृतिभ्यः कप्। कल्पिताः उपभोगाय सम्पादिताः भूषितावलयवसनादिभिरुपस्कृताश्च उभय्यः उभयविधाः युवतयः पुष्पमालाश्च। उभादुदात्तो नित्यमिति उभशब्दा

विलुलितकमलौघः कीर्णवल्लीवितानः
प्रतिवनमवधूताशेषशाखिप्रसूनः ।
क्वचिदयमनवस्थः स्थास्नुतामेति वायु
र्वधुकुसुमविमर्दोद्गन्धिवेश्मान्तरेषु ॥ २८ ॥

अयजादेशः टिड्ढाणञित्यादिना ङीप् । तुल्यमेवाविशेषं यथा तथा रुचं शोभामदधुर्धृतवत्यः । धाञो लिट् । प्रभाते तूपभोगाल्लीरुचो निष्प्रभाः पुष्पमालाः परिमलेन विमर्दगन्धेन रुचिराभिरुपभोगादधिसुरभिभिर्युवतिभिर्न्यक्कृतास्तुच्छाः अवधीरिताश्च । अत्र पुष्पमालाभ्यो युवतीनां साम्योक्तिपूर्वकविमर्दसहत्वेनाधिक्योक्तेर्व्यतिरेकः ॥ २७ ॥

विलुलितेति । वनेवने प्रतिवनं । याथार्थ्येऽव्ययीभावः । विलुलिताः व्यालोलिताः कमलौघा येन सः कीर्णाविक्षिप्ता वल्लीनां मालत्यादीनां वितानाविस्तारा येन सः अवधूतान्यशेषशाखिनां वकुलचम्पकादीनां प्रसूनानि येन सः तथापि क्वचित्पूर्वोक्तकमलवनादौ कुत्रापि नास्त्यवस्था स्थितिरस्येत्यनवस्थः स्थितिमप्राप्तोऽयं वायुर्बन्धूनां कुसुमानाञ्च विमर्देन सङ्घर्षेण उद्गन्धिषु उद्गतगन्धेषु । गन्धस्येत्वम् । वेश्मान्तरेषु गृहान्तरेषु स्थास्नुतां स्थायित्वमेति पूर्वोक्तसर्वोत्कृष्टसौरभलोभादिति भावः । ग्लाजिस्थश्चेति ग्स्नुच् प्रत्ययः बधुशब्दो ह्रस्वोकारान्तोऽप्यस्ति । यद्वा मधुकुसुमेति पाठः मधुयुक्तानि कुसुमानि तेषां विमर्दनेत्यर्थः । अत्र वायोरस्थायित्वेऽपि स्थायित्वसम्बन्धोक्तेरतिशयोक्तिः तथा विमर्दगन्धस्य कमलादिगन्धादाधिक्यरूपव्यतिरेकप्रतीतेरलङ्कारेणालङ्कारध्वनिः ॥ २८ ॥

नखपदवलिनाभीसन्धिभागेषु लक्ष्यः
क्षतिषु च दशनानामङ्गनायाः सशेषः ।
अपि रहसि कृतानां वाग्विहीनोऽपि जातः
सुरतविलसितानां वर्णकोवर्णकोऽसौ ॥ २९ ॥

प्रकटमलिनलक्ष्मा स्पष्टपत्रावलीकै
रधिगतरतिशोभैः प्रत्युषःप्रेषितश्रीः ।
उपहसित इवासौ चन्द्रमाः कामिनीना
म्परिणतशरकाण्डापाण्डुभिर्गण्डभागैः ॥ ३० ॥

नखपदेति । नखपदेषु नखक्षतेषु वलिषु त्रिवलिषु नाभ्यां सन्धिभागेषु कूर्परादिदेहसन्धिस्थानेषु तथा दशनानां क्षतिषु दन्तव्रणेषु च सशेषः सावशेषः किञ्चिद्दृश्यमानः अतएव लक्ष्योदृश्यः अङ्गनायाः सम्बन्धी असौ वर्णयति वर्णं करोति रञ्जयतीति वर्णको ऽङ्गरागोवाग्विहीनोवागिन्द्रियरहितोऽपि सन् रहसि कृतानामपि सुरतविलसितानां सुरतचेष्टितानां वर्णयति वक्तीति वर्णकोवक्ता व्यञ्जक इत्यर्थः । वर्णयतेर्ण्वुल्प्रत्ययः । वर्णक्रियायां विस्तारे गुणोक्तौ वर्णनेष्यदइति भट्टमल्लः । जातः नखक्षतादिष्वेव लक्ष्यमाणो ऽङ्गरागोऽन्यत्र स्वविलोपात्चेष्टाविशेषानुमापकोजातइत्यर्थः । अत्र वाग्विहीनोऽपि रहस्यकृतानानपि वर्णकोवक्तेति विरोधस्य व्यञ्जकत्वलक्षणया परिहाराद्विरोधाभासोऽलङ्कारः ॥ २९ ॥

प्रकटेति । उषसि प्रत्युषः । विभक्त्यर्थेऽव्ययीभावः । यद्वा प्रत्युषः प्रभातं । उषः प्रत्यूषसी अपीत्यमरः । तत्र प्रेषितश्रीर्भ्रष्ट शोभः अतएव प्रकटमलिनलक्ष्मास्पष्टदृष्टकलङ्कोऽसौ चन्द्रमाः

सकलमपि निकामं कामलोलान्यनारी
रतिरभसविमर्दैर्भिन्नवत्यङ्गरागे ।
इदमतिमहदेवाश्चर्य्यमाश्चर्य्यधाम्नः
स्तव खलु मुखरागोयन्न भेदम्प्रयातः ॥२१॥

मृष्टाः प्रमृष्टाः पत्रावल्यः पत्रभङ्गा येषान्तैः । नद्यृतश्चेति कप् । तथा अधिगता रतिशोभा सम्भोगश्रीर्येषान्तैः परिणताः परिपक्वाः शरकाण्डा बाणाख्यतृणकाण्डिकाः । शरो बाणे बाणतृणइति शब्दार्णवे । तद्वदापाण्डुभिः कामिनीनाङ्गण्डभागैर्गण्डस्थलैरुपहसित इवेत्युत्प्रेक्षा । पाण्डिमगुणनिमित्तानिष्कलङ्काः सकलङ्कं समानमानिनमुपहसन्तीति भावः ॥ ३० ॥

अथ काचित्खण्डिता नायिका सागसम्प्रेयांसम्प्रातरागतमपह्नु भिरुपालभते । सकलमित्यादि । कामेन लोलाया अन्यनार्याः सपत्न्याः रतिरभसेषु सुरतसम्भ्रमेषु विमर्दैः पीडनैः रज्यतेऽनेनेति रागः अङ्गस्य रागोऽङ्गरागः विलेपनं अङ्गविकारश्च तस्मिन्नङ्गरागे सकलमपि निःशेषं यथा तथा निकामम्भिन्नवति विश्लिष्टवति सति आश्चर्य्यधाम्नः सर्व्वाद्भुतनिधानस्य तव मुखरागो मुखविकारोभेदं विशेषं न प्रयातः इति यत् इदमेवातिमहदाश्चर्य्यं खलु मुखस्याप्यङ्गत्वेन तद्रागस्याप्यङ्गरागत्वादिति भावः । अत्र विलेपनविकाराख्ययोरङ्गरागयोरेवाभ्यवसायेन विरोधः भेदाननुसन्धानत्वेनाविरोधइति श्लेषमूलातिशयोक्त्युत्थापितोविरोधाभासोऽलङ्कारः ॥ २१ ॥

प्रकटतरमिमम्मा द्राक्षुरन्या रमण्यः
स्फुटमिति सविशङ्कङ्कान्तया तुल्यवर्णः ।
चरणतलसरोजाक्रान्तिसंक्रान्तयासौ
वपुषि नखविलेखो लाक्षया रक्षितस्ते ॥२२॥

तदवितथमवादीर्यन्मम त्वम्प्रियेति
प्रियजनपरिभुक्तं यद्दुकूलन्दधानः ।
मदधिवसतिमागाः कामिनाम्मण्डनश्री
र्व्रजति हि सफलत्वं वल्लभालोकनेन ॥२३॥

प्रकटेति । किञ्च प्रकटतरमतिस्फुटमिममेनं नखविलेखं अन्याः रमण्यो निजसपत्न्यः स्फुटम्मा द्राक्षुः न पश्यन्तु । दृशेर्लुङ् न दृश इति क्सभावपक्षे सिचि वृद्धिः । इति बुद्ध्या कान्तया सविशङ्कं यथा तथा तुल्यवर्णो लाक्षासमानवर्णः विवर्णस्य दुरपह्नवत्वादिति भावः । असौ ते तव वपुषि नखविलेखो नखव्रणः चरणतलं सरोजमिवेत्युपमितसमासः आक्रान्तिलिङ्गास्त्याक्रान्त्या आघातेन संक्रान्तया लाक्षया रक्षितो गुप्तः आच्छादित इत्यर्थः हन्त सा तु पापीयसी लाक्षा स्वयमेव सर्व्वदृष्टान्तपिशुनेति भावः । अत्र नखविलेखस्य लाक्षासावर्ण्यात्तदेकतापत्तेः सामान्यालङ्कारः । सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकतेति लक्षणात् ॥ २२ ॥

तदिति । किञ्च मम त्वमेव प्रियेति यदवादीरवोचः । वदेर्लुङि वदव्रजेत्यादिना वृद्धिः । तदवितथं सत्यं कुतः यद्यस्मात् प्रियजनेन परिभुक्तं दुकूलन्तदीयमित्यर्थः दधानः धारयन्नित्यर्थः दधान इत्यत्र वसान इति पाठे वसानआच्छादयन् । वसआच्छा

नवनखपदमङ्गं गोपयस्यंशुकेन
स्थगयसि पुनरोष्ठम्पाणिना दन्तदष्टम्।
प्रतिदिशमपरस्त्रीसङ्गशंसी विसर्प्प
न्नवपरिमलगन्धः केन शक्यो वरीतुम् ॥३४॥

इत्यर्थांतरट: शानजादेश:। स त्वं मदधिवसतिं मम निवासमागा: प्राप्त:। इणोगालुङि। युक्तञ्चैतदित्याह। कामिनां मण्डन श्रोर्वल्लभानाम्प्रेयसीनामालोकनेन सफलत्वं व्रजति हि अप्रिया चेत्कथमीदृशी मे सम्भावनेति भाव:। अर्थान्तरन्यास: ॥ ३३ ॥

नवेति। किञ्च नवानि नखपदानि यस्मिन् तदङ्गं वपु रंशुकेन गोपयसि छादयसि। गुपेश्चौरादिकात्स्वार्थे णिच्। दन्तेन दष्टमोष्ठम्पुनरोष्ठन्तु पाणिना स्थगयसि छादयसि। स्थगि रपि चौरादिक:। दिशिदिशि प्रतिदिशं। विभक्त्यर्थेऽव्ययीभाव: अव्ययीभावे शरत्प्रभृतिभ्यइति समासान्त: टच्प्रत्यय:। विसर्प्पन् प्रसर्प्पन् अपरस्त्रीसङ्गशंसी स्त्र्यन्तरसङ्गसूचक: अन्याप्रभ त्वागतोसीति भाव: नव: परिमलाख्योगन्ध:। परिमलगन्ध:। विमर्दोत्थे परिमलइत्यमर:। केन केनोपायेन वरीतुमाच्छादयितुं। वृतोवेति इटोदीर्घ:। शक्य: न केनापि शक्यइत्यर्थ:। अत्र नखदन्त चतयोरङ्गौष्ठच्छादने विसर्प्पणस्य गन्धानाच्छाद्यत्वे च विशेषण गत्या हेतुत्वात्काव्यलिङ्गद्वये सजातीयसङ्कर: ॥ ३४ ॥

इतीति। इति पूर्व्वोक्तश्लोकचतुष्टयरीत्या कृतवचनाया: कृतोपालम्भाया: गलितनयनवारेरधैर्य्यान्मुक्ताश्रो: प्रेयस्या इति शेष: कश्चिन्नायकोबिभ्यत् त्रसन्। नाभ्यस्ताच्छतुरिति नुमभाव:।

इतिकृतवचनायाः कश्चिदभ्येत्य बिभ्य
द्गलितनयनवारेर्याति पादावनामम् ।
करुणमपि समर्थम्मानिनाम्मानभेदे
रुदितमुदितमस्त्रं योषितां विग्रहेषु ॥ ३५ ॥

॥ कुलकम् ॥

अभ्येत्यागत्य पादयोरवनाममवनतिं याति प्रणामेन प्रसादयतीत्यर्थः । ननु कथमोदृङ्मार्दवन्तथाहङ्कारिणस्तस्य रोदनमात्रेण तत्राह । करुणमिति । तथाहि विग्रहेषु प्रणयकलहेषु योषिता करुण दीनमपि रुदितमश्रुमोचनं मानिनामहङ्कारिणाम्पुंसां मानभेद अहङ्कारनिरासे समर्थं शक्तमस्त्रं साधनमुदितमुक्तं । वदेः कर्म्मणि क्तः वचिस्वपीत्यादिना सम्प्रसारणम् । दीने प्रणयिजने पुंसाङ्कोऽहङ्कारइति भावः । अर्थान्तरन्यासः । एषा च खण्डिता नायिका । नीत्वान्यत्र निशाम्प्रातरागते प्राणवल्लभे । अन्यासम्भोग चिह्नैस्तु खण्डितेर्ष्याकषायितेति लक्षणात् । नायकस्तु धृष्टः । व्यक्तागा निर्भयोधृष्टइति लक्षणात् । नचेह बिभ्यद्विशेषणविरोधः आगमन कालेऽतिनिर्भीकतायाएव लक्षणोपयोगात् अन्यथा वैरं स्यादिति भावः अयञ्च सहृदयः अन्यथा रसाभासइत्याहुः ॥ ३५ ॥

मदेति । मदमदनयोर्विकाशेन विजृम्भणेन स्पष्टोधार्ष्ट्यस्योदयआविर्भावोयासान्तासां कामिनीनां रतिरेव कलहस्तस्मिन् विकीर्णैरितस्ततोविचित्रैर्भूषणैरर्चितेषु गृहेषु वयस्याः स्निग्धपरिचारिकाः विनीयन्तेऽस्मिन्निति विनयोऽधिकारः तत्र यत्नोविफलो यासान्ताः विफलविनययत्नाः निष्फलस्वाधिकारोद्योगाः सत्यः

मदमदनविकाशस्पष्टधार्ष्ट्योदयानां
रतिकलहविकीर्णैर्भूषणैरर्चितेषु।
विदधति न गृहेषूत्फुल्लपुष्पोपहारं
विफलविनययत्नाः कामिनीनां वयस्याः ॥३६॥

करजदशनचिह्नं नैशमङ्गेऽन्यनारी
जनितमिति सरोषामीर्ष्यया शङ्कमानाम्।
स्मरसि न खलु दत्तं मत्तयैतत्त्वयैव
स्त्रियमनुनयतीत्थं व्रीडमानां विलासी ॥ ३७ ॥

उत्फुल्लैः पुष्पैरुपहारं पूजां न विदधति न कुर्वन्ति। अत्र रम्यस्य वस्तुवर्णनादुदात्तालङ्कारः। तदुदात्तम्भवेद्यत्र रम्यं वस्तु वर्ण्यते इति लक्षणात्। तेन तासां तेषु आभरणेषु भुक्तस्रगमाल्यादिवत्रि र्माल्यबुद्धिर्ध्वन्यते ॥ ३६ ॥

करजेति। विलसनशीलो विलासी। वौ कषलषेत्यादिना घिनुण् प्रत्ययः। अङ्गे निजाङ्गे निशायाम्भवं नैशं। निशाप्रदोषाभ्यां चेत्यण् प्रत्ययः। करजदशनचिह्नं नखदन्तक्षतं अन्यनारीजनितं सपत्नी कृतमिति शङ्कमानां विश्वसतीमत एवेर्ष्यया अक्षमया सरोषां स्त्रियं निजवधूं मत्तया मदमूढया त्वयैवैतद्दत्तमेवं कृतं खलु न स्मरसि नाभिजानासि किमिति काकुः इत्थमनेन प्रकारेण व्रीड मानां स्वकृतत्वप्रत्यभिज्ञानाल्लज्जितां सतीमनुनयति अङ्गीकारयति स्वसौभाग्यव्याघातोनिर्वेदस्य लज्जया व्यज्यते ॥ ३७ ॥

कृतेति। कृतो गुरुतरस्य हारस्य छेदो यस्मिन् तत्तथा आलिङ्ग परिश्लथितगात्रे श्लथिलीकृताङ्गे पत्यौ भर्त्तरि गल्लमापृच्छ

कृतगुरुतरहारच्छेदमालिङ्ग्य पत्यौ
परिशिथिलितगात्रे गन्तुमापृच्छमाने ।
विगलितनवमुक्तास्थूलबाष्पाम्बुबिन्दु
स्तनयुगमबलायास्तत्क्षणं रोदितीव ॥ ३८ ॥
बहु जगद पुरस्तात्तस्य मत्ता किलाहं
चकार च किल चाटु प्रौढयोषिद्वदस्य ।
विदितमिति सखीभ्यो रात्रिवृत्तं विचिन्त्य
व्यपगतमदयाह्नि व्रीडितं मुग्धवध्वा ॥ ३९ ॥

मान आमन्त्र्यमाणे सति । आङि नुप्रच्छोरुपसंख्यानादात्मनेपदं कर्त्तरि लट: शानजादेश: । तत्क्षणं तस्मिन् क्षणे । अत्यन्तसंयोगे द्वितीया । अबलाया: स्तनयुगद्वन्द्वं विगलितानि स्नुतानि नवमुक्तानूतनमौक्तिकान्येव स्थूलबाष्पाम्बुबिन्दवो यस्मिन् कर्म्मणि तत्तथा रोदितीव विरहासहिष्णुतया रोदनं करोतीवेत्युत्प्रेक्षा रूपकसङ्कीर्णा । रुदादिभ्य: सार्व्वधातुके इतीडागम: ॥ ३८ ॥

बह्विति । अह्नि दिवसे व्यपगतमदया मुग्धवध्वा सखीभ्यो विदितं रात्रौ त्वयेत्थं कृतमिति सखीभिराख्यातमित्यर्थ: । रात्रिवृत्तं रात्रौ कृतं स्वचेष्टितमित्यर्थ: । मत्ता मदमूढा अहं तस्य प्रियस्य पुरस्तादग्रे बहु अनेकं जगद किल गदानि स्म किलेति ऐतिह्ये । अतएव परोक्षे लिट् णलुत्तमो वेति पक्षे णित्वाभावाद्वृद्ध्यभाव: । च पुन: प्रौढयोषिता तुल्यं प्रौढयोषिद्वदित्युपमा तेन तुल्यमिति वतिप्रत्यय: । अस्य प्रियस्य चाटु प्रियवचनं चकार किल चकारेत्यर्थ: किल । लिडादि पूर्व्ववत् गुणो

अरुणजलजराजीमुग्धहस्ताग्रपादा
बकुलमधुपमालाकज्जलेन्दीवराक्षी ।
अनुपतति विरावैः पत्त्रिणां व्याहरन्ती
रजनिमचिरजाता पूर्व्वसन्ध्या सुतेव ॥ ४० ॥

विशेषः । इति विचिन्त्य विस्रस्य शोभितं लज्जितम् । भावे क्तः । निजकार्य्यप्रकाशेन लज्जात्र सञ्चारी भावः । भावनिबन्धना श्लेषोऽलङ्कारः ॥ ३८ ॥

अरुणेति । अरुणजलजराज्येव रक्तकमलश्रेण्येव मुग्धं सुन्दरं हस्ताग्रपादं हस्तौ च अग्रपादौ च यस्याः सा बकुलं मधुपमाला कज्जलकुञ्जलमिव मधुपमाला ययोस्ते अक्षिणी इन्दीवरे इव यस्याः सा बकुलमधुपमालाकज्जलेन्दीवराक्षी पत्त्रिणां पक्षिणां विरावैर्व्याहरन्ती आलपन्ती । व्याहार उक्तिर्लपितमित्यमरः । अचिरजाता सद्योभवा बाला च पूर्व्वसन्ध्या प्रातःसन्ध्या सुतेव पुत्रीव रजनी मनुपतति अनुधावति जननीमिवेत्यर्थः । इह विरावैर्व्याहरन्तीति व्यधिकरणपरिणामः । तत्सङ्कीर्णेयमुपमा ॥ ४० ॥

प्रतीति । अग्निराहितो यैस्तेषामग्न्याहितानाम् । आहिताग्न्यादिष्विति निष्ठायाः परनिपातः । प्रतिशरणम्प्रतिगृहम् । शरणं गृहरक्षित्रोरित्यमरः । अग्नीषञ्ज्योतिरचतार्च्चिरयमग्निराहवनीयः विधिना यज्ञकर्मण्यजपन्यजः सामस्वित्यादिशास्त्रोक्तरीत्या विहितायथा योगमुच्चारिता विरिब्धाःस्वराएकश्रुत्यादयस्तैरुच्चारितैस्तैः । कुम्भस्वान्तेत्यादिना रेभृशब्दे इति धातोः स्वरे विरिब्धशब्देनि ष्ठान्तोऽनिट्त्वेन निपातितः अध्वर्युवर्य्यैः ऋत्विक्श्रेष्ठः ऋत्विग्भि

प्रतिशरणमशीर्णज्योतिरग्न्याहितानां
विधिविहितविरिब्धैः सामधेनीरधीत्य।
कृतगुरुदुरितौघध्वंसमध्वर्युवर्य्यै
र्हुतमयमुपलीढे साधु सान्नाय्यमग्निः ॥ ४१ ॥

शेषवाचिना अध्वर्युशब्देन ऋत्विक्प्राचलक्षणात्। यद्वा अध्व
र्युवर्य्यामुख्यो येषान्तैः अध्वर्युप्रमुखैश्चतुर्भिर्ऋत्विग्भिरित्यर्थः।
तस्माद्दर्शपौर्णमासयोर्यज्ञक्रतोश्चत्वारऋत्विजइति श्रवणात्। दर्श
स्यायं सर्व्वत्रैव सान्नाय्यविधानादिति सामधेनीः प्रवोवाजाइत्या
दिकाअग्निसमिन्धनीर्ऋचोऽधीत्य पठित्वा। ऋक्सामिधेनी धाय्या
च या स्यादग्निसमिन्धने इत्यमरः। सामधेनीग्रहणं याज्या
पुरोनुवाक्यादिमन्त्रान्तराणामप्युपलक्षणम्। कृतागुरुतरदुरिता
नामोघस्य ध्वंसोयस्मिन् कर्म्मणि तद्यथा तथा साधु सम्यक् हुतन्देव
तोद्देशेन त्यक्तं सन्नीयतइति सान्नाय्यं हविर्विशेषं ऐन्द्रन्दध्यमा
वास्यायामैन्द्रं पयोऽमावास्यायामिति विहिते दधिपयसी इत्यर्थः।
पाय्यसान्नाय्यनिकाय्येत्यादिना हविर्विशेषे सम्पूर्व्वान्नयतेर्ण्यन्ताद
यादेशोपसर्गदीर्घनिपातः। उपलीढे आस्वादयति। लिह आस्वा
दनइतिधातोः स्वरितेत्त्वाल्लटि तङि टेरेत्वं ढलण्लुत्वढलोपदीर्घाः।
अत्राग्नेः सान्नाय्योपलेहनस्योत्तरकालभावित्वेऽपि तदुपलक्षितस्य
कर्म्मणउदिते आदित्ये पौर्णमास्यास्तन्त्रं प्रयुक्त अतिप्रागुदया
दमावास्यायाइति शास्त्रात्तत्कालप्रक्रान्तस्य वर्त्तमानत्वात्तस्यापि
वर्त्तमानताव्यपदेशः एतच्चाहिताग्नित्वमात्रेण कालविशेषानाद
रेणोक्तमिति पूर्व्वोक्तचन्द्रोदयाद्यविरोधः अथवा उदिते जुहोत्य

प्रकृतजपविधीनामास्यमुद्भिन्नदन्त
न्मुहुरपिहितमोष्ठैरक्षरैर्लक्ष्यमन्यैः ।
अनुकृतिमनुवेलं घट्टितोद्घट्टितस्य
व्रजति नियमभाजाम्मुग्धमुक्तापुटस्य ॥ ४२॥

र्यदिते जुहोति प्रातर्जुहोत्यग्निहोत्रन्तत्कालत्वात्सामिधेनीसान्नाय्य
शब्दयोर्मन्त्रहविर्मात्रपरत्वमाश्रित्याग्निहोत्रपरत्वेन व्याख्येयम् ॥
तस्याग्निहोत्रस्य यज्ञक्रतोः एकश्चत्विगित्येकाध्वर्य्युकत्वे वर्यैरिति
बहुवचनं यजमानबहुत्वादुपपद्यतइत्याहुरित्यलं छान्दसगोष्ठी
व्यसनेन । वृत्त्यनुप्रासोऽलङ्कारः स्पष्ट एव ॥ ४१ ॥

प्रकृतेति । प्रकृतजपविधीनां प्रक्रान्तजपकर्म्मणां नियमभाजा
न्तपस्विनां सम्बन्धे ओष्ठे भवैरोष्ठ्यैः । शरीरावयवाच्चेति यत्प्रत्ययः ॥
अक्षरैर्वर्णैः उपूपध्मानीयैरित्यर्थः । उपूपध्मानीयानामोष्ठा
वित्यनुशासनात् । मुहुरपिहितमावृतमन्यैरनोष्ठ्यैरक्षरैर्लक्ष्य
न्दर्शनीयं अतएवोद्भिन्नयउद्गतांश्चोदन्तायस्य तदास्यं मुखं
अनुवेलं प्रतिक्षणं घट्टितोद्घट्टितस्य प्राप्तित्वान्मुहुर्घटितविघटि
तस्य । विशेषणसमासः । मुग्धं सुन्दरं यन्मुक्तानां मक्का
फलानां पुटं कोटिः शुक्तिरिति यावत् तस्यानुकृतिं साम्यं व्रजति ।
उपमालङ्कारः । एतेन श्लोकद्वयेन बहवः कर्म्मनिष्ठास्तपो
निष्ठाश्च ब्राह्मणा भगवन्तमनुयन्तीति कथितम् ॥ ४२ ॥

नवेति । कुलिशं पाणौ यस्य स कुलिशपाणिरिन्द्रः । प्रहर
णार्थेभ्यः परे निष्ठासप्तम्यौ भवतइति पाणेः परनिपातः । एतदेवात्र
व्यधिकरणबहुव्रीहेश्च ज्ञापकम् । तस्य ककुभि प्राच्यां दिशि

नवकनकपिशङ्गं वासराणां विधातुः
ककुभि कुलिशपाणेर्भाति भासां वितानम् ।
जनितभुवनदाहारम्भमम्भांसि दग्ध्वा
ज्वलितमिव महाब्धेरूर्ध्वमौर्वानलार्चिः ॥४३॥

विततपृथुवरत्रातुल्यरूपैर्मयूखैः
कलश इव गरीयान् दिग्भिराकृष्यमाणः ।
कृतचपलविहङ्गालापकोलाहलाभि-
र्जलनिधिजलमध्यादेष उत्तार्य्यतेऽर्कः ॥४४॥

नवकनकवत्पिशङ्गं वासराणां विधातुर्दिनकरस्य भासां वितानं करजालं महाब्धेरम्भांसि दग्ध्वा जनितभुवनदाहारम्भं कृतजगद्दाहयोगं सदूर्ध्वमब्धेरुपरि ज्वलितमौर्वानलार्चिर्वडवानलज्योतिरिव भातीत्युत्प्रेक्षा ॥ ४३ ॥

विततेति । वितताभिः प्रसारिताभिः पृथुवरत्राभिर्महारज्जुभिस्तुल्यरूपैस्तुल्याकारैर्मयूखैः किरणैर्गरीयान् कलश इवाकृष्यमाणः सन्नेषोऽर्कः कृतश्चपलः सत्वरो विहङ्गालाप एव कोलाहलः कलकलो याभिस्ताभिः दिग्भिर्जलनिधेः जलमध्यादुत्तार्य्यते उद्ध्रियते । तरतेर्ण्यन्तात्कर्मणि लट् । यथा कुतश्चित्कूपात् कुम्भः पाशैराकृष्य सकलकलमञ्जुभिः स्त्रीभिरुद्ध्रियते तद्वदिति भावः । अत्र वरत्रातुल्यरूपैः कलश इवेति चोपमाभ्यां विहङ्गालापकोलाहलेति रूपकेण चोज्जीवितार्कस्य दिक्कर्तृकोत्तारणोत्प्रेक्षा व्यञ्जकाप्रयोगात् प्रतीयमानेति सङ्करः ॥ ४४ ॥

पयसि सलिलराशेर्नक्तमन्तर्निमग्नः
स्फुटमनिशमतापि ज्वालया वाडवाग्नेः।
यदयमिदमिदानीमङ्गमुद्यन्दधाति
ज्वलितखदिरकाष्ठाङ्गारगौरं विवस्वान् ॥४५॥
अतुहिनरुचिनासौ केवलन्नोदयाद्रिः
क्षणमुपरिगतेन क्ष्माभृतः सर्व्वएव।
नवकरनिकरेण स्पष्टबन्धूकसून
स्तवकरचितमेते शेखरम्बिभ्रतीव ॥ ४६ ॥

पयसीति। अयञ्च विवस्वान् नक्तं सलिलराशेः पयसि निमग्नो ऽन्तर्वाडवाग्नेर्ज्वालया अनिशमतापि तप्तः स्फुटमित्युत्प्रेक्षा। कुतः यदिदानीमुद्यन् इदं ज्वलितः प्रज्वलन् यः खदिरकाष्ठस्याङ्गार स्तद्वद्गौरमरुणमङ्गन्दधाति। गौरोऽरुणे सिते पीते इति विश्वः ॥ ४५ ॥

अतुहिनेति। क्षणमुपरिगतेन स्थितेनातुहिनरुचिनार्केण केवलमसावुदयाद्रिः पूर्व्वाद्रिः। उदयः पूर्व्वपर्व्वत इत्यमरः। किन्त्वेते सर्व्वएव क्ष्माभृतः सर्व्वेऽपि शैलाः क्षणमुपरिगतेनाव स्थितेन नवकरनिकरेण स्पष्टैर्विकसितैर्बन्धूकसूनस्तवकैर्बन्धुजीवक कुसुमगुच्छैर्विरचितं। बन्धूको बन्धुजीवकइत्यमरः। शेखरं शिखा माल्यं। शिखास्वापीडशेखराइत्यमरः। बिभ्रतीवेत्युत्प्रेक्षा न केवलमर्केणोदयाद्रिरेव बन्धूकशेखरम्बिभर्त्ति किन्तु तत्करजालेन सर्व्वेऽपि पर्व्वतास्तथेत्यर्थः ॥ ४६ ॥

उदयशिखरिशृङ्गप्राङ्गणेष्वेष रिङ्गन्
सकमलमुखहासं वीक्षितः पद्मिनीभिः ।
विततमृदुकराग्रः शब्दयन्त्या वयोभिः
परिपतति दिवोऽङ्के हेलया बालसूर्य्यः ॥ ४७ ॥

क्षणमयमुपविष्टः क्ष्मातलन्यस्तपादः
प्रणतिपरमवेक्ष्य प्रीतमह्नाय लोकम् ।
भुवनतलमशेषम्प्रत्यवेक्षिष्यमाणः
क्षितिधरतटपीठादुत्थितः सप्तसप्तिः ॥ ४८ ॥

उदयेति । एष बाल उदितमात्रः बालश्चासौ सूर्य्यश्च बालसूर्य्यः उदयशिखरिशृङ्गस्य उदयाद्रिशिखरस्य प्राङ्गणेषु रिङ्गन् सञ्चरन् पद्मिनीभिर्नलिनीभिः स्त्रीविशेषैश्च । पद्मिनी स्त्रीविशेषेऽपीति विश्वः । कमलान्येव मुखानि तेषां हासेन विकाशेन हास्येन च सह यस्मिन् कर्म्मणि तद्यथा तथा वीक्षितः सन् वयोभिः पक्षिभिः । वयः पक्षिणि बाल्यादाविति विश्वः । शब्दयन्त्याः शब्दं कुर्व्वन्त्याः आगच्छ आगच्छ वत्सेति व्याहरन्त्या इत्यर्थः । शब्द शब्दात्तत्करोतीति ण्यन्ताल्लटः शतरि ङीप् । दिवोऽन्तरिक्षस्य मातुश्चाङ्के समीपे उत्सङ्गे च विततानि प्रसृतानि मृदूनि कराग्राणि किरणाग्राणि हस्ताग्रे च यस्य स सन् हेलया लीलया परिपतति । श्लेषमूलातिशयोक्त्यनुगृहीतरूपकम् ॥ ४७ ॥

क्षणमिति । अथ सप्तसप्तिरर्कः क्षणमुपविष्टः क्षितिधरपीठमध्यासीनः क्ष्मातलन्यस्तपादः प्रणामस्वीकाराय भूतलप्रसारिताङ्घ्रिरित्यर्थः । प्रणतिपरं नमस्कारं कुर्व्वाणं प्रीतं प्रणामस्वीकारात्सन्तुष्ट

परिणतमदिराभम्भास्करेणांशुबाणै
स्तिमिरकरिघटायाः सर्व्वदिक्षु क्षतायाः ।
रुधिरमिव वहन्त्योभान्ति बालातपेन
च्छुरितमुभयरोधोवारितं वारि नद्यः ॥ ४९ ॥

लोकं जनमङ्क्षाय झटिति अवेक्ष्य । झटित्यञ्जसाङ्क्षायेत्यमरः । रूपावलोकेन सम्भाव्याशेषं भुवनतलं लोकस्वरूपं प्रत्यवेक्षिष्यमाणः अनुसन्धास्यमानः क्षितिधरस्य तटं पीठमिव सिंहासनमिव अन्यत्र तटमिव पीठं तस्मादुत्थितः उदयाद्रिमतिक्रान्तइत्यर्थः । यथा कश्चिन्महाराजः सिंहासनोपविष्टः क्षणं प्रणतजनमादृत्य अथ सकलस्वराष्ट्रप्रत्यवेक्षणाय सहसोत्थाय गच्छति तद्वदित्यर्थः । अत्र प्रकृतार्कविशेषणवैभवादप्रकृतमहाराजप्रतीतेः समासोक्तिः ॥४८॥

परिणतेति । नद्यः बालातपेन छुरितं रूषितं । अतएव परिणतमदिराभं सुपक्वसुरासन्निभं उभाभ्यां रोधोभ्यां वारित मवरुद्धं उभयरोधोवारितं । उभादुदात्तोनित्यमित्यत्र नित्यग्रहणसामर्थ्याद्वृत्तिविषये उभशब्दस्य स्थाने उभयशब्दप्रयोगइत्युक्तं प्राक् । वारि जलं भास्करेण । कस्कादित्वात्सलम् । अंशुभिरेव बाणैः सर्व्वदिक्षु क्षतायाः प्रहृतायाः तिमिरमेव करिघटा गजसङ्घः तस्यारुधिरमिवेत्युत्प्रेक्षा । वहन्त्योभान्ति ॥ ४९ ॥

दधतीति । जालवातायनेभ्यः गवाक्षविवरेभ्यः मन्दिराणा मभ्यन्तरेषु परिपतन्त्यस्तरुणतपनभासोवालार्ककिरणाः वनितानां प्रणयिषु प्रातर्गन्तुमिच्छत्सु कुपितेन मदनेन मुक्तानामुत्सृष्टाना मग्निज्वलिततेजसां नाराचानां बाणविशेषाणां लीलां शोभान्दधति ।

दधति परिपतन्त्यो जालवातायनेभ्य
स्तरुणतपनभासो मन्दिराभ्यन्तरेषु ।
प्रणयिषु वनितानामातरिच्छत्स गन्तु
ङ्कुपितमदनमुक्तोत्तप्तनाराचलीलाम् ॥ ५० ॥
अधिरजनि वधूभिः पीतमैरेयरिक्तं
कनकचषकमेतद्रोचनालोहितेन ।
उदयदहिमरोचिर्ज्योतिषाक्रान्तमन्त
र्मधुनइव तथैवापूर्णमद्यापि भाति ॥ ५१ ॥

अत्र लीलेव लीलेति सादृश्याक्षेपादसम्भवद्वस्तुसम्बन्धान्निदर्शना ॥ ५० ॥

अधीति । अधिरजनि रजन्याम् । विभक्त्यर्थेऽव्ययीभावः । वधूभिः पीतं मैरेयं मद्यं यस्य तत् अतएव रिक्तं पीतमैरेयरिक्तं एतत् कनकचषकं स्वर्णस्य पानपात्रं । अत्रयत्र षष्ठ्याविकारार्थता । चषकोऽस्त्री पानपात्रमित्यमरः । रोचनालोहितेन गोरोचनारुणेन उदयतउदीयमानस्याहिमरोचिषोऽर्कस्य ज्योतिषा तेजसा अन्तर भ्यन्तरे आक्रान्तं व्याप्तं सत् अद्यापि इदानीमपि तथैव पूर्ववदेव मधुनआपूर्णमिव । सामान्यषष्ठ्यायोग्यविशेषपर्य्यवसानर्नियमात् षष्ठी शेषइति सम्बन्धसामान्ये षष्ठी करणस्यापि कारणत्वादिति । भाति शोभते । अत्रातपाक्रान्ते मधुपूर्णत्वोत्प्रेक्षया आतपे मधुभ्रमात् भ्रान्तिमान् व्यज्यते ॥ ५१ ॥

क्षितेति । नक्तं रात्रौ शयनीये तल्पे । एकान्तमुक्तमत्यन्तत्यक्तं क्षितरुचि शुभ्रवर्णं । किन्तु दिनादौ प्रभाते दिनकरकरसङ्गेना

सितरुचि शयनीये नक्तमेकान्तमुक्ता-
न्दिनकरकरसङ्गव्यक्तकौसुम्भकान्ति।
निजमिति रतिबन्धोर्जानतीमुत्तरीय-
म्परिहसति सखी स्त्रीमाददानान्दिनादौ ॥ ५२ ॥
स्नुतमिव शिशिरांशोरंशुभिर्यन्निशासु
स्फटिकमयमराजद्राजताद्रिस्थलाभम्।
अरुणितमकठोरैर्वेश्म काश्मीरजाभः
स्नपितमिव तदेतद्भानुभिर्भाति भानोः ॥ ५३ ॥

कांशुव्यतिकरेण व्यक्ता कौसुम्भी कुसुम्भस्य रागद्रव्यस्य सम्ब-न्धिनी कान्तिर्यस्य तत्तथा भासमानं रतिबन्धोः प्रियस्योत्तरीयं निजमात्मीयमिति जानतीं अतएवाददानां स्त्रीं नायिकाम्। वामशमोरितीयङ्भावपक्षे अमि पूर्व्वदिति पूर्व्वरूपम्। सखी परिहसति। अत्राकौसुम्भे कौसुम्भभ्रमात्साहृश्यनिबन्धनाद्भ्रान्तिमद-लङ्कारः ॥ ५२ ॥

स्नुतमिति। राजताद्रिस्थलाभं सुधाधवलितत्वात्कैलासतटसन्निभं यद्वेश्म निशासु शिशिरांशोरिन्दोरंशुभिश्चन्द्रिकाभिः स्नुतं धौतं सत् स्फटिकमयं स्फटिकविकारइवाराजत् रेजे तदेतद्वेश्म भानोः सूर्य्यस्याकठोरैः कोमलैः भानुभिररुणितमरुणीकृतं सत् काश्मीर-देशे जातं काश्मीरजं कुङ्कुमन्तस्याम्भसा स्नपितं सिक्तमिव भाति। उत्प्रेक्षयोः संसृष्टिः ॥ ५३ ॥

सरमिति। प्रणयिनि योषितां मरमनखपदानामार्द्रनखक्षता-नामन्तर्मध्ये दष्टानां लग्नानां केशानां शिरोरुहाणां प्रमोकं प्रमो

सरसनखपदान्तर्दष्टकेशप्रमोक्ष
प्रणयिनि विदधाने योषितामुज्ज्वलत्यः।
विदधति दशनानां सीत्कृताविष्कृताना
मभिनवरविभासः पद्मरागानुकारम् ॥ ५४ ॥
अविरतदयिताङ्गासङ्गसञ्चारितेन
च्छुरितमभिनवास्टक्कान्तिना कुङ्कुमेन।
कनकनिकषरेखाकोमलं कामिनीना
म्भवति वपुरवाप्तच्छायमेवातपेऽपि ॥ ५५ ॥

चनं विदधाने सति सीत्कृतैर्व्यथाविर्भूतसीत्कारैराविष्कृतानां दशनानामुज्ज्वलन्त्यः वैमल्याद्दन्तेषु प्रतिफलन्त्यः अभिनवरविभासः पद्मरागाणामनुकारमनुकरणं विदधति। उपमालङ्कारः रवि भासामारुण्यप्रतिपादकाभिनवविशेषणप्रसादलब्धइति काव्यलिङ्गेन सङ्करः ॥ ५४ ॥

अविरतेति। अविरतेनाविच्छिन्नेन दयितानां प्रेयसा मङ्गस्य आसङ्गेन शरीरसम्पर्केण सञ्चारितेन सङ्क्रामितेनाभिनवस्या स्टजोरक्तस्येव कान्तिर्यस्य तेन कुङ्कुमेन छुरितं कनकस्य या निकषे निकषोपले रेखा राजिस्तद्वत्कोमलं मनोहरमित्युपमा। कामिनीनां वपुरातपेऽपि अवाप्तच्छायं लब्धवर्णोत्कर्षमेव भवति स्वतः सुवर्णवर्णस्य ततः कुङ्कुमाङ्कितस्य कामिनीगात्रस्य पुनर्बालातपव्याप्तिरिति महती वर्णोत्कर्षसामग्रीति भावः। आतपे छाया मातपइति विरोधाभासे अपिशब्दः। छाया त्वनातपे कान्ता विल्यमरः। अत्र सङ्क्रान्तकुङ्कुमच्छुरितत्वकनकनिकषरेखाकोमल

सरसिजवनकान्तम्बिभ्रदभ्रान्तवृत्तिः
करनयनसहस्रं हेतुमालोकशक्तेः।
अखिलमतिमहिम्ना लोकमाक्रान्तवन्तं
हरिरिव हरिदश्वः साधु वृत्रं हिनस्ति ॥ ५६ ॥

तयोरुपमापेक्षया छायावाप्तिहेतुत्वादुपमासङ्कीर्णं काव्यलिङ्गं तदातपेऽप्यवाप्तच्छायमित्यत्र विरोधेन एकवाचकानुप्रवेशेन सङ्कीर्य्यते ॥ ५५ ॥

सरसीति । सरसिजातानि सरसिजानि । सप्तम्या जनेर्डः । तत्पुरुषे कृतिबहुलमित्यलुक् । तद्वनस्य कान्तं प्रियम् । अन्यत्र तद्वत्कान्तं रम्यं आलोकशक्तेर्लोकलोचनानां विषयग्रहणशक्तेर्हेतुं आलोकान्तरसहकृतानामेव तेषां तत्सामर्थ्यात्। अन्यत्र आलोकशक्तेर्दर्शनव्यापारस्य हेतुं दर्शनसाधनमित्यर्थः। करानयनानीव अन्यत्र करादव नयनानि तेषां सहस्रं करनयनसहस्रं बिभ्रत् अभ्रान्ते नभोमध्ये वृत्तिर्यस्य सोऽभ्रान्तवृत्तिः अन्यत्राभ्रान्ते मेघे वृत्तिर्यस्य सः मेघवाहनइत्यर्थः । अभ्रन्नभः स्वर्गवलाहकेष्विति विश्वः । हरितोऽश्वायस्य स हरिदश्वोऽर्कः हरिरिन्द्रइवाति महिम्ना अतिमहत्तया स्वतेजसेत्यर्थः। लोकमाक्रान्तवन्तं व्याप्तवन्तं एकत्र प्रत्यक्षादन्यत्र स इषुमात्रमिषुमात्रं विश्वमवर्द्धत स इमान् लोकानावृणोदित्यागमादिति भावः । वृत्रं ध्वान्तं दानवं च त्वाष्ट्रं साधु हिनस्ति हन्ति । ध्वान्तारिदानवा वृत्रा इत्यमरः । उपमा श्लेषोवा मतभेदात् ॥ ५६ ॥

अवतमसेति । अवतमसन्तिमिरं । अवसमन्धेभ्यस्तमसइति समासान्तः। यद्यपि क्षीणेऽवतमसन्तमइत्युक्तं तथापीह विरोधादि

अवतमसभिदायै भास्वताभ्युद्गतेन
प्रसभमुडुगणोऽसौ दर्शनीयोऽप्यपास्तः ।
निरसितुमरिमिच्छोर्ये तदीयाश्रयेण
श्रियमधिगतवन्तस्तेऽपि हन्तव्यपक्षे ॥ ५७ ॥

प्रतिफलति करौघे सम्मुखावस्थितायां
रजतकटकभित्तौ सान्द्रचन्द्रांशुगौर्य्याम् ।
बहिरभिहतमद्रेः संहतङ्कन्दरान्त
र्गतमपि तिमिरौघङ्घर्म्मभानुर्भिनत्ति ॥ ५८ ॥

शेषानादरेण सामान्यमेव ग्राह्यन्तस्य भिदायै भेदाय । षिद्भिदा दिभ्योऽङ् । अभ्युद्गतेनाभ्युदितेनोद्यतेन च भास्वता सूर्य्येण दर्शनीयोऽप्युडुगणोऽसौ प्रसभं बलात् अपास्तः तथाहि अरिं निरसितुमिच्छोर्ये तदीयेनाश्रयेणाश्रयणेन श्रियं सम्पदं शोभाञ्च । शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरपि गद्यतइति विश्वः । अधिगतवन्तः प्राप्तवन्तस्तेऽपि हन्तव्यपक्षे बध्यकोटावेव अरिवदरिपक्षा अपि बध्या एवेत्यर्थः । उडुगणोऽपि तमसि शोभते अतस्तत्पक्षइति भावः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५७ ॥

प्रतीति । घर्म्मभानुरुष्णांशुः सम्मुखावस्थितायां सान्द्रचन्द्रांशुवद्गौर्य्यां धवलायामित्युपमा । षिद्गौरादिभ्यश्चेति ङीप् । रजतकटकमेव भित्तिस्तस्यां करौघे स्वकिरणजाले प्रतिफलति सति अद्रेर्बहिरभिहतं कन्दराणां दरीणां अन्तर्गतं संहतं तिमिरौघमपि भिनत्ति पुरोगतरजतभित्तिप्रतिहतस्य निजतेजसः कन्दरान्तःप्रवेशादिति भावः । अत्र करौघस्यान्तःसम्बन्धाभावेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ ५८ ॥

वहिरपि विलसन्त्यः काममानिन्यिरे य
द्दिवसकररुचोऽन्तं ध्वान्तमन्तर्गृहेषु ।
नियतविषयवृत्तेरप्यनल्पप्रताप
क्षतसकलविपक्षस्तेजसः स स्वभावः ॥ ५९ ॥
चिरमतिरसलौल्याद्बन्धनं लम्भितानां
पुनरयमुदयाय प्राप्य धाम स्वमेव ।
दलितदलकपाटः षट्पदानां सरोजे
सरभस इव गुप्तिस्फोटमर्कः करोति ॥ ६० ॥

वहिरिति । बहिर्विलसन्त्योऽपि दिवसकररुचोऽर्कभासः अन्तर्गृहेषु गर्भागारेषु कामं यथेष्टं ध्वान्तमन्तं नाशमानिन्यिरे प्रापयामासुरिति यत् । नयतेर्द्विकर्मकात्कर्त्तरि लिट् । सोऽन्तर्गृहध्वान्तनिरासो नियतविषये नियतस्थाने वृत्तिर्यस्य तस्य नियतदेशवर्त्तिनोऽपीत्यर्थः । तृतीयादिष्विति पुंवद्भावः । तेजसोऽनल्पेन प्रतापेन स्वप्रकाशेन स्वप्रभावेनैवेत्यर्थः । प्रतापौ पौरुषातपाविति वैजयन्ती । क्षतसकलविपक्षः निरस्तसमस्तप्रतिपक्षः । स्वभावः तेजस्विनामेष स्वभावो यत्प्रतापेनैव परोच्छेदनमतो युक्तमर्कभासामप्यन्तर्ध्वान्तहरणमित्यर्थः । अत्र समर्थ्यसमर्थकयोः सामान्यविशेषभावादर्थान्तरन्यासः ॥ ५९ ॥

चिरमिति । अयमर्कः पुनर्भूयोऽपि उदयाय स्ववृद्धये स्वं स्वकीयमेव धाम स्थानं तेजो वा प्राप्य अतिरसलौल्यादतिमात्ररसेषु मकरन्देषु विषयेषु च लौल्यादासक्तेः सरोजे चिरं बन्धनं लम्भितानां प्रापितानां षट्पदानां सरभसः सत्वरो दलितं

युगपदयुगसप्तिस्तुल्यसङ्ख्यैर्मयूखै-
र्दशशतदलभेदङ्कौतुकेनाशु कृत्वा ।
श्रियमलिकुलगीतैर्लालिताम्पङ्कजान्त-
र्भवनमधिशयानामादरात्पश्यतीव ॥ ६१ ॥
उदयमिव कराग्रैरेष निष्पीड्य सद्यः
शशधरमहरादौ रागवानुष्णरश्मिः ।
अवकिरति नितान्तङ्कान्तिनिर्यासमच्छ-
स्तनवजलपाण्डुम्पुण्डरीकोदरेषु ॥ ६२ ॥

विघट्टितं दलमेव कपाटं येन स सन् गुप्तिस्फोटं बन्धनमोचं करोतीवेत्युत्प्रेक्षा यथा कश्चित्पदभ्रष्टः पुनर्लब्धपदः पूर्ववदात्मबन्धूनागत्य स्वयमेव काराकपाटमुद्घाट्य मोचयति तद्वदिति भावः ॥ ६० ॥

युगपदिति । अयुगा विषमाः सप्तयोऽश्वा यस्य सः अयुगसप्तिः सप्ताश्वोऽर्कः युगशब्दस्य युग्मशब्दस्य च विशेष्यलिङ्गता वगन्तव्या । युगपदेकदैव तुल्यसङ्ख्यैः सहस्रसङ्ख्यैरित्यर्थः मयूखैः करैः दश शतानि येषान्तानि दशशतानि सहस्रमित्यर्थः । तेषान्दलानां भेदं विघट्टनं कौतुकेनाशु कृत्वा अलिकुलस्य गीतैर्लालितां सत्कृतां पङ्कजमेवान्तर्भवनं गर्भगृहं अधिशयानां । अधिशीङ् स्थासां कर्मेति कर्मत्वम् । श्रियमादरात्पश्यतीवेत्युत्प्रेक्षा कश्चित्कान्तः कान्तामिवैकान्तगतामिति भावः ॥ ६१ ॥

उदयमिति । अहरादौ प्रभाते रागवानुदयरागवान् पुण्डरीकपक्षे रक्तांशुश्चैवमुष्णरश्मिरर्कः शशधरं चन्द्रं कराग्रैः रश्म्यग्रैः

प्रविकसति चिराय द्योतिताशेषलोके
दशशतकरमूर्त्तावच्छिणीव द्वितीये।
सितकरवपुषासौ लक्ष्यते सम्प्रति द्यौ
र्विगलितकिरणेन व्यङ्गितैकेक्षणेव ॥ ६३ ॥

हस्ताग्रैस्तु अदयं निर्दयं सद्योनिष्पीड्य अब्दात् मेघात् लुप्तं स्वच्छं नवजलमिव पाण्डुं शुभ्रकान्तिनिर्यासं लावण्यसारं पुण्डरीकाणां सिताब्जानामुदरेष्वभ्यन्तरेषु नितान्तमवकिरतीव विक्षिपतीव । अत्र सूर्य्योदये चन्द्रस्य कान्तिक्षयात्पुण्डरीकाणाञ्चप्रादुर्भावाच्च सूर्य्यस्याग्रीमेव कान्तिं पुण्डरीकव्याजात्परेषु क्षिपतीत्युत्प्रेक्षा । यथा द्विषन्तं प्रपीड्य तदीयं वसुसारं सुहृदे प्रयच्छति तद्व दिति भावः ॥ ६२ ॥

प्रविकसतीति । द्योतितः प्रकाशितोऽशेषलोकोयेन तस्मिन् दश शतानि येषान्ते दशशतास्ते करायस्याः सा दशशतकरा सहस्र करा मूर्त्तिर्यस्य तस्मिन्दशशतकरमूर्त्तौ सूर्य्ये द्वितीयेऽक्षिणि चक्षु षीव चिराय प्रविकसति सति सम्प्रत्यसौ द्यौराकाशं स्त्री च गम्यते विगलितकिरणेन निष्प्रकाशेन सितकरं शुभ्रकिरणं वपु र्यस्य तेन सितकरवपुषा चन्द्रेण व्यङ्गितं विकलीकृतमेकेक्षणमेक मेवं यस्याः सा व्यङ्गितैकेक्षणा काणेव लक्ष्यते अत्र दिवः काणत्व मुत्प्रेक्ष्यते । तच्च काणत्वमक्षित्वेनाध्यवसितेन निष्प्रकाशितेन चन्द्रे णेति । तत्र येनाङ्गविकारइति तृतीया ॥ ६३ ॥

कुमुदेति । कुमुदवनं अपगता श्रीर्यस्य तदपश्रि विगतशोभं । गोऽस्त्रियोरुपसर्ज्जनस्येति ह्रस्वत्वम् । अम्भोजषण्डं श्रीमत्

कुमुदवनमपश्रि श्रीमदम्भोजषण्ड
न्त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः।
उदयमहिमरश्मिर्याति शीतांशुरस्तं
हतविधिलसितानां ही विचित्रो विपाकः ॥६४॥

क्षणमतुहिनधाम्नि प्रोष्य भूयः पुरस्ता
दुपगतवति पाणिग्राहवद्दिग्वधूनाम्।
द्रुततरमुपयाति स्रंसमानांशुकोऽसा
वुपपतिरिव नीचैः पश्चिमान्तेन चन्द्रः ॥६५॥

शोभायुक्तं उलूकः पेचको मुदं त्यजति तस्य दिवाभीतत्वादिति भावः। चक्रवाकः प्रीतिमान् रजनीविरहाभावत्वात्तस्येति भावः। अहिमरश्मिरुष्णांशुरुदयं याति हिमांशुरिन्दुरस्तमदर्शनं याति अस्तमित्यव्ययं कथमेतद्वैषम्यमत्राह। हतेति। हतविधिलसितानां दुष्टदैवचेष्टितानां विपाकः परिपाकः तत्तत्प्राणिकर्मानुरूपफलदानप्रकार इति यावत् विचित्रो विविधः अनेकविध इत्यर्थः। हीति विस्मये अहो ही च विस्मये इत्यमरः। विधिविपाकवैचित्र्याज्जगद्वैचित्र्यं युज्यते इति कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ६४ ॥

क्षणमिति। अतुहिनधाम्नि उष्णांशौ दिक्षोषध्वद्वेत्युपमितसमासः। तासान्दिग्वधूनां पाणिं गृह्णातीति पाणिग्राहो निजभर्त्तेरिव पाणिग्राहवत्। तत्र तस्येवेति तत्रार्थे वतिः। क्षणम्प्रोष्य प्रवासं कृत्वा। प्रपूर्वाद्वसधातोः क्त्वा तस्य समासे नञ्पूर्वे क्त्वोल्यप् वचिस्वपीत्यादिना सम्प्रसारणम्। भूयः पुनरपि पुरस्तात्पूर्व

प्रलयमखिलतारालोकमह्नाय नीत्वा
श्रियमनतिशयश्रीः सानुरागां दधानः ।
गगनसलिलराशिं रात्रिकल्पावसाने
मधुरिपुरिव भास्वानेष एकोऽधिशेते ॥ ६६ ॥

स्वां दिशि मार्गं चोपगतवत्यागतवति सति शशी चन्द्र उपपति र्जार इव । जारस्तूपपतिः समावित्यमरः । स्वंसमानां शशाङ्को गलद्रश्मिकः । शैषिकः कप्प्रत्ययः । स्रस्तवस्त्रश्च नीचैर्मन्दः सन्पश्चिमान्तेन पश्चिमदिक्कोणेन केनचिदपरद्वारेण द्रुततरम पयात्यपसरति यथा पूर्व्वद्वारेण निजपतावागते पश्चान्मानिनी उपपतिरपसरति तद्वदित्यर्थः उपमालङ्कारः ॥ ६५ ॥

प्रलयमिति । अखिलस्तारालोको लोकइव तारागणं तम खिलं तारालोकमह्नाय द्राक् प्रलयं क्षयं नीत्वा अतएव यतो नास्त्यतिशयं सा अनतिशया सर्वातिशायिनी श्रीर्महिमा यस्य सोऽनतिशयश्रीः सानुरागामुदयरागवतीं श्रियं शोभामन्यत्र सानुरागामनुरागवतीं श्रियं रमाञ्च दधानः एष भास्वानेको मधुरिपुर्विष्णुरिव रात्रि कल्पावसानं कल्पान्तइव तस्मिन् रात्रि कल्पावसाने गगनं सलिलराशिरिव तङ्गगनसलिलराशिमधिशेते ऽधितिष्ठति। अत्र मधुरिपुरिवेति वाक्यगतोपमैव समासगतोपमानां प्रसाधिकेति सर्व्वोपमितसमासाश्रयणमेवोचितम् ॥ ६६ ॥

कृतेति । कृतसकलजगद्विबोधः कृताखिलजगत्प्रबोधः अवधूतो विक्षिप्तोऽन्धकारस्तोदयतङ्क्षणं येन सोऽवधूतान्धकारोदयऽरति महागुणोक्तिः । दोषमाह चयिता नाशिता कुमुदानां तारकाणां च

कृतसकलजगद्विबोधोऽवधूतान्धकारोदयः
क्षयितकुमुदतारकश्रीर्वियोगन्नयन् कामिनः ।
बहुतरगुणदर्शनादभ्युपेताल्पदोषः कृती
तव वरद करोतु सुप्रातमह्नामयन्नायकः ॥६७॥

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
प्रत्यूषवर्णनोनामैकादशः सर्गः ॥ ११ ॥

श्रीर्येन सः कामिनः स्त्रीपुंसान्वियोगन्नयन्प्रापयन् तथापि बहुतरगुणस्य पूर्वोक्तमहागुणस्य दर्शनादभ्युपेतोलोकैरङ्गीकृतोऽल्पदोषः पूर्वोक्तएव यस्य सः । एकोहि दोषोगुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कइति न्यायादिति भावः । अतएव कृती कृतार्थोऽयमह्नान्नायकः प्रभुः सूर्य्यः हे वरद कामद तव सुप्रातं सुप्रभातं करोतु । आशिषि लिङ्लोटावित्याशीरर्थे लोट् । शोभनं प्रातर्यस्येति सुप्रातः शोभनप्रातवानुच्यते । सुप्रातसुश्वेत्यादिबहुव्रीहावच्प्रत्ययान्तोनिपातितः । अत्र भावप्रधानो निर्देशः तव सुप्रातं सुप्रभातत्वं करोत्वित्यर्थः । महामालिनीवृत्तमेतत् यदिह न युगलं ततोवेदरेफैर्महामालिनीति लक्षणात् ॥६७॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघकाव्यव्याख्याने सर्वङ्कषाख्ये एकादशः सर्गः ॥ ११ ॥

इत्थं रथाश्वेभनिषादिनां प्रगे
गणो नृपाणामथ तोरणाद्बहिः ।
प्रस्थानकालक्षमवेषकल्पना
कृतक्षणक्षेपमुदैक्षताच्युतम् ॥ १ ॥

एवम्प्रभातं वर्णयित्वा भगवतः प्राभातिकप्रस्थानवर्णनाय प्रक्रमते । इत्थमिति । इत्थम्भूते पूर्व्वसर्ग्गोक्तविधे इत्यर्थः । प्रगे प्रातःकाले । सायं साये प्रगे प्रातरित्यव्ययेष्वमरः । अथ सूर्य्योदयानन्तरं रथाश्वेभे निषीदन्तीति रथाश्वेभनिषादिनां रथेषु अश्वेषु इभेषु च स्थितानामित्यर्थः । नृपाणां गणः तोरणाद्भगवतः वाह्यद्वाराद्बहिः । अपपरिवहिरञ्चवः पञ्चम्येति पञ्चमीसमास विधानात् ज्ञापकात्पञ्चमी । तोरणोऽस्त्री वहिर्द्वारमित्यमरः । प्रस्थानकाले प्रयाणकाले क्षमउचितोवेषः आकल्पः । आकल्प वेषौ नेपथ्यमित्यमरः । तस्य कल्पनया सम्पादनेन कृतः क्षणक्षेपः क्षणविलम्बोयेन तमच्युतं हरिमुदैक्षत प्रतीक्षितवानित्यर्थः । अत्राच्युतविलम्बस्य विशेषणगत्या प्रतीक्षणहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गमलङ्कारः । अस्मिन्सर्ग्गे विषमपादयोर्जागतमिन्द्रवंशावृत्तम् । स्यादिन्द्रवंशा ततजैरसंयुतैरिति लक्षणात् । समपादयोस्तु जागतमेव वंशस्थं वृत्तम् । जतौ तु वंशस्थमुदीरितं जराविति लक्षणात् । तदेवमुभयमेलनादुपजातिभेदोऽयम् । अतएव त्रिष्टुभिन्द्रवज्रोपेन्द्रवज्रालक्षणानन्तरं अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताइत्युक्त्वोक्तं इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नामेति ॥ १ ॥

स्वक्षं सुपत्त्रं कनकोज्ज्वलद्युति
जवेन नागान् जितवन्तमुच्चकैः ।
आरुह्य तार्क्ष्यं नभसीव भूतले
ययावनुद्घातसुखेन सोऽध्वना ॥ २ ॥

स्वक्षमिति । स हरिः शोभनोऽक्षः स्कन्धधारणदारुभेदो यस्य तं स्वक्षम् । स्यादक्षः स्कन्धधारणे इति वैजयन्ती । अन्यत्र शोभनेन्द्रियम् । अथाक्षमिन्द्रिये इत्यमरः । सुपत्त्रं शोभनं पत्त्रं वाहनं यस्य तं स्वश्वमित्यर्थः अन्यत्र सुपक्षं । पत्त्रं वाहनपक्षयोरित्यमरः । कनकोज्ज्वलद्युतिं कनकरचनावत्त्वं अन्यत्र कनकवदुज्ज्वलद्युतिं कनकवर्णं । जवेन नागान् गजान् उरगांश्च जितवन्तस्ततोऽधिकवेगमित्यर्थः । अन्यत्र नागान्तकमित्यर्थः उच्चकैरुन्नतं तार्क्ष्यं रथं गरुडं च । तार्क्ष्यः स्यादश्वकर्णाख्यवृक्षे रथतुरङ्गयोः तार्क्ष्यं रसाञ्जने तार्क्ष्यो गरुडे गरुडाग्रज इति विश्वः । आरुह्य नभसीव भूतले अनुद्घातेनाप्रतिघातेन सुखः सुगमः तेनाध्वना ययौ । गरुडमारुह्य नभसीव रथमारुह्य भूतलेऽप्यप्रतिहतं ययौ गरुडवदेव तद्रथस्यापि सर्वत्राप्रतिहतगतित्वादित्यर्थः । नायं श्लेषः प्रकृताप्रकृतवादेऽपि तार्क्ष्यमिति विशेष्यश्लेषायोगादन्यत्राप्रसक्तश्च श्लेषसङ्कीर्णेयमुपमा ॥ २ ॥

हस्तेति । अत्र त्रिविशेषणानि शार्ङ्गिण्यपि विभक्तिविपरिणामेन योज्यानि । हस्तस्थितैरखण्डितैश्चक्रैश्चक्ररेखाभिः शालन्त इति तथोक्ताः । अन्यत्र चक्रं सुदर्शनं तच्छालिनं द्विजेन्द्रकान्ताः ब्राह्मणोत्तमप्रियाः अन्यत्र द्विजेन्द्रश्चन्द्रः । तस्मात्सोमराजानो ब्राह्मणाः

हस्तस्थिताखण्डितचक्रशालिनं
द्विजेन्द्रकान्तं श्रितवक्षसं श्रिया।
सत्यानुरक्तं नरकस्य जिष्णवो
गुणैर्नृपाः शार्ङ्गिणमन्वयासिषुः॥ ३ ॥

शुक्लैः सतारैर्मुकुलीकृतैः स्थूलैः
कुमुद्वतीनां कुमुदाकरैरिव।
व्युष्टिप्रयाणञ्च वियोगवेदना
विदूननारीकमभूत्समन्तदा॥ ४ ॥

इति श्रुतेः। अतएव द्विजराजः शशधर इत्यमरः। तद्वत्कान्तं सुन्दरं श्रिया शोभया श्रितवक्षसोव्याभोरस्काः। अन्यच रमया धिष्ठितोरस्कं सत्ये सत्यवचनेऽनुरक्ताः। अन्यच सत्यायां सत्यभामायामनुरक्तम्। नरकस्य जिष्णवः अन्यत्र नरकासुरस्य जेतारम्। ग्लाजिस्थश्चेति ग्स्नुच्। नरकोनिरये दैत्ये इति विश्वः। एवं भूतान्नृपाएवम्भूतं शार्ङ्गिणं गुणैर्विनयादिभिर्हेतुना अन्वयासिषुः अनुजग्मुः गुणैः पूर्व्वोक्तैरन्यकार्षुश्च। यातेर्लुङि स्नेः सिच् अत्र शार्ङ्गिणोन्नृपाणाञ्च प्रकृतत्वात् शब्दमात्रसाधर्म्याच्च केवलः प्रकृतिविषयः श्लेषः॥ ३ ॥

शुक्लैरिति। शुक्लैः शुभ्रैः सतारैः सरत्नकैः सकर्णिकैश्च मुकुलीकृतैर्वहनसौकर्याय सङ्कोचितैः अन्यत्र रात्रिविकाशित्वान्मुकुलतां नीतैः प्राप्तैः स्थूलैर्दीर्घैः पटमण्डपैरिति यावत्। कुमुदाकरैः कुमुदह्रदैरिवोपलक्षिता अन्यत्र स्थूलैरिव कुमुद्

उत्क्षिप्तगात्रः स्म विडम्बयन्नभः
समुत्पतिष्यन्तमगेन्द्रमुच्चकैः ।
आकुञ्चितप्रोहनिरूपितक्रमं
करेणुरारोहयते निषादिनम् ॥ ५ ॥

करैरुपलक्षितं वियोगवेदनया विरहव्यथया विदूना: परितप्ता: । ल्वादिभ्य इति निष्ठानत्वम् । तासामेषामिन्नास्तयोक्तं द्वयोरपि वियोगकालत्वादिति भाव: । नद्यृतश्चेति कप् । कुमुदान्यासु सन्तीति कुमुद्वत्य: कुमुदप्राया: भूमय: । कुमुद्वान् कुमुदप्राय इत्यमर: । कैरविण्योवा कुमुद्वती कैरविण्यामिति विश्व: । कुमुदनडवेतसेभ्यो ड्मतुबिति ड्मतुप्प्रत्यय: मादुपधाया इति मकारस्य वत्वम् । तासां कुमुद्वतीनां सम्बन्धे व्युष्टप्रभातम् । व्युष्टप्रभातं प्रत्यूषमित्यभिधानचिन्तामणि: । तत्र किञ्चित्कर त्वात्तत्सम्बन्धित्वं प्रयाणं च सेनानामिति शेष: । तदा तस्मिन् काले समसुकरीत्या अन्योन्यसङ्गममभूत् । व्युष्टप्रयाणयोर्द्वित्वेऽपि समुदायविवक्षायामभूदित्येकवचनं व्युष्टं प्रयाणं च द्वयमपि सममभूदित्यर्थः । अत्र वर्णनेन प्रकृतस्य प्रयाणस्य प्रकृतव्युष्ट सम्बोधेनोपमा श्लेषसङ्कीर्णा ॥ ४ ॥

उत्क्षिप्तेति । उत्क्षिप्तगात्र उन्नमितपूर्वकाय: अतएव नभ: समुत्पतिष्यन्तं उत्पतनायुक्तं अगेन्द्रं महाद्रिं विडम्बयन्ननुकुर्वन्नित्युत्प्रेक्षा । अभूतोपमेति केचित् उच्चकैरुन्नत: करेणुरिभ: करेणुरिभ्यां स्त्री नेभे इत्यमर: । आकुञ्चितोनमितप्रोह: गण्डाङ्घ्रि: । अगाङ्घ्रिप्रोह इति विश्व: । तत्र रूपितक्रमं कृत

स्वैरं कृतास्फालनलालितान्पुरः
स्फुरत्तनून्दर्शितलाघवक्रियाः।
वल्गाविलग्नैकसवल्गपाणय
स्तुरङ्गमानारुरुहुस्तुरङ्गिणः ॥ ६ ॥

पादन्यासन्निषादिनं यन्तारं आरोहयते स्म स्वयमेव स्वात्मन्या रोपययीत्यर्थः । रोहेर्गत्यर्थत्वाद्गतिबुद्धीत्यादिना अणिकर्त्तुर्नि षादिनः कर्म्मत्वम् । अत्र कर्त्रभिप्राये णिचस्तेत्यात्मनेपदे सिद्धेऽपि प्रयोगवैचित्र्यस्याप्यलङ्कारत्वादकर्त्रभिप्रायेऽपि णेरणौ यत्कर्म्मणौ चेत्सकर्त्ता नाध्याने इति आत्मनेपदं वदन्ति अणिकर्म्मणः करणो रेवाच एव कर्त्तृत्वात्तस्यैव चार्थात्कर्मत्वादिति । ननु यत्तस्यैवमन्य कर्मार्थमित्युक्तं तेन कर्म्ममात्रनिषेधात्कथं निषादिनि कर्म्मण्यात्मने पदं सत्यं अन्येषां मतं भाष्यकारस्य तु दर्शयते भवयाम् राजेत्यु दाहरणादणि कर्त्तृकर्म्मव्यतिरिक्तकर्म्मण एव निषेधो विवक्षितइति कैयटः तदेतत्सम्यग्विवेचितमस्माभिः किरातार्जुनीयटीकायां घण्टापथे स मन्ततं दर्शयते गतस्य यदृत्यच । स्वभावोक्तिः ॥ ५ ॥

स्वैरमिति । तुरङ्गिणोऽश्वारोहाः पुरः पूर्व्वं स्वैरं मन्दं कृतं यदास्फालनं पाणितलेनाङ्गसंघट्टनं तेन लालितान् पालितान् त्याजितादेगानित्यर्थः अतएव स्फुरत्तनून् कम्पितदेहान् तुरङ्ग मानश्वान्दर्शितं लाघवं शैघ्र्यं यासु ताः क्रियाः उत्पतनकर्म्माणि येषान्ते वल्गः पल्याणकोटिः । वल्गः पल्याणभागे स्यादिति विश्वः । तत्र विलग्नः सक्त एकएकैकः सवल्गोमुखरज्जुसहितः पाणिर्येषान्ते तथोक्ताः सन्तः आरुरुहुरारूढाः । स्वभावोक्तिः ॥ ६ ॥

अज्ञाय यावन्न चकार भूयसे
निषेदिवानासनबन्धमध्वने।
तीक्ष्णोत्थितास्तावदसह्यरंहसो
विशृङ्खलं शृङ्खलकाः प्रतस्थिरे॥ ७॥

गण्डोज्ज्वलामुज्ज्वलनाभिचक्रया
विराजमानां नवयोदरश्रिया।
कश्चित्सुखम्प्राप्तमनाः सुसारथी
रथीं युयोजाविधुरां वधूमिव॥ ८॥

अज्ञायेति। निषेदिवानुपविष्टः निषादीति शेषः। भाषायां सदवसश्रुव इति क्वसुप्रत्ययः। भूयसे दवीयसे अध्वने भूयांसमध्वानं गन्तुमित्यर्थः। क्रियार्थोपपदस्येति चतुर्थी। अज्ञाय झटिति। द्राक् झटित्यञ्जसाह्नायेत्यमरः। यावदासनबन्धं दूराध्वगमनौपयिकमासनविशेषं न चकार तावत् तीक्ष्णं शीघ्रं उत्थिताः असह्यरंहसोऽसह्यवेगाः शृङ्खलकाः करभाख्योष्ट्रभेदाः। करभाः स्युः शृङ्खलकादारवैः पादबन्धनैरित्यमरः। विशृङ्खलमनर्गलं प्रतस्थिरे प्रस्थिताः। समवप्रविभ्यः स्थ इति आत्मनेपदम्। एषापि स्वभावोक्तिः॥ ७॥

गण्डेति। सुखमक्लिष्टं यथा तथा प्राप्तमुन्नं मनो यस्य स प्राप्तमनाः अन्यत्र सुखमानन्दं लब्धुकामः। तुङ्काममनसोरपीति मकारलोपः। शोभनः सारथिर्यस्य स सुसारथिः अन्यत्र सुसहायवान्। कश्चिद्रथोऽपि रथी कामी च गण्डैश्चिह्नैः उज्ज्वलामन्यत्र

उत्थातुमिच्छन् विधृतः पुरोबला
न्निधीयमाने भरभाजि यन्त्रके।
अर्द्धाञ्झितोद्गारविसृमरस्वरः
स्वनाम निन्ये रवणः स्फुटार्थताम ॥ ९ ॥

कपोलोज्ज्वलां। गण्डः कपोले चिह्ने चेति विश्वः। उज्ज्वलौ नाभिविलमध्यं ययोस्ते चक्रे रथायस्यास्तयोज्ज्वलनाभिचक्रया अन्यत्रोज्ज्वलं नाभिचक्रं नाभिमण्डलं यस्यास्तया। नाभिः प्राण्यङ्गके चैवे चक्राङ्गचक्रवर्त्तिनोरिति विश्वः। नवया प्रत्यग्रथा उदुन्नता अरा स्तक्रशलाकाः। अरः शीघ्रे च चक्राङ्ग इति विश्वः। तेषां श्रिया अन्यत्र उदरस्य मध्यस्य श्रिया शोभया विराजमानां विगताधूरयं यस्याः सा विधुरा। धूः स्त्री क्लीवे यानमुखमित्यमरः। ऋक्पूरित्यादिना समासान्तः। सा न भवतीत्यविधुरा तां सधुरामित्यर्थः। अन्यत्राविधुरामविकलां रथीं शकटीम्। बह्वादिभ्यश्चेति विकल्पेन ङीष्। वधूमिव युयोज योजयामास। अत्र शब्दमात्रसाधर्म्यात्सभङ्गाभङ्गपदमिश्रणादुभयगोचरत्वाच्च प्रकृताप्रकृतगोचरागोचरः शब्दार्थश्लेषः ॥ ८ ॥

उत्थातुमिति। रौतीति रवणः उष्ट्रः। चलशब्दार्थादकर्मकाद्युजिति युच्प्रत्ययः। भारारोपणाय यन्त्ररूपेण निर्मिते भरभाजि भारयुक्ते यन्त्रके गोण्यादौ निधीयमाने सति बलादुत्थातुमिच्छन् उत्थाय गन्तुमिच्छन् अतएव पुरोमुखभागे विधृतः गृहीतः एवं सैरचारव्याघाततः। अर्द्धोज्झितोद्गार एव सजम्बपिचुमर्द्दादिपत्ररसनेन विसृमरो विसृमरः स्वरोयस्य

नस्यागृहीतोऽपि धुवन्विषाणयो
र्युगं ससूत्कारविवर्त्तितत्रिकः ।
गोणीञ्जनेन स्म निधातुमुद्धृता
मनुक्षणं नोक्षतरः प्रतीच्छति ॥ १० ॥

नानाविधाविष्कृतसामजस्वरः
सहस्रवर्त्मा चपलैर्दुरध्ययः ।
गान्धर्वभूयिष्ठतया समानतां
स सामवेदस्य दधौ बलोदधिः ॥ ११ ॥

स रवणः उष्ट्रः स्वनामस्फुटार्थतां निन्ये । रौतीति रवण इति व्युत्पन्नं स्वनाम यथार्थमकरोदित्यर्थः ॥ ८ ॥

नस्येति । नस्या नासिकायानसादेशः नासिकाभवा नस्या । दिगादित्वाद्यत् । तस्यां नासिकाप्रोतरज्ज्वां गृहीतोऽपि विषाणयो र्युगं धुवन् विधुन्वन् श्टङ्गद्वयं कम्पयन् ससूत्कारेति सूत्कार इति शब्दानुकरणं अमर्षजः शब्दनिश्वासोवा ससूत्कारं यथा तथा विवर्त्तितं त्रिकं पृष्ठवंशाधरसन्धिर्येन । पृष्ठवंशाधरे त्रिक मित्यमरः । उक्षतरोमहोक्षः पृष्ठे निधातुञ्जनेनानुक्षणमुद्धृतां गोणीं न प्रतीच्छति स्म न स्वीकृतवान् निधातुमवसरं न दत्तवा नित्यर्थः ॥ १० ॥

नानेति । सामजाः गजाः । सामजौ गजसामर्थाविति शाश्वतः । नानाविधमाविष्कृताः सामजानां स्वराः ध्वनयो बृंहितानि यस्मिन् सः सहस्रवर्त्मा बहुभिर्मार्गैर्गच्छन् । गान्धर्वाइति गान्धर्वाः अश्वाः । वाजिवाहार्वगान्धर्वेत्यमरः । तैर्भूयिष्ठतया चपलैरस्थिरैः ।

प्रत्यन्यनागञ्चलितस्त्वरावता
निरस्य कुण्ठं दधताऽन्यमङ्कुशम् ।
मूर्द्धानमूर्द्ध्वायतदन्तमण्डलं
धुवन्नरोधि द्विरदो निषादिना ॥ १२ ॥
सम्मूर्च्छनुच्छृङ्खलशङ्खनिःस्वनः
स्वनः प्रयाते पटहस्य शार्ङ्गिणि ।
सत्त्वानि निन्ये नितरां महान्त्यपि
व्यथां द्वयेषामपि मेदिनीभृताम् ॥ १३ ॥

दुरध्ययो दुष्पापः । इण् गतावित्यस्मात् कृच्छ्रार्थे खल् । ईदृशः स बलोदधिः सेनासमुद्रः सामवेदस्य समानतां दधौ तत्समोऽभूदित्यर्थः । सामवेदोऽपि बहुधाविष्कृतबृहद्रथन्तरादिसामोत्थितस्वरः सहस्रशाखत्वात्सहस्रवर्त्मा । गान्धर्व्वगानबहुत्वाच्चपलमतिभिः अध्येतुमशक्य इत्यर्थः । इङ् अध्ययने इत्यस्माद्धातोः खलि दुरध्यय इत्येव रूपम् ॥ ११ ॥

प्रत्यन्येति । अन्यनागं प्रति चलित ऊर्ध्वायतदन्तमण्डलं मूर्द्धानं धुवन् कम्पयन् द्विरदः कुण्ठमतीक्ष्णं अङ्कुशं निरस्यान्यमकुण्ठमङ्कुशं दधता त्वरावता निषादिना अरोधि रुद्धः ॥१२॥

सम्मूर्च्छन्निति । मूर्च्छा मोहसमुच्छ्राययोरिति धातुः । सम्मूर्च्छन् उच्छ्रायं गच्छन् प्रचुरीभवन् उच्छृङ्खलोऽनर्गलः सर्व्वव्यापी शङ्खस्य निःस्वनो यस्मिन् सः शार्ङ्गिणि प्रयाते यातुमुपक्रान्ते पटहस्य स्वनः द्वयेषामुभयेषामपि मेदिनीभृतां राज्ञां पर्व्वतानां च महान्त्यपि सत्त्वानि बलानि भूतानि च नितरां व्यथां निन्ये प्रापय

कालीयकक्षोदविलेपनश्रिय
न्दिशन्दिशामुल्लसदंशुमद्युति ।
खाताङ्कुरैर्मुद्गभुजां विपप्रथे
गिरेरधः काञ्चनभूमिजं रजः ॥ १४ ॥

मन्द्रैर्गजानां रथमण्डलस्वनै
र्निजुह्नुवे तादृशमेव बृंहितम् ।
तारैर्बभूवे परभागलाभतः
परिस्फुटैस्तेषु तुरङ्गहेषितैः ॥ १५ ॥

पटहश्रवणाद्द्राग्बलान्यभिभवशङ्कया व्यथितान्यासन् तथा गिरिस्थिताः सिंहादयोऽजन्तवश्च किमिदमिति ससाध्वसा आसन्नित्यर्थः । व्यवसाये स्वभावे च पिशाचादौ गुणे बले । द्रव्यात्मभावयोश्चैव सत्त्वं प्राणेषु जन्तुष्विति शाश्वतः ॥ १३ ॥

कालीयेति । कालीयं कुङ्कुमं काश्मीरजन्म घुसृणं कालीयं कुङ्कुमं विदुरिति शाश्वतः । कालीयकक्षोदैः कुङ्कुमचूर्णैः कृतानुलेपनश्रियं दिशां दिशत् ददत् । उल्लसदिति उद्यदादित्यसमा द्युतिर्यस्य तत् मुद्गभुजामश्वानां खुरैः खातं विदारितं काञ्चनभूमिजं रजो गिरेरधोगुरुत्वाद्गिरेरधस्तादेव विपप्रथे विस्तीर्णमभवत् ॥ १४ ॥

मन्द्रैरिति । मन्द्रैर्गम्भीरैः । मन्द्रस्तु गम्भीरे इत्यमरः । रथमण्डलस्वनैः तादृशं तद्रूपमेव गजानां बृंहितं निजुह्नुवे तिरस्कृतं । गजध्वनिरेकरूपत्वेन रथध्वान्न पृथगभावीत्यर्थः । तारैरुच्चैस्तरैर्मन्द्रस्वरविलक्षणैस्तुरङ्गहेषितैः परभागलाभतस्तेषु तादृश

अन्वेतुकामोऽवमताङ्कुशग्रह
स्तिरोगतं साङ्कुशमुद्वहन् शिरः।
स्थूलोच्चयेनागमदन्तिकागता
गजोऽग्रयाताग्रकरः करेणुकाम् ॥ १६ ॥
यान्तोऽस्पृशन्तश्चरणैरिवावनि
जवात्प्रकीर्णैरभितः प्रकीर्णकैः।
अद्यापि सेनातुरगाः सविस्मयै
रलूनपक्षा इव मेनिरे जनैः ॥ १७ ॥

ध्वनिगुणभेदलाभेषु परिस्फुटैर्बभूवे तुरगहेषाः सुव्यक्ता एव शुश्रुविरे इत्यर्थः। बृंहितं करिणां शब्दो हेषा ह्रेषा च वाजिनां। बभूवे इति भावे लिट् निजुह्नुवइति कर्म्मणि लिट् ॥ १५ ॥

अन्वेत्विति। अन्तिकागतांकरेणुकांकरिणीं अन्वेतुकामोऽनुगन्तुकामः अङ्कुशं गृह्णातीत्यङ्कुशग्रहो निषादी सोऽवमतो येन सः निषादिना साङ्कुशङ्कृतं तिरोगतं अङ्कुशाकर्षणेन तिर्य्यग्भूतं शिरो मस्तकं उद्वहन् गजः अग्रयाताग्रकरः करिणीग्रहणाय प्रसारितकराग्रो भूत्वा स्थूलोच्चयेन गतिविशेषेणागमत् जगाम। गजमध्यगतौ स्थूलोच्चयः साकल्यपुञ्जयोरिति रत्नप्रकाशः ॥ १६ ॥

यान्तइति। जवाद्वेगाच्चरणैरवनिमस्पृशन्तइव यान्तः सेनातुरगाः अभितः प्रकीर्णैरुभयतः प्रसृतैः प्रकीर्णकैश्चामरैः। चामरन्तु प्रकीर्णकमित्यमरः। कण्ठभूषणचामरैर्हेतुभिरद्यापि अलूनपक्षा इवेति सविस्मयैर्जनैर्मेनिरे पूर्वं तुरगाणामपि पक्षा आसन् पश्चात्केनचित्कारणेन देवैः पक्षच्छेदः कारितइति प्रसिद्धिः ॥१७॥

ऋज्वीर्दधानैरवतत्य कन्धरा
चलावचूडाः कलघर्घरारवैः।
भूमिर्महत्यप्यविलम्बितक्रमं
क्रमेलकैस्तत्क्षणमेव चिच्छिदे॥ १८॥
तूर्णम्प्रणेत्रा कृतनादमुच्चकैः
प्रणोदितं वेसरयुग्यमध्वनि।
आत्मीयनेमिक्षतसान्द्रमेदिनी
रजश्चयाक्रान्तिभयादिवाद्रवत्॥ १९॥

ऋज्वीरिति। ऋज्वीरवक्राश्चलावचूडाः चलितकण्ठभूषणाः। शिरःशिखाभूषणेषु चूडेति यादवः। चलितशिरस्का इति वा कन्धराः शिरोधराः अवतत्य वितत्य दधानैः कलघर्घरारवैः। घर्घरा क्षुद्रघण्टी स्यादिति कोषः अथवा घर्घरारव इति शब्दानुकरणम्। क्रमेलकैरुष्ट्रैरविलम्बितक्रमं क्रमः पदक्षेपः द्रुतपादक्षेपं यथा तथा महत्यपि भूमिस्तत्क्षणमेव चिच्छिदे अतिक्रान्ता। स्वभावोक्तिः॥ १८॥

तूर्णमिति। प्रणेत्रा सारथिना प्रणोदितं गमनाय प्रेरितम्। अत एव उच्चकैरुच्चैस्तरां कृतनादं यथा तथा वेसरयुग्यं। सङ्कराज्जो वेसरः। वेसराभ्यां युग्यं शकटमात्मीयनेमिः स्वचक्रधारा तया क्षतस्य सान्द्रस्य मेदिनीरजसश्चयेन समूहेन यदाक्रमणं तद्भया दिव तूर्णमध्वनि अद्रवत्। आत्मीयनेमिसमुद्भूतधूलिजालेनास्पृष्टं सत् द्रुतमगमदित्यर्थः॥ १९॥

व्यावृत्तवक्त्रैरखिलैश्चमूचरै-
र्व्रजद्भिरेव क्षणमीक्षिताननाः ।
बलाद्गरीयःस्तनकम्प्रकञ्चुकं
ययुस्तुरङ्गाधिरुहोऽवरोधिकाः ॥ २० ॥
पादैः पुरः कूवरिणां विदारिताः
प्रकाममाक्रान्ततलास्ततो गजैः ।
भग्नोन्नतानन्तरपूरितान्तरा
बभुर्भुवः कृष्टसमीकृता इव ॥ २१ ॥

व्यावृत्तेति । व्यावृत्तवक्त्रैर्विवृत्तमुखैर्व्रजद्भिरेवाखिलैश्चमूचरैः क्षणमीक्षिताननाः तुरङ्गाधिरुहस्तुरङ्गानधिरुहन्तीति क्विप् । तुरङ्गाधिरूढाः अवरोधिकाः अवरोधस्त्रियः बलाद्भिर्बलद्भिः गरीयोभिर्गुरुतरैः स्तनैः कम्प्रः कम्पनशीलः कञ्चुकः कूर्पासो यस्मिन् कर्म्मणि तद्यथा तथा ययुः । नमिकम्पीत्यादिना रप्रत्ययः ॥ २० ॥

पादैरिति । कूवरिणां रथानाम् । कूवरस्तु युगन्धर इत्यमरः । स एषामस्तीति ते रथास्तेषां पादैश्चक्रैः पुरः पूर्व्वं विदारिताः ततोगजैः प्रकाममाक्रान्ततलाः भग्नैरुक्तप्रकारेण पूर्व्वं भग्नत्वादुन्नतैरनन्तरैरुभयभागैः पूरितान्तराः समीकृतनिम्नप्रदेशाः यद्वा पूर्व्वं रथचक्रविदारितत्वाद्भग्नोन्नताः अनन्तरं गजपतिपरिक्रमणेन पूरितानतप्रदेशाः भुवः कृष्टसमीकृताः पूर्व्वं हलैः कृष्टा अनन्तरं बीजवपनार्थं समीकृता इव बभुः शुशुभिरे ॥ २१ ॥

दुर्दान्तमिति । उरोविलम्बिनः पर्य्याणतः पल्ययनतस्त्वत मतएवोत्पत्य निरस्तसादिनं स्वपृष्ठात्पातितावरोहं एकया दिशा

दुर्दान्तमुत्प्लुत्य निरस्तसादिनं
सहासहाकारमलोकयज्जनः ।
पर्य्याणतस्स्रस्तमुरोविलम्बिन
स्तुरङ्गमम्प्रद्रुतमेकया दिशा ॥ २२ ॥
भूभृद्भिरप्यस्खलिताः खलून्नतै
रपप्लवाना सरितः पृथूरपि ।
अन्वर्थसंज्ञैव परं त्रिमार्गगा
ययावसङ्ख्यैः पथिभिश्चमूरसौ ॥ २३ ॥

द्रुतं पलायितं दुर्दान्तं दुर्विनीतं तुरङ्गमं हासकृतेन हाकारेण सह यथा तथा जनोऽवलोकयत् अवलोकितवान् ॥ २२ ॥

भूभृद्भिरिति । उन्नतैरपि भूभृद्भिः भूधरैर्भूपैश्चास्खलिता अप्रतिहताः पृथूर्महतीरपि सरितो यमुनाप्रभृतीर्नदीरपप्लवाना स्वमहिम्नाच्छादयन्ती त्रिभिर्मार्गैर्गच्छन्तीति त्रिमार्गगा गङ्गा परमत्यन्तमन्वर्था अनुगतार्था संज्ञा त्रिमार्गगेति नामधेयं यस्याः सैव खलु त्रिभिरेव मार्गैर्ययौ न चतुर्थेनेत्यर्थः । असौ चमूस्त्वसङ्ख्यैः पथिभिर्ययौ अतो गङ्गाया अप्यधिका चमूरिति भावः । अतएव व्यतिरेकालङ्कारः । भेदप्राधान्यसाधर्म्यमुपमानोपमेययोः अधिकाल्पत्वकथनाद्व्यतिरेकः स उच्यत इति लक्षणात् ॥ २३ ॥

त्रस्ताविति । समासन्नस्य प्रत्यासन्नस्य करेणोरिभस्य सूत्कृता सूत्कारात्त्रस्तौ करभौ वेसरौ । करभावेसरेऽप्युष्ट्र इति सज्जनः । नियन्तरि सारथौ व्याकुलं व्यग्रं यथा तथा मुक्तरज्जुके त्यक्त प्रग्रहे सति क्षिप्ताः पतिताः अवरोधाङ्गना यस्मिन् कर्मणि तद्यथा

अस्तौ समासन्नकरेणुसूत्कृता
नियन्तरि व्याकुलमुक्तरज्जुके।
क्षिप्तावरोधाङ्गनमुत्पथेन गां
विलङ्घ्य लघ्वीं करभौ बभञ्जतुः॥ २४॥
स्रस्ताङ्गसन्धौ विगताक्षपाटवे
रुजा निकामं विकलीकृते रथे।
आप्तेन तक्ष्णा भिषजेव तत्क्षण
म्प्रचक्रमे लङ्घनपूर्व्वकः क्रमः॥ २५॥

तथा उत्पथेनापथेन। ऋक्पूरित्यादिना समासान्तः। गां भूमिं विलङ्घ्य दूरमतीत्य लघ्वीं रथविशेषं। लघ्वी लाघवयुक्तायां प्रभेदे स्यन्दनस्य चेति हेमः। बभञ्जतुः भग्नवन्तौ। अत्र त्रासस्य विशेषणगत्या भञ्जनहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गं स्वभावोक्त्या सङ्कीर्य्यते॥ २४॥

स्रस्तेति। स्रस्ताविश्लिष्टा अङ्गयोः रथाङ्गयोरङ्गानां करचरणादीनां च सन्धयः सन्धिभागा यस्य तस्मिन् विगतमक्षस्य चक्रधारकाष्ठस्याक्षाणामिन्द्रियाणां च पाटवं सामर्थ्यं यस्य तस्मिन् रथे स्यन्दने शरीरे च। रथः स्यात्स्यन्दने काय इति विश्वः। रुजा भङ्गेन रोगेण च निकामं विकलीकृते सति आप्तेन हितेन तक्ष्णा। वर्द्धकिना आप्तेन भिषजा वैद्येनेव। तक्षा तु वर्द्धकिस्त्वष्टेत्यमरः। तत्क्षणं तस्मिन्नेव क्षणे। अत्यन्तसंयोगे द्वितीया। लङ्घनं पादेना क्रमणं उपवासश्च। लङ्घनं तूपवासे स्यादूमने प्लवनेऽपि चेति विश्वः। तत्पूर्व्वकः क्रमो विधिः प्रचक्रमे प्रक्रान्तः प्रायेण ज्वरादि चिकित्साया लङ्घनपूर्व्वकत्वादिति भावः। श्लेषालङ्कार॥ २५॥

धूर्भङ्गसंक्षोभविदारितोष्ट्रिका
गलन्मधुस्रावितदूरवर्त्मनि।
स्थाणौ निषङ्गिण्यनसि क्षणम्पुरः
शुशोच लाभाय कृतक्रयो वणिक् ॥ २६ ॥
भेरीभिराकुष्टमहागुहामुखो
ध्वजांशुकैस्तर्ज्जितकन्दलीवनः।
उत्तुङ्गमातङ्गजितालघूपलो
बलैः स पश्चात् क्रियते स्म भूधरः ॥ २७ ॥

धूर्भङ्गेति। स्थाणौ कीले। स्थाणुः कीले स्थिरे हरे इति विश्वः। निषङ्गिणि सक्ते अनसि शकटे। क्लीबेऽनः शकटोऽस्त्री स्यादित्यमरः। धुरोऽक्षस्य भङ्गेन यः संक्षोभो विपर्य्यासः तेन विदारिता भिन्ना या उष्ट्रिका मृण्मयं मद्यभाण्डं। उष्ट्रिका मृत्तिकाभाण्डभेदे करभयोषितीति विश्वः। ततो गलता स्रवता मधुना मद्येन स्रावितं सिक्तं दूरवर्त्म दीर्घोध्वा येन तस्मिन् तथा सति पुरः पूर्व्वं लाभाय कृतः क्रयः क्रयणं येन स वणिक् क्षणं शुशोच। अत्र मधुस्रावधनव्यययोर्विशेषणगत्या शोकहेतुत्वात्काव्यलिङ्गभेदः ॥ २६ ॥

भेरीभिरिति। भेरीभिराकुष्टानि निन्दितानि महान्ति गुहामुखानि येन सः भेरीझङ्कारभर्त्सितनितान्तवात्यामुखरमहागुहाद्वार इत्यर्थः। ध्वजांशुकैस्तर्ज्जितानि भर्त्सितानि कन्दलीवनानि गुल्मषण्डानि येन सः उत्तुङ्गैर्मातङ्गैर्जिताः अलघूपलाः शैलपाषाणा येन सः भूधरो रैवतकाद्रिः बलैः सैन्यैः पश्चात् क्रियते

वन्येभदानानिलगन्धदुर्द्धराः
क्षणान्तरुच्छेदविनोदितक्रुधः।
व्यालद्विपायन्तृभिरुन्मदिष्णवः
कथञ्चिदारादपथेन निन्यिरे ॥ २८ ॥

स्म पश्चात्कृतः स्वयं दूरगमनेन पृष्ठतः कृतइत्यर्थः उक्तविशेषण महिम्ना अधरीकृतइति च प्रतीयते। लट् स्मइति भूतार्थे लट्। आकृष्टेति क्रोशतेः कर्म्मणि क्तः अस्वादित्वात् यत्वे ष्टुत्वम्। अत्र पश्चात्करणस्याकृष्टादिपदार्थहेतुकत्वात्काव्यलिङ्गं तयोक्त प्रतीयमानाभेदाध्यवसायादिति शेषमूलातिशयोक्तिसङ्कीर्णम् तेन बलानां भूधरौपम्यं गम्यतइत्यर्थालङ्कारेणालङ्कारध्वनिः ॥ २७ ॥

वन्येभेति। वन्येभदानानिलगन्धेन वनगजमदमारुतगन्धाघ्राणेन दुर्द्धराः क्रोधान्धाः दुर्ग्रहाः। अतएव क्षणं तरुच्छेदेन विनोदितक्रुधः प्रतिगजासान्निध्ये वृक्षाणां भङ्गेनापनीतक्रोधाः उन्मदिष्णवोऽत्यन्तमदशीलाः। अलंकृञित्यादिना इष्णुच्। व्यालद्विपाः दुष्टगजाः यन्तृभिराधोरणैः कथञ्चिदारात् दूरादपथेनामार्गेण। पथोविभाषेति निषेधविकल्पादृक्पूरित्यादिना समासान्तः। अपथं नपुंसकमिति नपुंसकत्वम्। निन्यिरे नीताः अत्रापि द्विपविशेषणानां तदुपमेयहेतुकत्वात्काव्यलिङ्गं स्वभावोक्त्या सङ्कीर्यते ॥ २८ ॥

तैरिति। वैजयन्त्यः पताकास्तावनराजयइव ताभीराजन्तीति तथोक्तैः गिरीणां प्रतिच्छन्दाः प्रतिनिधयस्तस्तुल्यैरित्यर्थः।

रैवजयन्तीवनराजिराजिभि
गिरिप्रतिच्छन्दमहामतङ्गजैः ।
बलैः प्रसर्प्पज्जनतानदीशतै
र्भुवोबलैरन्तरयाम्बभूविरे ॥ २९ ॥
तस्थे मुहूर्त्तं हरिणीविलोचनैः
सदृंशि दृष्ट्वा नयनानि योषिताम् ।
मत्वाथ सत्रासमनेकविभ्रम
क्रियाविकाराणि मृगैः पलाय्यत ॥ ३० ॥

एतस्मादेव स्पष्टोपमालिङ्गादन्यत्राप्युपमितसमासाश्रयणम् । ते महामतङ्गजायेषु तैः । जनताजनसमूहाः तानद्यइव तासां शतानि प्रसर्प्पन्ति प्रवहन्ति येषु तैर्बलैस्तथोक्तैः सैन्यैः । बह्व्योबह्वः । बह्वादिभ्यश्चेति विकल्पादीकारः । भुवोभूमयः अन्तरयाम्बभूविरे अन्तरादूराः कृताइति अतिक्रान्ताइत्यर्थः । न केवलं रैवतकाद्रि रेवेति भावः । बलैर्वैपुल्यादाच्छादिताइत्यर्थः । उक्तविशेषणावगत माहात्म्यादगृहीतभेदाः कृताइति च गम्यते । एतेनाभेदाध्यवसायादे वास्याक्रमणरूपान्तरीकरणस्य बलविशेषणावगतसादृश्यस्य हेतुत्वात्त दङ्गभूतोपमासङ्कीर्णं पदार्थहेतुकं काव्यलिङ्गं श्लेषमूलाभेदातिशयो क्त्युत्थापितमिति सङ्करः । अन्तरशब्दात्तत्करोतीति ण्यन्तात्कर्म्मणि लिट् आम्प्रत्यये भुवोऽनुप्रयोगः ॥ २९ ॥

तस्थइति । हरिणीविलोचनैः सदृंशि सदृशानि । नपुंसकस्य झलचइति नुम् । योषितां नयनानि दृष्ट्वा । मृगैः कृष्णसारैः कर्त्तृभिः मुहूर्त्तमल्पकालम् । मुहूर्त्तमल्पकाले स्याद्घटिकाद्वितयेऽ

निम्नानि दुःखादवतीर्य सादिभिः
सयत्नमाकृष्टकशाः शनैः शनैः ।
उत्तेरुरुत्तालखुरारवं द्रुताः
श्लथीकृतप्रग्रहमर्वतां व्रजाः ॥ ३१ ॥

ऽपि चेति विश्वः । तस्मै स्थितम् । हरिणीविलोचनशङ्कयेति भावः
अथानन्तरमनेकविभ्रमक्रियाविलासक्रिया एव विकारा येषां तानि
मत्वा सविलासानि शालेत्यर्थः सत्रासं सभयं यथा तथा पलायित
पलायितम् । हरिणीदुर्लभैर्विलासैर्येभ्यो विनिस्रयादिति भावः ।
अतएव निश्चयान्तः संशयालङ्कारः । परापूर्वादयतेर्भावे ल्युट् ।
उपसर्गस्यायताविति लत्वम् ॥ ३० ॥

निम्नानीति । अर्वतामश्वानाम् । वाजिवाहार्वगन्धर्वहयसैन्धव
सप्तयइत्यमरः । अर्वणस्त्वसावनञइति त्रादेशः । व्रजाः समूहाः ।
सादिभिरश्वारूढैः सयत्नमाकृष्टकशाः दृढगृहीतवल्गाः सन्तः ।
यद्यप्यश्वादेस्ताडिनी कशेत्यमरः तथाप्यत्र ताडनीवल्गयोः
कशेति दर्शनादविरोधः । शनैः शनैर्दुःखात्कृच्छ्रान्निम्नानि निम्न
भूप्रदेशानवतीर्य उत्तालखुरारवं उच्चतरशफशब्दं श्लथीकृत
प्रग्रहं शिथिलितवल्गं च यथा तथा द्रुताः सत्वराः सन्त उत्तेरुः
उत्प्लुविरे । निम्नेषु शनैरवतीर्य दीर्घं धावतीत्यश्वानां स्वभाव
इति भावः । अतएव स्वभावोक्तिः ॥ ३१ ॥

अध्यध्वमिति । इदमस्य भावोदात्ह्यं कौशलं वयः फलदं कुतः
अध्यध्वमध्वनि । विभक्त्यर्थेऽव्ययीभावः अनश्चेति समा
सान्तोऽच्प्रत्ययः नस्तद्धितइति टिलोपः । आरूढवतीव आरु

अध्यध्वमारूढवतैव केनचित्
प्रतीक्षमाणेन जनम्मुहुर्धृतः।
दाक्ष्यं हि सद्यः फलदं यदग्रत
स्वखाद दासेरयुवा वनावलीः॥ ३२ ॥
शौरेः प्रतापोपनतैरितस्ततः
समागतैः प्रश्रयनम्रमूर्त्तिभिः।
एकातपत्रा पृथिवीभृतां गणै
रभूद्बहुच्छत्रतया पताकिनी ॥ ३३॥

ध्वैव स्थितेन। निष्ठेति रुहेः क्तवतुप्रत्ययः। जनं शनैः पश्चादागच्छन्तं स्वजनं प्रतीक्षमाणेन केनचित्पुंसेति शेषः। मुहुर्धृतः स्थापितोऽपि दासेरयुवा तरुणोष्ट्रः। विशेषणसमासः। अग्रतोवनावलीस्त्वखाद पुरः पिचुमर्द्दादिकं भक्षयन्नास्तेत्यर्थः। न हि कुशलोऽन्यथा कालं यापयतीति भावः। अत्र दाक्ष्यसाफल्यस्य सामान्यस्य तद्विशेषेण दासेरकौशलेन समर्थनाद्विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः॥ ३२ ॥

शौरेरिति। शौरेः कृष्णस्य पताकिनी सेना। शौर्यादित्वादिनिः। प्रतापेन हरितेजसा उपनतैर्नम्रैर्विधेयैरित्यर्थः। अतएवेतस्ततः समागतैः पार्श्वदेशादागतैः प्रश्रयनम्रमूर्त्तिभिर्हरिसन्निधौ विनयनम्रविग्रहैः पृथिवीभृतां राज्ञां गणैर्हेतुना बहुच्छत्रतया अप्रख्यातपत्रवत्तया निमित्तेन एकानि केवलानि आतपत्राणि यस्याः सा एकातपत्रा केवलातपत्रमयी अभूत्। आतपत्रातिरिक्तं न किञ्चिदलक्ष्यतेत्यर्थः। एके मुख्यान्यकेवलाइत्य

आगच्छतोऽनूचि गजस्य घण्टयोः
स्वनं समाकर्ण्य समाकुलाङ्गनाः ।
दूरादपावर्त्तितभारवाहणाः
पथोऽपसस्रुस्त्वरितं चमूचराः ॥ ३४ ॥
ओजस्विवर्णोज्ज्वलवृत्तशालिनः
प्रसादिनोऽनुज्झितगोत्रसंविदः
श्लोकानुपेन्द्रस्य पुरः स्म भूयसो
गुणान्समुद्दिश्य पठन्ति वन्दिनः ॥ ३५ ॥

मरः । वक्रक्रमाप्येकक्रमेति विरोधभासनाद्विरोधाभासोऽलङ्कारः ॥ ३३ ॥

आगच्छत इति । अञ्चतीत्यन्वङ् तस्मिन् अन्वचि पृष्ठदेशे । ऋत्विगित्यादिनाञ्चेः क्विन्प्रत्ययः । आगच्छतो गजस्य घण्टयोः स्वनं समाकर्ण्य समाकुलाङ्गनाः सम्भ्रान्तवधूकाः चमूचराः दूरादेवापावर्त्तिता अपसारिता भारस्याश्वादेर्वाहना भारवाहणा भारवाहिन उष्ट्रादयो यैस्ते तथा सन्तः । वाहनमाहितादिति णत्वं । वहेर्ण्यन्तात्कर्त्तरि ल्युट् । त्वरितं शीघ्रं पथो मार्गादपसस्रुरपजग्मुः । स्वभावोक्तिः ॥ ३४ ॥

ओजस्वीति । वन्दिनः स्तुतिपाठकाः । वन्दिनस्तुतिपाठका इत्यमरः । ओजस्विवर्णस्य तेजस्विवर्णस्य क्षत्रजातेर्यदुज्ज्वलं वृत्तमुदयव्यापारः विजयाख्यं तेन शालत इति ओजस्विवर्णोज्ज्वलवृत्तशाली तस्य अन्यच्च ओजस्विवर्णैः समासभूयिष्ठाक्षरैरुज्ज्वलास्ते च ते वृत्तशालिनो वसन्ततिलकादिच्छन्दोविशेषशालिनश्च । वृत्तं चरित्र

निःशेषमाक्रान्तमहीतलाजलै-
श्चलन् समुद्रोऽपि समुज्झति स्थितिम्।
ग्रामेषु सैन्यैरकरोदवारितः
किमव्यवस्थां चलितोऽपि केशवः ॥ ३६ ॥

च्छन्दोऽपीति विश्वः । तान् प्रसादोऽस्यास्तीति प्रसादी तस्य प्रसादिनोऽनुग्रहशीलस्य । अन्यत्र प्रसादगुणयुक्तान् । प्रसिद्धार्थपदत्वं यत्र प्रसादोनिगद्यतइति । अनुज्झितौ गोत्रसंविदौ कुलाचारौ येन तस्य यादववंशोत्पन्नस्येत्यर्थः । अन्यत्र कुलनामनी येस्तान् । वंश नामाङ्कितानित्यर्थः । संविद्युद्धे प्रतिज्ञायां सङ्केताचारनामस्विति वैजयन्ती । एवम्भूतस्य उपेन्द्रस्य हरेर्गुणान्समुद्दिश्याधिकृत्य भूयसोबहुलान् श्लोकान् स्तुतिपद्यानि पुरोऽग्रे पठन्ति स्म । अत्रोपेन्द्रस्य तच्छ्लोकानां च वर्ण्यत्वेन प्रकृतानां श्लेषसाधर्म्या दौपम्यगम्यतायां श्लेषप्रतिभोत्थापिता केवलप्रकृतगोचरा तुल्य योगिता श्लेषस्य प्रकृतिषु प्रत्ययेषु नेति ॥ ३५ ॥

निःशेषमिति । चलन् कल्पान्ते क्षुभितः समुद्रोऽपि जलै र्निःशेषमाक्रान्तमहीतलः सन् स्थितिं मर्य्यादां वेलालङ्घनलक्षणां समुज्झति त्यजति । केशवस्तु चलितोऽपि प्रस्थितोऽपि अवारितै रपरिमितैः सैन्यैर्निःशेषमाक्रान्तमहीतलः सन् ग्रामेषु अव्यवस्था समर्य्यादां किमकरोन्नाकरोदेवेत्यर्थः । अत्रोपमानात्समुद्रा दुपमेयस्य केशवस्य मर्य्यादानतिक्रमेणाधिक्यकथनाद्व्यतिरेका लङ्कारः । लक्षणं तूक्तम् ॥ ३६ ॥

कोशातकीपुष्पगुलुच्छकान्तिभि-
र्मुखैर्विनिद्रोल्बणबाणचक्षुषः ।
ग्रामीणवध्वस्तमलक्षिताजनै-
श्चिरं वृतीनामुपरि व्यलोकयन् ॥ ३७ ॥

गोष्ठेषु गोष्ठीकृतमण्डलासनान्
सनादमुत्थाय मुहुः स वल्गतः ।
ग्राम्यानपश्यत्कपिशान्पिपासतः
स्वगोत्रसङ्कीर्त्तनभावितात्मनः ॥ ३८ ॥

कोशातकीति । कोशातकीपुष्पगुलुच्छकान्तिभिः पटोलीप्रसून गुच्छसच्छायैः स्मरपाण्डुरैरित्यर्थः । कोशातकी पटोली स्यादिति हलायुधः । मुखैरुपलक्षिताः विनिद्रं विकसितं अतएवोल्बणं विपुलं बाणन्नीलसैरेयपुष्पमिव चक्षुर्यासान्ताः । नीला झिण्टी द्वयोर्बाणा इत्यमरः । ग्रामेषु भवाग्रामीणाः । ग्रामाद्यञ्खञाविति खञ्प्रत्ययः । ता स्त्र वध्वः स्त्रियः तं कृष्णं ग्रामान्तर्गामिनमिति भावः । जनैस्तमूषरैरलक्षिता वृतिभिस्तिरोहिताइत्यर्थः । चिरं वृतीनां कण्टकशाखावरणानामुपरि उपरितनावकाशे व्यलोकयन् । उपमास्वभावोक्त्योः सङ्करः ॥ ३७ ॥

गोष्ठेष्विति । स कृष्णोमात्रस्थितष्वध्येष्विति गोष्ठानि गोस्थानानि । गोष्ठं गोस्थानकमित्यमरः । सुपि स्थइति कप्रत्ययः अम्बाम्बगोभूमीत्यादिना षत्वम् । गोष्ठीषु वार्त्तासु । गोष्ठी सभायां संलापइति विश्वः । कृतानि मण्डलासनानि मण्डलाकारेणोपवेशनानि यैस्तान्मुहुः सनादं क्ष्वेलाट्टहासाद्यारावसहितं

पश्यन् कृतार्थैरपि वल्लवीजनो
जनाधिनाथं न ययौ वितृष्णताम्।
एकान्तमौग्ध्यानवबुद्धविभ्रमैः
प्रसिद्धविस्तारगुणैर्विलोचनैः॥ ३९ ॥

यथा तथोत्थाय वल्गनतउत्प्लवमानाम् कपिशं मद्यं । कश्यं मद्यं च मैरेयं कपिशं कापिशायनमिति हलायुधः। पिपासतो मुहुर्मुहुः पातुमिच्छतः। पिबतेः सन्नन्तात्लटः शतरि शप्। स्वगोत्र सङ्कीर्तने स्वनामसङ्कीर्त्तने भावितात्मनः प्रवर्त्तितचित्तान् कृष्णना मानि गायतइत्यर्थः। ग्रामेषु भवान् ग्राम्यान् घोषजनानि त्यर्थः। ग्रामाद्यञ्खञाविति यञ्प्रत्ययः। अपश्यदालोकितवान् स्वभावोक्तिः॥ ३८ ॥

पश्यन्निति । एकान्तमौग्ध्येनात्यन्तमुग्धतया अनवबुद्धविभ्रमै रज्ञातविलासैः किन्तु प्रसिद्धोविस्तारएव गुणोयेषान्तैरतिविशालै रित्यर्थः। कृतार्थैरपि सकृद्दर्शनालब्धविस्तारफलैरित्यर्थः। विलो चनैर्जनाधिनाथं कृष्णं पश्यन् वल्लवीजनोगोपाङ्गनाजनः वितृष्णतां तृप्ततां न ययौ भूयोभूयः पश्यन्नपि नालम्बुद्धिमवापेत्यर्थः। तृप्तिकारणे दर्शने सत्यपि तृप्तिकार्यानुत्पत्तेर्विशेषोक्तिः सा कृष्णस्य मदनकोटिलावण्यलक्ष्मीं व्यञ्जयति॥ ३९ ॥

प्रीत्येति । नियुक्तान् वामपादे एव संयतान् स्तनन्धयन्ति पिबन्तीति स्तनन्धयास्तान्। नासिकास्तनयोर्ध्माधेटोरिति धेटः खश्प्रत्ययः । प्रीत्या वत्सान् लिहतीर्जिह्वया स्वादयन्तीः रोहिणी र्गाः। अर्जुन्यघ्ना रोहिणी स्यादित्यमरः। पयः क्षीरं आनन्दभयेन

प्रीत्या नियुक्ताँल्लिहतीः स्तनन्धया
न्निगृह्य पारीमुभयेन जानुनोः।
वर्द्धिष्णुधाराध्वनि रोहिणीः पय
श्चिरन्निदध्यौ दुहतः स गोदुहः ॥४०॥
अभ्याजतोऽभ्यागतहूर्णतर्णका
न्निर्याणहस्तस्य पुरो दुधुक्षतः।
वर्गाद्गवां हुङ्कृतिचारु निर्यती
मरिर्मधोरैक्षत गोमतल्लिकाम् ॥ ४१ ॥

जानुद्वयेन पारीं दोहनपात्रीं । पारी पात्रीपरागयोरिति विश्वः। निगृह्य निरुध्य। वर्द्धिष्णुधाराध्वनि वर्द्धनशीलक्षीरधाराशब्दं यथा भवति तथा दुहतः प्रपूरयतः। दुहेः लटः शतरि शप्। दुह्याचेति द्विकर्म्मकत्वम्। गान्दुहन्तीति गोदुहः गोदोहकान्। सत्सूद्विषेत्यादिना क्विप्। स हरिश्चिरं निदध्यौ अवलोकयति स्म। निध्यानमवलोकनमिति वैजयन्ती। स्वभावोक्तिः ॥ ४० ॥

अभ्येति। अभ्याजतः दोग्धुमभिमुखमागच्छतः। अजेर्लटः शत्रादेशः। निर्याण पादबन्धनन्दाम। निर्याणं दाम संदानं पशूनां पादबन्धने इति वैजयन्ती। तद्धस्ते यस्य तस्य निर्याणहस्तस्य दुधुक्षतो दोग्धुमिच्छतो दोग्धुरिति शेषः। दुहेः सन्नन्ता लटः शत्रादेशः शलधत्वे। पुरोऽग्रेऽभ्यागताऽभिमुखमागतस्तर्णः स्तनपाने त्वरमाणस्तर्णकोऽतिबालो वत्सो यस्यास्ताम्। शकोजातस्तु तर्णकस्त्वमरः। गवां वर्गाद्बृन्दात् हुङ्कृतिचारु हुङ्कारमनोहरं यथा तथा निर्यतीं निर्गच्छन्तीं। इणः शतरि ङीप् इणो

स व्रीहिणां यावदपासितुं गताः
शुकान्मृगैस्तावदुपद्रुतश्रियाम् ।
कैदारिकाणामभितः समाकुलाः
सहासमालोकयति स्म गोपिकाः ॥४२॥

यणादेशः । प्रशस्ता गौः गोमतल्लिका । प्रशस्तवचनैश्चेति नित्य समासः । मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ प्रशस्तवाचकान्यमूनीत्यमरः । मधोरिर्मधुसूदनरैक्षत ईक्षितवान् । ईक्षते रीक्षाञ्जादीनामित्याट् आटश्चेति वृद्धिः । स्वभावोक्तिः ॥ ४१ ॥

स इति । यावच्छुकान् कीरानपासितुं गतास्तावन्मृगैरुपद्रुतश्रियामुपद्रुतसम्पदां व्रीहिणां व्रीहिमतां । व्रीह्यादिभ्यश्चेति इनिप्रत्ययः । कैदारिकाणां क्षेत्रसमूहानां । पुंनपुंसकयोर्वप्रः केदारः क्षेत्रमस्य तु । कैदारिकं स्यात्कैदार्यं क्षेत्रं कैदारिकं गणे इत्यमरः । ठञ् कवचिनश्चेति चकाराट्ठञ्प्रत्ययः । कर्तृयोगात्कर्मणि षष्ठी । गोपिकाः गोप्त्रीरभितः समाकुलाः व्यग्राः उभयतः समाकृष्यमाणाः सतीरित्यर्थः । स हरिः सहासमालोकयति स्म । अत्र सहासावलोकनस्य विशेषणगत्या समाकुलपदार्थहेतुकत्वात्काव्यलिङ्गभेदः ॥ ४२ ॥

व्यासेद्धुमिति । गोप्याः शालिगोप्त्र्यः । गौरादित्वात् ङीप् । गीतानि उपकर्णयन् शृण्वन् असौ मृगव्रजः नूनं निश्चितं कलमं नात्ति न खादति इति किं कलमभक्षणे गीतश्रवणविशेष इत्यत आह असौ गोपी अस्मान् व्यासेद्धुं निवारयितुं अवधानतो गीतैकाग्र्यात् पुरा चलति चलिष्यति । यावत्पुरानिपातयोर्लडिति

व्यासेद्धमस्मानवधानतः पुरा
चलत्यसावित्युपकर्षयन्नसौ ।
गीतानि गोप्याः कलमस्मृगव्रजो
न नूनमत्तीति हरिर्व्यलोकयत् ॥ ४३ ॥

लीलाचलत्स्त्रीचरणारुणोत्पल
स्खलत्तुलाकोटिनिनादकोमलः ।
शौरेरुपानूपमपाहरन्मनः
स्वनान्तरादुन्मदसारसारवः ॥ ४४ ॥

भविष्यदर्थे लट् । इतीत्थं वितर्कयन्निति शेषः । हरिर्व्यलोकयत । अत्र मृगाणां कलमखादननिवृत्तेर्गीतासक्तिनिमित्तायास्तदाकर्णनसुखभङ्गहेतुकत्वमुत्प्रेक्ष्यते ॥ ४३ ॥

लीलेति । अनुगता आपो येषु ते अनूपाः जलप्रायदेशाः । जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविध इत्यमरः । प्रादिभ्यो धातुजस्य वाच्यो वाचोत्तरपदलोपश्चेति बहुव्रीहिः ऋक्पूरित्यादिना समासान्तः ऊदनोर्देश इत्यूकारः । तेषां समीपे उपानूपं । समीपार्थेऽव्ययीभावः । लीलया चलति चलनशीले स्त्रियाश्चरणे अरुणोत्पले इव तयोः स्खलन्त्यौ ये तुलाकोटी नूपुरौ । पादाङ्गदन्तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियामित्यमरः । तयोर्निनाद इव कोमलो मधुरः उन्मदसारसारवः मत्तहंसकूजितं । चक्राङ्गः सारसो हंस इति शब्दार्णवे । शौरेर्मनः स्वनान्तरादपाहरत् । अत्र मनोहरत्वस्य लीलेत्यादिविशेषणार्थहेतुकत्वादुपमासङ्कीर्णं काव्यलिङ्गम् ॥ ४४ ॥

उच्चैर्गतामस्खलिताङ्गरीयसी
न्तदानिदूरादपि तस्य गच्छतः ।
एके समूहुर्बलरेणुसंहतिं
शिरोभिराज्ञामपरे महीभृतः ॥ ४५ ॥
प्रायेण नीचानपि मेदिनीभृतो
जनः समेनैव पथाधिरोहति ।
सेना मुरारेः पथ एव सा पुन
र्महामहीध्रान्परितोऽध्यरोहयत् ॥ ४६ ॥

उच्चैरिति । तदा तस्मिन्समये अतिदूराद्गच्छतोऽपि तस्य हरेः सन्निधिनीमुच्चैर्गतामत्यूर्ध्वमुन्नताम् । अन्यत्रोर्ध्वलोकेष्वपि व्याप्तां अस्खलितामभङ्गुरां सत्यां च गरीयसीमतिमहतीं पूज्यां च बलरेणुसंहतिं सेनारेणुसङ्घातं एके कतिपये महीभृतः पर्वताः । आज्ञां शासनं अपरे महीभृतो राजानस्तु शिरोभिः शेखरैः शीर्षैश्च समूहुः संवहन्ति स्म । वहेर्लिटि उर्जसि वचि स्वपीत्यादिना सम्प्रसारणम् । अत्र हरिमहिमवर्णनायामुभयेषामपि महीभृतां प्रकृतत्वात्केवलप्रकृतास्पदा तुल्ययोगिता सैव प्रतिभोत्थापिता चेति सङ्करः ॥ ४५ ॥

प्रायेणेति । प्रायेण प्राचुर्येण नीचान् कुब्जानपि मेदिनीभृतोऽद्रीन् जनो लोकः समेन सुगमेन पथा मार्गेणैवाधिरोहति । सा मुरारेः सेना पुनः पथो मार्गानेव महामहीध्रान् महाद्रीन्परितोऽध्यरोहयत् । लोके हि सति क्षुद्रेऽध्वनि तेन शैलारोहण सम्भवः सेना सर्वपथातिरेकिण्यभूत् । पूर्वापरःसङ्घं पन्थानः

दन्ताग्रनिर्भिन्नपयोदमुन्मुखाः
शिलोच्चयानारुरुहुर्महीयसः ।
तिर्य्यक्कटप्राविमदाम्बुनिम्नगा
विपूर्य्यमाणश्रवणोदरन्द्विपाः ॥ ४७ ॥

श्च्योतन्मदाम्भःकणकेन केनचि
ज्जनस्य जीमूतकदम्बकद्युता ।
नागेन नागेन गरीयसोच्चकै
ररोधि पन्थाः पृथुदन्तशालिना ॥ ४८ ॥

स्वारोहणेन प्रवर्त्तिता इत्यर्थः । रोहतेर्गत्यर्थत्वाद्गतिबुद्धीत्यादिना पथामणिकर्त्तुर्णौ कर्म्मत्वम् । महीं धरन्तीति महीध्राः । मूलविभुजादित्वात्कः । अत्र सेनायाः पथां शैलाधिरोहणेनोपमानाज्जनादाधिक्यकथनाद्व्यतिरेकः ॥ ४६ ॥

दन्ताग्रेति । द्वाभ्यां पिबन्तीति द्विपाः । सुपीति योगविभागात्कप्रत्ययः। उन्मुखाउन्नमितमुखाः सन्तः दन्ताग्रैर्निर्भिन्नाविदारिताः पयोदाः शृङ्गगतायस्मिन्कर्म्मणि तद्यथा तथा तिर्य्यगूर्ध्वमुखत्वात्तिरश्चीनं यथा तथा कटेभ्यः स्रवन्ते चरन्तीति कटप्राविणीभिर्मदाम्बुनिम्नगाभिर्म्मदजलप्रवाहैर्विपूर्य्यमाणानि श्रवणोदराणि यस्मिन् कर्म्मणि तद्यथा तथा महीयसोमहत्तरान् शिलोच्चयान् आरुरुहुः । स्वभावोक्तिः ॥ ४७ ॥

श्च्योतदिति । श्च्योतन्तः चरन्तोमदाम्भःकणायस्य तेन । शैषिकः कप्प्रत्ययः । जीमूतकदम्बकस्येव द्युत् द्युतिर्यस्य तेन । पृथुभ्यां दन्ताभ्यां शालतइति तच्छालिना । गरीयसा गुरुतरेणोच्चकै

भग्नद्रुमाश्चक्रुरितस्ततो दिशः
समुच्छ्वसत्केतनकाननाकुलाः ।
पिष्टाद्रिपृष्ठास्तरसा च दन्तिन
श्चलन्निजाङ्गाचलदुर्गमा भुवः ॥ ४९ ॥
आलोकयामास हरिर्महीधरा
नधिश्रयन्तीर्गजताः परःशताः ।
उत्पातवातप्रतिकूलपातिनी
रुपत्यकाभ्यो वृहतीः शिला इव ॥ ५० ॥

रुद्धतेन । केनचिन्नागेन गजेन जनस्य पन्थाः मार्गः यथा अरोधि । नगेनाचलेन न तथारोधि रुद्धः । मत्तमातङ्गस्य दुरासदत्वा च्छैलवदनतिक्रमणीयत्वादिति भावः । अतएवोपमानादगादुप मेयस्य नागस्याधिक्याद्व्यतिरेकः ॥ ४८ ॥

भग्नेति । दन्तिनो गजा इतस्ततो भग्नद्रुमाः स्वभग्नाखिलवृक्षाः दिशः समुच्छ्वसद्भिः केतनैरेव काननैराकुलाः सङ्कीर्णाश्चक्रुः । तथा तरसा बलेन पिष्टानि चूर्णितानि अद्रिपृष्ठानि यासु ता भुवो भूमीः चलद्भिर्निजाङ्गैरेवाचलैर्दुर्गमाः दुष्प्रापाश्चक्रुः । अत्र केतने ष्वङ्गेषु च काननाचलत्वरूपणाद्रूपकालङ्कारः तेन गजानां पुरातन सृष्टिसंहारेण सृष्ट्यन्तरप्रवर्त्तनरूपं लोकोत्तरं सामर्थ्यं गम्यत इत्यलङ्कारेण वस्तुध्वनिः ॥ ४९ ॥

आलोकेति । हरिर्महीधरान् अधिश्रयन्तीः परःशताः शता त्पराः अधिकशता इत्यर्थः । परःशताद्यास्ते येषां परा सङ्ख्या शता

शैलाधिरोहाभ्यसनाधिकोच्छ्रयैः
पयोधरैरामलकीवनाश्रिताः ।
तमार्व्वतीयप्रमदाश्च चायिरे
विकाशविस्फारितविभ्रमेक्षणाः ॥ ५१ ॥

धिकेत्यमरः । पञ्चमीति योगविभागात्समासः राजदन्तादित्वादुपसर्ज्जनस्यापि मतशब्दस्य परनिपातः पारस्करादित्वात्सुडागमः । गजताः गजसमूहाः । गजाच्चेति वक्तव्यमिति साहूहिकस्तल् प्रत्ययः । उपत्यकाभ्य आसन्नभूमिभ्यः । उपत्यकाद्रेरासन्ना भूमिरित्यमरः । उपाधिभ्यां त्यकन्नासन्नारूढयोरिति त्यकन्प्रत्ययः । उत्पातत्रातेन । तत्प्रतिकूलं पतन्तीति तत्पातिनी ऊर्ध्वगामिनीरित्यर्थः । वृहतीः शिलाइवेत्युत्प्रेक्षा । आलोकयामास ॥ ५० ॥

शैलेति । शैलाधिरोहाभ्यसनेन पर्व्वतारोहणाभ्यासेनाधिकोच्छ्रयैरत्युन्नतैः पयोधरैः स्तनैरुपलक्षिताः आमलकीवनाश्रिताः धात्रीवनगताः । पर्व्वतो निवासो येषान्ते पर्व्वतीयाः किरातादयः । पर्व्वताच्चेति छप्रत्ययः । तेषां प्रमदाः । विकाशेन विस्मयकृतविस्तारेण विस्फारिताविवर्त्तिताः विभ्रमा विलासा येषान्तानीक्षणानि यासान्तास्तथा सत्यः तं हरिं चचायिरे ददृशुः । चाय पूजानिशामनयोरिति धातोः कर्त्तरि लिट् । निशामनं दर्शनं निरीक्षणनिशामने इति दर्शनपर्य्यायेषु भट्टमल्लः । एतेन हरेर्लोकोत्तरं लावण्यं व्यज्यत इति वस्तुना वस्तुध्वनिः स्वभावोक्तिश्छेकानुप्रासयोः संसृष्टिः ॥ ५१ ॥

सावज्ञमुन्मील्य विलोचने सकृत्
चणम्मृगेन्द्रेण सुषुप्सुना पुनः ।
सैन्यात्र यातः समयापि विव्यथे
कथं सुराजम्भवमन्यथाथवा ॥ ५२ ॥
उत्सेधनिर्धूतमहीरुहां ध्वजै
र्जनावरुद्धोद्धतसिन्धुरं हसाम् ।
नागैरधिक्षिप्तमहाशिलम्मुहु
र्विलम्बभूर्वोपरि तन्महीभृताम् ॥ ५३ ॥

सावज्ञमिति । सावज्ञमनादरं यथा तथा विलोचने सकृदेक वारं । एकस्य सकृदिति सकृदर्थे निपातः । चणमुन्मील्योन्मिष्य । पुनः सुषुप्सुना स्वप्तुमिच्छुना । स्वपेः सन्नन्तादुप्रत्ययः । रुदविदेत्यादिना सनः किल्वाद्वचिस्वपीत्यादिना सम्प्रसारणम् । मृगेन्द्रेण सिंहेन समया समीपे । समयानिकषाशब्दौ समीपे सम्प्रकोर्त्तिताविति सज्जनः । यातोगच्छतोऽपि । यातेर्लटः शत्रादेशः । सैन्यात्सेनातः । भीत्रार्थानां भयहेतुरित्यपादानत्वम् । न विव्यथे न बिभ्ये । व्यथ भयसंचलनयोरिति धातोर्भावे लिट् । अथवा तथा ह्यत्यर्थः । अन्यथा भीतत्वे कथं सुराजम्भवं सुखेन राज्ञा भूयत न कथमपीति भावः । राजा चायं मृगाणामिति भावः । कर्तृकर्मणोश्च भूकृञोरिति कर्त्तरीषदादौ चोपपदे भवतेः खल्प्रत्यये मलोपमुमागमौ । अर्थान्तरन्यासः ॥ ५२ ॥

उत्सेधेति । नागैर्गजैरधिक्षिप्ताक्षिप्ताः छलता महाशिला येन तत् तद्बलं सैन्यं ध्वजैरुत्सेधेनौन्नत्येन निर्धूताश्चवगणितामहीरुहो येषु

अस्रूयमाणि मधुजालके तरो
गर्जेन गण्डकषता विधूनिते ।
क्षुद्राभिरक्षुद्रतराभिराकुलं
विदश्यमानेन जनेन दुद्रुवे ॥ ५४ ॥

तेषां । उत्सेधश्चोच्छ्रयश्च स इत्यमरः । जनैरवरुद्धं प्रतिबद्धमुद्धत मुद्वेलं सिन्धुरंहोनदीवेगोयेषां तेषां महीभृतां पर्व्वतानां उपरि मुकुलीबभूव मार्गवशाज्जयसोभूधरान्मुकुरावरोहेत्यर्थः । हयौघरुद्ध इति पाठे हयौघेन घोटकसमूहेन रुद्धमित्यादिपूर्व्ववत् । अत्रा वरोहणवदुत्कर्षश्चोपरिभावोविशेषणवैभवात् प्रतीयते इति तद भेदेनोपरिभावस्य वलभूधरविशेषणपदार्थहेतुकत्वाक्षेपप्रतिभो त्थापितकाव्यलिङ्गविशेषः ॥ ५३ ॥

अस्रूयेति । तरोर्वृक्षस्य अस्रूयमाणे अस्रुवदाचरति तद्वदा लम्बमान इत्यर्थः । उपमालङ्कारः । अस्रुशब्दादाचारे क्यङन्ताल्लटः शानजादेशः अकृत्सार्व्वधातुकयोर्दीर्घः । गण्डं कपोलं कषता तद्स्कन्धे कण्डूयमानेन गजेन मधुजालके क्षौद्रपटले विधूनिते कम्पिते सति । धूञोण्यन्तात्कर्म्मणि क्तः धूञ्प्रीञोर्नुग्वक्तव्य इति नुगागमः । अक्षुद्रतराभिरतिस्थूलाभिः क्षुद्राभिः सरघाभिः । क्षुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिकेत्यमरः । विदश्य मानेन चक्षुभिर्भिद्यमानेन जनेन समाकुलं व्ययं यथा तथा दुद्रुवे पलायितम् । भावे लिट् । स्वभावोक्तिरुपमासंसृष्टा ॥ ५४ ॥

मीतइति । उचिते परिचिते पलाशिनि द्रुमे । पलाशो द्रुद्रुमागमाइत्यमरः । शरीरवत् पूर्व्वशरीरवत् । तत्र तस्थेवेति वति

नीते पलाशिन्युचिते शरीरव
द्गजान्तकेनान्तमदान्तकर्म्मणा ।
संवेरुरात्मान इवापरं क्षणा
त्क्षमारुहं देहमिव प्लवङ्गमाः ॥ ५५ ॥
प्रह्वानतीव क्वचिदुच्छ्रितिश्रितः
क्वचित्प्रकाशानथ गह्वरानपि ।
साम्यादपेतानिति वाहिनी हरे
स्तदातिचक्राम गिरीन् गुरूनपि ॥ ५६ ॥

प्रत्ययः । अदान्तकर्म्मणा दुर्दान्तव्यापारेण गजोऽन्तक इवेति उपमितसमासः साहचर्य्यात् । तेन गजान्तकेनान्तं नाशं नीते गमिते सति प्लवं गच्छन्तीति प्लवङ्गमाः कपयः । गमेश्चेति खच्प्रत्यये मुमागमः । आत्मानो जीवा इवापरं क्षमारुहं देहमिव क्षणात् संवेरुः सम्प्रविष्टा इत्यर्थः । अनेकेवशब्दवाक्यार्थोपमा सा च शरीरवदिति तद्धितगता अन्यत्र समासगतेति सङ्करः ॥ ५५ ॥

प्रह्वानिति । क्वचिदतीव नितान्तं प्रह्वान् प्रवणान् । अन्यत्रानुकूलान् क्वचिदुच्छ्रितिं श्रयन्तीत्युच्छ्रितिश्रितः औन्नत्यभाजश्चौद्धत्यभाजश्च । श्रयतेः क्विप् तुक् । क्वचित्प्रकाशान् प्रकटाननवगूढवृत्तींश्च । क्वचिदतिगह्वरानपि । अपिश्चार्थे । अप्रवेशान् अन्यच्च गूढांश्च । इतीत्थं साम्यादपेतान् विषमरूपान् विषमवृत्तांश्च । अतएव गुरून् महतोऽपि पूज्यानपि गिरींस्तदा हरेर्वाहिनी सेना अतिचक्रामातीत्य गता उल्लङ्घिता च । गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः । उत्पथप्रतिपन्नस्य परित्यागो विधीयते इति स्मरणादिति

स व्याप्तवत्या परितोऽपथान्यपि
स्वसेनया सर्व्वपथीनया तया।
अम्भोभिरुल्लङ्घिततुङ्गरोधसः
प्रतीपनाम्नीः कुरुते स्म निम्नगाः ॥ ५७ ॥

भाव: । गुरूणामप्यतिक्रमइतिविरोधेऽपिशब्दः सचोक्तवैषम्य दोषोद्घाटनेन परिहृतइति विरोधाभासः स च गुरूनिति वाच्य प्रतीयमानयोरभेदाध्यवसायात् श्लेषमूलातिशयोक्त्युत्थापितइति सङ्करः ॥ ५६ ॥

सइति। स हरिः परितः समन्तादपथान्यपमार्ग्गानपि। पथो विभाषेति निषेधविकल्पादृक्पूरित्यादिना समासान्तः। अपथं नपुंसकमिति नपुंसकत्वम्। व्याप्तवत्यापि सर्व्वान्पथोव्याप्नोतीति सर्वपथीना। तत्सर्वादेरित्यादिना खप्रत्ययः। तया सर्वपथीनया तया स्वसेनया निमित्तेन अम्भोभिरुल्लङ्घितानि युगपदखिलसेना प्रवेशेन प्रतीपगमनादुपर्याक्रान्तानि तुङ्गरोधांसि यासान्ताः निम्नं गच्छन्तीति निम्नगानद्यः प्रतीपनाम्नीः कुरुते स्म। प्रतिगताउत्तानगा आपोयासान्ताः प्रतीपाः। ऋक्पूरित्यादिना समासान्तः द्व्यन्तरुप सर्गेभ्योऽपईतीकारः। अथ वा प्रतीपं निम्नगानामविरुद्धं नाम उत्तानगा इति नामधेयं यासान्ताः प्रतीपनाम्न्यः। अनउपधा लोपिनोऽन्यतरस्यामिति ङीप्। तास्तथा चकारेत्यर्थः। अत्र निम्नगानां प्रतीपनामासंबन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः॥ ५७ ॥

यावदिति। दन्तिनां घटागजसङ्घायावन्न व्यगाहन्त न व्यक्षोभयन् तावत्तुरङ्गमैः कर्त्तृभिः खुरैः करणैः उदीरितं उत्था

यावद्व्यगाहन्त न दन्तिनाङ्कटा
स्तुरङ्गमैस्तावदुदीरितं खुरैः ।
क्षिप्तं समीरैः सरिताम्पुरः पत
ज्जलान्यनैषीद्रजएव पङ्कताम् ॥ ५८ ॥

रन्तुं क्षतोत्तुङ्गनितम्बभूमयो
मुहुर्व्रजन्तः प्रमदम्मदोद्धताः ।
पङ्कं करापाकृतशैवलांशुकाः
समुद्रगाणामुदपादयन्निभाः ॥ ५९ ॥

पितं । अथ समीरैः मारुतैः क्षिप्तं विकीर्णं । अतएव पुरोगज प्रवेशात्प्रागेव पतद्रजोभूरेणुरेव सरितां जलानि पङ्कतामने षीन्निनाय । नयतेर्द्विकर्म्मकत्वात् लुङि वृद्धिः । अत्रापि सरितां पङ्कत्वासम्बन्धेऽपि सम्बन्धोक्तेः पूर्व्ववदतिशयोक्तिः ॥ ५८ ॥

रन्तुमिति । रन्तुं क्रीडितुं क्षताएकत्र विषाणैरन्यत्र नखैश्च विदलिताउत्तुङ्गानितम्बभूमयोरोधोभागाः श्रोणिभागाश्च येस्ते । नितम्बोरोधसि स्कन्धे शिखरेऽपि कटीरके इति विश्वः । मुहुः प्रमदं हर्षं व्रजन्तः मदेन दानेन दर्पेण वोद्धताः । करैर्हस्तैरपा कृतानि शैवलानि अंशुकानीवांशुकानि येस्ते इभाः समुद्रं गच्छन्तीति समुद्रगाणां समुद्रपत्नीनां नदीनां । एकाजुत्तरपदे णइति णत्वं । पङ्कं कर्दमं कलुषं चोदपादयन् । पङ्कोऽस्त्री कर्दमेन सारिति विश्वः । यथा मदोद्धताः पराङ्गनानां दोषमुत्पादयन्ति तद्वदिति भावः । अत्र प्रस्तुतेभविशेषणादप्रस्तुतस्त्रीसंग्रहव्यवहारप्रति

रुग्णोरुरोधःपरिपूरिताम्भसः
समस्थलीकृत्य पुरातनीर्नदीः ।
कूलङ्कषौघाः सरितस्तथापराः
प्रवर्त्तयामासुरिभा मदाम्बुभिः ॥ ६० ॥
पद्मैरनन्वीतवधूमुखद्युतो
गतान हंसैः श्रियमातपत्रजाम् ।
दूरेऽभवन् भोजबलस्य गच्छतः
शैलोपमातीतगजस्य निम्नगाः ॥ ६१ ॥

कप्रतीतेः समासोक्तिः स्त्रीपद्मयोरभेदाध्यवसायादिति श्लेषमूला तिशयोक्त्युत्थापितेति सङ्करः ॥ ५८ ॥

रुग्णेति । इभा रुग्णैर्भग्नैरुरुभिर्महद्भी रोधोभिस्तटैः परिपूरिताम्भसोऽन्तःक्षेपशोषिताम्भस इत्यर्थः । पुराभवाः पुरातनीः । सायञ्चिरमित्यादिना ट्युप्रत्ययः तुडागमश्च टिड्ढाणञित्यादिना ङीप् । नदीः समस्थलीकृत्य स्थलसमाः कृत्वा । मदाम्बुभिः स्वमदोदकैः कूलङ्कषन्तीति कूलङ्कषाः ओघा यासां ताः उभयकूलप्रवाहिन्योऽपरा अन्याः सरितः प्रवर्त्तयामासुः । एतेन गजसम्पत्तिरुक्ता । अत्र नदीनां समस्थलत्वासम्बन्धे मदाम्बूनाञ्च सरित्वासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिरिति सजातीयसङ्करः ॥ ६० ॥

पद्मैरिति । पद्मैरनन्वीता अप्राप्ता वधूमुखस्य द्युत् शोभाभिस्ताः वधूमुखश्रीजितपद्मा इत्यर्थः । अन्वीतेति ईङ् गताविति धातोः कर्मणि क्तः । हंसैरातपत्रजां छत्रजन्यां श्रियं न गता अगताः आतपत्रजितहंसश्रीका इत्यर्थः । निम्नगामयः शैलोपमामतीताः

स्निग्धाञ्जनश्यामतनूभिरुन्नतै
निरन्तराला करिणां कदम्बकैः ।
सेना सुधाक्षालितसौधसम्पदां
पुरां बहूनां परभागमाप सा ॥ ६२ ॥
प्रासादशोभातिशयालुभिः पथि
प्रभोर्निवासाः पटवेश्मभिर्बभुः ।
नूनं सहानेन वियोगविक्लवा
पुरः पुरश्रीरपि निर्ययौ तदा ॥ ६३ ॥

शिलासाम्यमतिक्रान्ता गजा यस्मिन् तस्य गच्छतो भोजबलस्य यादव सैन्यस्य दूरेऽभवन् अतिव्यवहितादित्यर्थः । अपकृष्टास्तेति गम्यते तदभेदाध्यवसायेनैव शिलागाणां दूरभवनस्य तद्विशेषणपदार्थहेतुकत्वात् श्लेषमूलातिशयोक्तिसमुत्थापितः काव्यलिङ्गभेदः ॥ ६१ ॥

स्निग्धेति । स्निग्धाञ्जनमिव श्यामाभिस्तनूभिरुन्नतैः करिणां कदम्बकैर्निरन्तराला नीरन्ध्रा सा सेना सुधया लेपनविशेषेण क्षालिता धवलिताः सौधसम्पदो यासान्तासां । लेपभेदेऽमृते सुधेति वैजयन्ती । बहूनां पुरां पुरीणां परभागं विप्रकृष्टदेशमाप दूरमतीत्य गतेत्यर्थः वर्णोत्कर्षश्च परभागः । तदभेदाध्यवसायेन परभागप्राप्तौ विशेषणगत्या श्यामकरिकदम्बकैरन्तर्यस्य हेतुत्वात्पूर्ववत्काव्यलिङ्गभेदः ॥ ६२ ॥

प्रासादेति । पथि मार्गे प्रभोः कृष्णस्य निवासाः सेनानिवेशाः प्रासादशोभामतिशयालुभिरतिशायकैः । आलुचि शीङ् ग्रहणमपि कर्त्तव्यमित्यालुच्प्रत्ययः । पटवेश्मभिः पटवस्त्रैर्बभुः ।

वर्ष्मद्विपानां विरुवन्त उच्चकै-
र्वनेचरेभ्यश्चिरमाचचक्षिरे।
गण्डस्थलाघर्षगलन्मदोदक-
द्रवद्रुमस्कन्धनिलायिनोऽलयः ॥ ६४ ॥
आयामवद्भिः करिणां घटाशतै-
रधःकृताट्टालकपङ्क्तिरुच्चकैः।
दूष्यैर्जितोदग्रगृहाणि सा चमू-
रतीत्य भूयांसि पुराण्यवर्त्तत ॥ ६५ ॥

तेनोत्प्रेक्ष्यते । तदा द्वारकानिर्याणकालेऽनेन कृष्णेन सह वियोग विक्लवा विरहभीरुः पुरश्रीर्द्वारकानगरलक्ष्मीरपि पुरोऽये निर्य्ययौ निर्गता । नूनं द्वारकातोऽन भिद्यन्ते अस्य निवासाः शोभयेति भावः ॥ ६३ ॥

वर्ष्मेति । गण्डस्थलानामाघर्षेण मर्दनेन गलता स्रवता मदोदकेन द्रवेषु आर्द्रेषु द्रुमस्कन्धेषु निलीयन्त इति निलायिनस्तन्निवासिनः उच्चकैर्विरुवन्तो गुञ्जन्तोऽलयः द्विपानां सेनागजानां वर्ष्म प्रमाणं । वर्ष्म देहप्रमाणयोरिति विश्वः । वनेचरेभ्यः किरातेभ्यः चिरमाचचक्षिरे इयन्तो गजा इत्याख्यातवन्त इत्यर्थः । गजवर्ष्मानुमापकेष्वलिषु विरावयोगादाख्यानमुत्प्रेक्ष्यते । वाचकाप्रयोगाद्गम्योत्प्रेक्षा ॥ ६४ ॥

आयामेति । आयामो दैर्घ्यं सोऽस्ति येषां तद्वद्भिरायतैरित्यर्थः । करिणां सम्बन्धिभिर्घटाशतैर्व्यूहशतैः । करिणां घटना घटेत्यमरः । अधःकृतास्तिरस्कृता अट्टालकपङ्क्तयोऽट्टश्रेणयो

उद्धूतमुच्चैर्ध्वजिनीभिरंशुभिः
प्रतप्तमभ्यर्णतया विवस्वतः ।
आह्लादिकह्लारसमीरणाहते
पुरः पपाताम्भसि यामुने रजः ॥ ६६ ॥

सा । अट्टालस्त्वट्टालकः स्मृत इति वैजयन्ती । सा चमूरुच्चकैरुन्नतैः दूष्यैः पटमण्डपैः जितान्युच्चाणि गृहाणि येषां तानि भूयांसि पुराणि अतीत्यावर्त्तत अतिक्रम्य गतेत्यर्थः शोभया अतिशय्य स्थितेति च गम्यते । तदभेदाध्यवसायेन श्लेषमूलातिशयोक्त्युत्थापितं पूर्ववत् पदार्थहेतुकं काव्यलिङ्गम् ॥ ६५ ॥

अथ हरिसेनाः कालिन्दीं प्रत्यासेदुरित्याह । उद्धूतमिति । ध्वजिनीभिः सेनाभिरुच्चैरुद्धूतं ऊर्द्ध्वं क्षिप्तं । अतएव अभ्यर्णतया अन्तिकतया । उपकण्ठान्तिकाभ्यर्णमित्यमरः । विवस्वतोंऽशुभिः । प्रतप्तं प्रतप्तमिवेत्यर्थः । अतएव व्यञ्जकाप्रयोगाद्गम्योत्प्रेक्षा । आह्लादिनमाह्लादकाये कह्लारसमीरणाः सौगन्धिकमारुताः । सौगन्धिकं तु कह्लारमित्यमरः । तैराहते कम्पिते यामुने यमुनासम्बन्धिन्यम्भसि पुरोऽग्रे रजो धूलिः पपात । सन्तप्ता हि सन्तापमसहमानाः पुरो धावित्वा क्वचन शिशिरे पयसि पतन्तीति भावः ॥ ६६ ॥

अथ चतुर्भिर्यमुनां वर्णयति । येत्यादि । या यमुना घर्मभानोरुष्णांशोस्तनयापि सती शीतलैरपि अपिर्विरोधे सचोष्णा जातायाः शैत्यानुपपत्तेरिति भावः । यमस्यान्तकस्य स्वसापि जनस्य जीवनैरुदकैः अप्राणैकोदराणां भिन्नक्रियानुपपत्तेर्विरोधः ।

या घर्म्मभानोस्तनयापि शीतलैः
स्वसा यमस्यापि जनस्य जीवनैः ।
कृष्णापि शुद्धेरधिकं विधातृभि
र्विहन्तुमंहांसि जलैः पटीयसी ॥ ६७ ॥
यस्यामहानीलतटीरिव द्रुताः
प्रयान्ति पीत्वा हिमपिण्डपाण्डुराः ।
कालीरपस्ताभिरिवानुरञ्जिताः
क्षणेन भिन्नाञ्जनवर्णतां घनाः ॥ ६८ ॥

कालिन्दी सूर्य्यतनया यमुना शमनस्वसेत्युभयत्राप्यमरः । किञ्च । कृष्णा कृष्णवर्णा मलिना च तथापि शुद्धेर्वैमल्यस्याधिकं विधातृभिः सम्पादकैर्जलैरंहांसि पापानि विहन्तुं पटीयसी सम र्थतरा । अत्र यमुनातज्जलगतत्वेन निर्दिष्टयोर्गुणक्रिययोर्विरोधेन त्रिषु विरोधेषु संसृष्टेषु तृतीयः कृष्णेति श्लेषप्रतिभोत्थापित इति सङ्क्षेपः ॥ ६७ ॥

यस्यामिति । हिमपिण्डपाण्डुरा हिमसङ्घशुभ्राः घना मेघाः द्रुता द्रवीकृताः महानीलतटीः इन्द्रनीलस्थलानीव कालीः कृष्ण वर्णाः । जानपदेत्यादिना ङीप् । यस्याः कालिन्द्याः अपः पीत्वा ताभिः पीताभिरद्भिरनुरञ्जिता इव क्षणेन भिन्नाञ्जनवर्णतां स्नेहमर्दितकज्जलवर्णतां प्रयान्ति । अत्र तटीरिवानुरञ्जिता इवेति चोत्प्रेक्षया सङ्कीर्णेयं घनानामञ्जनोपमेति सङ्करः ॥ ६८ ॥

व्यक्तमिति । हेतुर्युक्तिरनुमानमिति यावत् । आगमाद्गङ्गा सागरपूरिणीत्यागमप्रमाणात् । बलीयान् यदि प्रबलश्चेत् सा

व्यक्तं बलीयान्यदि हेतुरागमा
दपूरयत्सा जलधिं न जाह्नवी ।
गाङ्गौघनिर्भर्त्सितभस्मकन्धरा
सवर्णमर्णः कथमन्यथास्य तत् ॥ ६९ ॥
अभ्युद्यतस्य क्रमितुं जवेन गां
तमालनीला नितरां धृतायतिः ।
सीमेव सा तस्य पुरः क्षणं बभौ
बलाम्बुराशेर्महतो महापगा ॥ ७० ॥

॥ कलापकम् ॥

यमुना जलधिमपूरयत् । जह्नोरपत्यं स्त्री जाह्नवी नापूरयत् । व्यक्तं सत्यं इत्युत्प्रेक्षा । कुतः । अन्यथा विपर्यये अस्य जलधेः तत्प्रसिद्धमर्णोऽम्भः । अम्भोऽर्णस्तोयपानीयमित्यमरः । गाङ्गेन गङ्गासम्बन्धिना ओघेन प्रवाहेन निर्भर्त्सितायाः निर्भर्त्सीकृतायाः भस्मकन्धरायाः हरकण्ठस्य सवर्णं समानवर्णं कृष्णवर्णमित्यर्थः । ज्योतिर्जनपदेत्यादिना समानस्य सभावः । अन्यथा गाङ्गौघस्य धावल्यादुज्ज्वलमेव स्यात् । तथा च यावाप्तवचनवाक्यवदागमोऽप्यन्यथा नेयइति कवेराशयः ॥ ६९ ॥

अभीति । तमालवत् नीला कृष्णा नितरां धृतायतिरत्यन्तं कृतदैर्घ्या सा महापगा महानदी यमुना । जवेन गां भुवं क्रमितुमाक्रमितुं । अभ्युद्यतस्योद्युक्तस्य तस्य महतो बलाम्बुराशेः सेनासमुद्रस्य पुरोऽग्रे क्षणं सीमेव वेलेव बभावित्यु

लोलैररित्रैश्चरणैरिवाभितो
जवाद्व्रजन्तीभिरसौ सरिज्जनैः ॥
नौभिः प्रतेरे परितः स्रवोदित
भ्रमीनिमीलज्जलनावलम्बितैः ॥ ७१ ॥
तत्पूर्व्वमंसद्वयसन्द्विपाधिपाः
च्षणं सहेलाः परितोजगाहिरे ।
सद्यस्ततस्तेरुरनारतस्नुत
स्वदानवारिप्रचुरीकृतम्पयः ॥ ७२ ॥

त्प्रेच्चा । च्षणमिति च्षणमात्रनिरोधिकाऽभवदनन्तरमेव तरणादिति भावः ॥ ७० ॥

लोलैरिति । अभितः उभयतो लोलैश्चलद्भिररित्रैः केनिपातक दण्डैः । चेपणी स्यादरित्रं केनिपातकइत्यमरः । चरणैः पादै रिवेत्युत्प्रेच्चा । जवात् व्रजन्तीभिर्गच्छन्तीभिर्नौभिः साधनैरसौ सरिद्यमुना कर्म्म स्रवेनोदिता नौवेगेनोत्पन्ना भ्रमी भ्रान्तिः तस्याभयान्निमीलन्तीभिर्भयादच्चिनिमीलनं कुर्व्वतीभिर्ज्जलनाभि रवलम्बितैर्जनैः कर्त्तृभिः परितः सर्व्वतः । सर्व्वोभयार्थे वर्त्तमानाभ्यां पर्य्यभिभ्यां तसिविधानात् । प्रतेरे प्रतीर्णा ॥ ७१ ॥

तत्पूर्व्वमिति । द्विपाधिपामहागजाः । पूर्व्वं प्रथमं अंसो प्रमाण मस्य अंसद्वयसं अंसप्रमाणं तेषां तथोन्नतत्वादिति भावः । प्रमाणे द्वयसजिति द्वयसच्प्रत्ययः । तत्तथाऽगम्भीरं पयोयमुनाजलं सहेलाः सावज्ञाः । परितोजगाहिरे प्रविशन्ति स्म । ततः प्रवेशानन्तरं सद्यः अविलम्बेन अनारतमविच्छिन्नं स्नुतेन स्रवता

प्रोथैः स्फुरद्भिः स्फुटशब्दमुन्मुखै
स्तुरङ्गमैरायतकीर्णबालधि ।
उत्कर्णमुद्दाहितधीरकन्धरै
रतीर्यताग्रे तटदत्तदृष्टिभिः ॥ ७३ ॥
तीर्त्त्वा जवेनैव नितान्तदुस्तरां
नदीम्प्रतिज्ञामिव ताङ्गीयसीम् ।
प्रटङ्कैरपस्कीर्णमहत्तटीभुवा
मशोभतोच्चैर्नदितङ्ककुद्मताम् ॥ ७४ ॥

स्वदामताविणा स्वमदोदकेन प्रचुरीकृतं बहुलीकृतं तत्पयस्तेरुः तरन्ति स्म । अत्रातिगम्भीरस्याप्यम्भसोऽसद्भावातिशयोक्त्या गजानामौन्नत्यं पुनस्तस्यैव तन्मदाम्बुसम्भेदतात्पर्योक्त्या तेषां मदातिरेकस्य व्यज्यते ॥ ७२ ॥

प्रोथैरिति । स्फुटशब्दं स्पष्टध्वानं यथा तथा स्फुरद्भि श्चलद्भिः प्रोथैर्घोणाभिरुपलक्षितैः । घोणा तु प्रोथमस्त्रियामित्य मरः । उन्मुखैरूर्द्ध्वमुखैस्तथा उत्कर्णमुन्नमितकर्णं यथा तथा उद्दाहिताः ऊर्द्ध्वं प्रसारिताधीरानिश्चलाः कन्धराग्रीवायेषान्तै रग्रे पुरः तटे दत्तदृष्टिभिस्तुरङ्गमैरायताः प्रसारिताः कीर्णा विक्षिप्ताबालधयोयस्मिन् कर्मणि तद्यथा तथा अतीर्यत अतारि नदीति शेषः । कर्मणि लङि यक् । स्वभावोक्तिः ॥ ७३ ॥

तीर्त्त्वेति । नितान्तदुस्तरामतिमहत्तया अत्यन्ताशक्यतरणां तां नदीं गरीयसीमतिदुस्तरां प्रतिज्ञामिव जवेन वेगेनैव तीर्त्त्वा । प्रटङ्कैर्विषाणैरपस्कीर्णा आलेखितामहत्यस्तटीभुवस्तीरप्रदेशा

सीमन्त्यमाना यदुभूभृतामलै-
र्बभौ तरङ्गैर्गवलासितद्युतिः ।
सिन्दूरितानेकपकङ्कणाङ्किता
तरङ्गिणी वेणिरिवायता भुवः ॥ ७५ ॥
अव्याहतक्षिप्रगतैः समुच्छ्रिता
ननुज्झितद्राघिमभिर्गरीयसः ।
नाव्यम्पयः केचिदतारिषुर्भुजैः
क्षिपद्भिरूर्मीनपरैरिवोर्मिभिः ॥ ७६ ॥

स्तेषां । अपाद्यतुम्प्राच्छकुनिम्बाखेखनदति किरतेः कात्पूर्वतः सुडागमः । ककुद्मतामुन्नतानामुच्चैस्तरं नदित नादः अशोभत । उपमासङ्कीर्णा स्वभावोक्तिः ॥ ७४ ॥

सीमन्त्यमानेति । तरङ्गिणी यदुभूभृतां यादवभूपानामलैः सैन्यैः सीमन्त्यमाना सीमन्तवतीक्रियमाणा । सीमन्तवच्छब्दात्तत्करोतीति ण्यन्तात् कर्मणि लटः शानजादेशः णाविष्ठवद्भावादिन्मतो लुक् । गवलासितद्युतिः माहिषविषाणमेचकप्रभा । गवलं माहिषं शृङ्गमित्यमरः । सिन्दूरिताः सिन्दूरवत्कृताः । सिन्दूरवच्छब्दात्तत्करोतीति ण्यन्तात्कर्मणि क्तः णाविष्ठवद्भावादिन्मतोर्लुक् । तैरनेकपैर्द्विपैः कङ्कणैः शेखरैः अङ्किता चिह्निता । कङ्कणं शेखरे हस्तसूत्रमण्डनयोरपीति विश्वः । तरङ्गिणी यमुना नदी आयता दीर्घा भुवो वेणिरिव बभौ इत्युत्प्रेक्षा ॥ ७५ ॥

अव्याहतेति । अत्रोर्मीणां भुजानां विशेषणान्युभयविपरिणामेन योज्यानि । केचिज्जनाः नावा तार्यं नाव्यं । नाव्यं त्रिलिङ्गं नौ तार्यमित्यमरः । नौवयोधर्मेत्यादिना यत्प्रत्ययः । पयोजलं

विदलितमहाकूलामुच्चां विषाणविघट्टनै-
रलघुचरणाकृष्टग्रावां विषाणिभिरुन्मदैः ।
सपदि सरितं सा श्रीभर्त्तुर्बृहद्रथमण्डलैः
स्खलितसलिलामुल्लङ्घ्यैनां जगाम वरूथिनी ॥ ७७ ॥

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
प्रयाणवर्णनोनाम द्वादशः सर्गः ॥ १२ ॥

अत्याहतचिप्रगतैरप्रतिहतशीघ्रगमनैरनुच्छ्रितोच्चाधिमा दैर्घ्यं येषां तैरतिदीर्घैरित्यर्थः । समुच्छ्रितानुन्नतान् गरीयसोगुरुतरान् ऊर्मीन् क्षिपद्भिरपाकुर्वद्भिरतएवापरैरूर्मिभिरिव स्थितैरित्युत्प्रेक्षा । भुजैर्बाहुभिरतारि पुस्तरन्ति स्म । तरतेर्लुङि चिणि वृद्धिरिडागमः ॥ ७६ ॥

विदलितेति । सा प्रकृता श्रीभर्त्तुः कृष्णस्य वरूथिनी सेना उच्चामनुच्चां विषाणविघट्टनैः शृङ्गाघातैर्विदलितानि महाकूलानि यस्यास्तां उन्मदैरुद्धृतमदैर्विषाणिभिरलघुभिर्गुरुभिश्चरणैः पादैराकृष्टावधिर्नीताः ग्रावाणो यस्यास्तां बृहद्भी रथमण्डलैरथसमूहैः स्खलितानि व्याकुलीकृतानि सलिलानि यस्यास्तामेनां सरितं यमुनां सपदि उल्लङ्घ्य जित्वा तीर्त्वेत्यर्थः । भक्त्वेति गम्यते विशेषणसामर्थ्यात् । जगाम । अत्र अयस्य विशेषणगत्या कूलदलनादिहेतुकत्वात्काव्यलिङ्गभेदः । हरिणी वृत्तम् । भवति हरिणी न्सौ म्रौ स्लौ गोरसाम्बुधिविष्टपैरिति लक्षणात् ॥ ७७ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां माघकाव्यव्याख्यायां सर्वङ्कषाख्यायां द्वादशः सर्गः ॥ १२ ॥

यमुनामतीतमथ शुश्रुवानमु
मपसस्तनूजइति नाधुनोच्यते।
स यदाऽचलन्निजपुरादहर्निशं
नृपतेस्तदादि समचारि वार्त्तया ॥ १ ॥
यदुभर्त्तुरागमनलब्धजन्मनः
प्रमदाद्मानिव पुरे महीयसि।
सहसा ततः स सहितोऽनुजन्मभि
र्वसुधाधिपोऽभिमुखमस्य निर्ययौ ॥ २ ॥

यमुनामिति । अथ यमुनातरणानन्तरं तपसस्तनूजो धर्म्म नन्दनः। अधुना यमुनामतीतं अमुं हरिं शुश्रुवान् । भाषायां सदवसश्रुवइति क्वसुप्रत्ययः । इति नोच्यते किन्तु स हरिर्यदा निजपुरादचलत् तच्चलनमादिर्यस्मिन् कर्म्मणि तत्तदादि तत्प्रभृति । अहश्च निशा च अहर्निशं । समाहारे द्वन्द्वैकवद्भावे अत्यन्तसंयोगे द्वितीया। नृपतेर्धर्म्मराजस्य वार्त्तया इह निविष्ट इतोनिर्गतइति वृत्तान्तेन समचारि सञ्चरितमागतमिति यावत्। भावे लुङ्। सन्निहितयमुनातरणवृत्तान्तवद्व्यवहितसकलदेशस्थित वृत्तान्तोनिजनगरप्रस्थानात्प्रभृति प्रतिक्षणमागतएवेत्यर्थः । अस्मिन्सर्गे मञ्जुभाषिणी वृत्तम् । सजसजागौ भवति मञ्जु भाषिणीति लक्षणात् ॥ १ ॥

यदुभर्त्तुरिति । ततोहरेर्यमुनोत्तरणश्रवणानन्तरं स वसुधा धिपोधर्म्मराजः। यदुभर्त्तुः हरेरागमनेन लब्धजन्मनोलब्धोदयात् जातादित्यर्थः। प्रमदाद्धर्षात् । प्रमदसम्मदौ हर्षे इत्यमरस्याप्यन्तो

रभसप्रवृत्तकुरुचक्रदुन्दुभि
ध्वनिभिर्जनस्य बधिरीकृतश्रुतेः ।
समवादि वक्तृभिरभीष्टसङ्कथा
प्रकृतार्थशेषमथ हस्तसंज्ञया ॥ ३ ॥

निपातः । महीयस्यति विपुलेऽपि पुरे अमान् हर्षकृतशरीर वृद्धेरिवापरिमितविकाशः सन्नित्युत्प्रेक्षा । सहसा अनुजन्मभिरनुजैः सहितोऽस्य हरेरभिमुखं निर्ययौ नगरान्निर्गत इत्यर्थः ॥ २ ॥

रभसेति । रभसो हर्षः । रभसो वेगहर्षयोरिति विश्वः । तत्र प्रवृत्तैः कुरुचक्रदुन्दुभिध्वनिभिः कौरवसेनातूर्यघोषैः बधिरीकृतश्रुतेर्विकलीकृतश्रोत्रेन्द्रियस्य । श्रोतृजनस्य वक्तृभिः कथकैरभीष्टसङ्कथाखिष्टलापेषु प्रकृतस्य वक्तुं प्रक्रान्तस्याभिधेयस्य शेषं वक्तव्यावशिष्टम् अथ बाधिर्यानन्तरं हस्तसंज्ञया हस्तसङ्केतेन समवादि संवादितम् । श्रीकृष्णस्यागमनसन्तोषात्तथा दुन्दुभीनाजघ्नुः यथा कण्ठोक्तशेषङ्करसंज्ञया निष्पाद्यत इत्यर्थः । अत्र बधिरीकरणस्य जनविशेषणद्वारा हस्तसंज्ञया वदनहेतुत्वात्काव्यलिङ्गभेदः ॥ ३ ॥

अपदेति । द्रुतं शीघ्रं । भ्रमिताः परिवर्त्तिताः हेमनेमयः कनकचक्रान्ता येषान्ते । चक्रधारा प्रधिर्नेमिरिति हलायुधः । अतएव जविना वेगवता मारुतेनाञ्चितानि कम्पितानि परस्परमुपमान्तीति परस्परोपमानि अन्योन्यसदृशानि क्षितिरेणुकेतुवसनानि स्वोत्थापितभूरेणवः स्वारोपितध्वजपटाश्च येषान्ते क्षितिं क्षियन्तीशते इति क्षितिक्षितः । क्षितीशाः क्षि ऐश्वर्ये वासे इति

अपदान्तरञ्च परितः क्षितिक्षिता
मपतन् द्रुतभ्रमितहेमनेमयः ।
जविमारुताञ्चितपरस्परोपम
क्षितिरेणुकेतुवसनाः पताकिनः ॥ ४ ॥

द्रुतमध्वनन्नुपरि पाणिवृत्तयः
पणवा इवाश्वचरणक्षताभुवः ।
ननृतुश्च वारिधरधीरवारण
ध्वनिहृष्टकूजितकलाः कलापिनः ॥ ५ ॥

धातोस्तौदादिकात् क्विपि तुक् । क्षितिपतिष्वेवासौ क्षितिक्षित् इति भट्टमल्लः । तेषां सम्बन्धिनः पताकाः सन्तीति पताकिनो रथाः । व्रीह्यादित्वादिनिः । परितः सर्व्वतः नास्ति पदस्यान्तर मवकाशो यस्मिन् कर्म्मणि तदपदान्तरं संसक्तं यथा तथा । संसक्ते त्वव्यवहितमपदान्तरमित्यपीत्यमरः । अपतन्नधावन् । अत्र राज वर्णने रेणूनां केतूनां च प्रकृतत्वात्केवलप्रकृतास्पदा तुल्य योगिता । तथा च परस्परोपमेति विशेषणाद्रेणुवत्केतवः केतुव च्च रेणवइति उपमेयोपमया के रेणवः के केतवः इति संशयश्च व्यज्यते इत्यलङ्कारेणालङ्कारध्वनिः ॥ ४ ॥

द्रुतमिति । अश्वचरणक्षताः तुरगखुरघट्टिताः भुवः उपरि पृष्ठभागे पाणिवृत्तयः पाणिताडनानि येषान्ते उपरि पाणिवृत्तयः पणवाख्यावित्रेषाइवेत्युपमा । द्रुतं द्रुततरमेवाध्वनन् ध्वनन्ति स्म । द्रुतं शीघ्रमित्यमरः । वारिधरशब्देन तद्गर्ज्जितं लक्ष्यते । तद्वद्धीरैर्गम्भीरैर्वारणध्वनिभिर्गजबृंहणैर्हृष्टास्ततएव कूजितकलाः

अजतोरपि प्रणयपूर्व्वमेकतां
कुकुराधिनाथकुरुनाथसैन्ययोः ।
ररुषे विषाणिभिरनुक्षणम्मिथो
मदमूढबुद्धिषु विवेकिता कुतः ॥ ६ ॥

कूजितादित्यर्थः । ततो विशेषणसमासः । कलापाः येषां सन्तीति कलापिनो बर्हिणस्ते नन्दतुर्नृत्यन्ति स्म । अत्रोपमयोः संसृष्टिः वारिधरोपमया कलापिनां गजबृंहितेषु घनगर्जितभ्रान्तिमन्तरेण नृत्यासम्भवात् भ्रान्तिमदलङ्कारो व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः ॥ ५ ॥

अजतोरिति । तदा तस्मिन्समये कुकुराधिनाथकुरुनाथसैन्ययोः हरिपार्थसैन्ययोः प्रणयपूर्व्वं स्नेहपूर्व्वकमेकतामैक्यं अजतोर्गच्छतोः सतोरपि विषाणिभिरभयसेनावर्त्तिभिः गजैरनुक्षणं प्रतिक्षणं मिथः परस्परं ररुषे चुक्रुधे । भावे लिट् । तथाहि मदेन मूढबुद्धिषु विपरीतप्रज्ञेषु विवेकिता कार्य्याकार्य्यविचारिता कुतः नास्त्येवेत्यर्थः । अथ तेषां स्वामिसौहार्देऽपि स्वयं विरोधिता न दोषायेति भावः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ६ ॥

अवलोक इति । दूरतो दूरादेवाव लोके हरेर्दर्शन एव रभसा हर्षाद्रथादवतरीतुमवरोढुम् । वृतोवेति विकल्पाद्दीर्घः । इच्छतोन्नृपतेर्धर्मराजात् प्रथमं तदवतरणात्पूर्व्वमेवेत्यर्थः । आत्मना स्वयमेव । प्रकृत्यादिभ्यस्तृतीया । अवतीर्णवान् रथादवरूढः सन् । निष्ठेति तरतेः क्तवतुप्रत्ययः । ऋतइद्धातोरितीत्वं

अवलोकएव नृपतिः स्म दूरतो
रभसाद्रथादवतरीतुमिच्छतः ।
अवतीर्णवान् प्रथममात्मना हरि
र्विनयं विशेषयति सम्भ्रमेण सः ॥ ७ ॥
वपुषा पुराणपुरुषः पुरः क्षितौ
परिपुञ्जयमानपृथुहारयष्टिना ।
भुवनैर्नतोऽपि विहितात्मगौरवः
प्रणनाम नाम तनयम्पितृष्वसुः ॥ ८ ॥

र्वोरुपधाया दीर्घः रदाभ्यामिति निष्ठानत्वे रषाभ्यामिति णत्वम् । स हरिः संभ्रमेण त्वराविशेषेण विनयं मार्गोद्भूत्यं विशेषयति स्म । अतिशाययति स्म । एतेन हरेः पूज्यविषयोरत्याक्षोभावो ध्वन्यते ॥ ७ ॥

वपुषेति । पुराणपुरुषः हरिः । सर्व्वलोकज्येष्ठोऽपीति भावः । तथा भुवनैर्नतोनमस्कृतोऽपि विहितं सम्पादितमात्मनोगौरव मुत्कर्षोयेन स सन् पूज्येषु नमस्यायाश्चात्मत्यहेतुत्वादिति भावः । अतएवात्र विचित्रालङ्कारः । विचित्रं स्वविरुद्धस्य फलस्य स्यात्मनु द्यमइति लक्षणात् । पुरः क्षितावग्रभूमौ परिपुञ्जमाना परितः पुञ्जीक्रियमाणा पृथुः स्थूलोहारोमुक्तावलिर्यष्टिरिव यस्य तेन वपुषा शरीरेण । न तु अञ्जलिमात्रेण तथास्य पूज्यत्वादिति भावः । पूज्यत्वे हेतुमाह । पितृष्वसुस्तनयमिति पितृभगिनीपुत्रं धर्म्म राजमित्यर्थः। विभाषा स्वसृपत्योरित्यलुक् षोपदेशस्येति षत्वम् । अत्रापि पूर्व्ववत् भावध्वनि । भुवनैर्नतोऽपि हरिर्लोकयात्रानु

मुकुटांशुरञ्जितपरागमग्रतः
स न यावदाप शिरसा महीतलम् ।
क्षितिपेन तावदनपेक्षितक्रम
भुजपञ्जरेण रभसादगृह्यत ॥ ९ ॥

न ममौ कपाटतटविस्तृतन्तनौ
मुरवैरिवक्षउरसि क्षमाभृजः ।
भुजयोस्तथापि युगलेन दीर्घयो
र्विकटीकृतेन परितोऽभिषस्वजे ॥ १० ॥

वर्त्ता स्वयमेनं नतवानिति विरोधाभासोऽलङ्कारो विचित्रेणोक्तेन भङ्गीर्षः नाममनामेति वृत्त्यनुप्रासभेदस्य संसृष्टरत्थाद्यूह्यम् ॥ ८ ॥

मुकुटेति । स हरिर्मुकुटांशुभिः रञ्जितः स्ववर्णमापादितः परागोरेणुर्यस्य तदग्रतः पुरतोमहीतलं शिरसा यावन्नाप नास्पृशदित्यर्थः तावत् क्षितिपेन धर्मराजेनानपेक्षितक्रम अनपेक्षितः क्रमः परिपाटी यस्मिन् कर्मणि तत्तथा । भुजाभ्यामेव पञ्जरेण इति रूपकं रभसाद्वेगादगृह्यत गृहीतः प्रणामक्रियासमाप्तेः प्रागेवोत्थाप्याश्लिष्टवानित्यर्थः ॥ ९ ॥

नेति । कपाटतटविस्तृतं मुरवैरिणोहरेर्वक्षः स्तनान्तरे । क्षमाभृजोधर्मराजस्योरसि न ममौ न परिमितमित्यर्थः । तथापि विकटीकृतेन विपुलीकृतेन दीर्घयोर्भुजयोर्युगलेन परितः समन्तात् अभिषस्वजे आलिङ्गितं वक्षसा भुजाभ्यां च कथञ्चित्परिच्छिन्नमभूत् न तु वक्षसैवेत्यर्थः । सदिस्वञ्जेत्राः परस्य लिटीति धातुसकारस्य षत्वनिषेधात् स्वादिसंऽप्यभ्यासस्यैव षत्वम् । अत्र

गतया निरन्तरनिवासमध्वरः
परिनाभि नूनमवमुच्य वारिजम्।
कुरुराजनिर्दयनिपीडनाभया
मुखमध्यरोचि मुरविद्विषः श्रिया ॥ ११ ॥

हरिवक्षसेत्यत्रोत्प्रेक्षादतिशयोक्तेनाय सम्बन्धेऽसम्बन्धरूपातिशयोक्तिश्च। अनयोश्च स्वतःसिद्धकविप्रौढोक्तिसिद्धयोरप्यतिशययोरभेदाध्यवसायादुत्थापनमिति रहस्यम् ॥ १० ॥

गतयेति। नाभ्यां परिनाभि। विभक्त्यर्थेऽव्ययीभावः। वारिजं नाभिकमलमित्यर्थः। अवमुच्य विहाय अध्वरउरसि। विभक्त्यर्थेऽव्ययीभावः। निरन्तरं सततं गतया प्राप्तया श्रिया शोभया रमया च नाभिसरोजत्यागेनाच निवासेन तस्मादपहत मिति ध्वनितं कुरुराजस्य या निर्दयनिपीडना गाढाश्लेषरूपा ततोभयान्मुरवैरिणोमुरद्विषोमुखमध्यरोचि अधिरूढम्। भीता ह्युच्चमारोहन्तीति लोकवेदयोः प्रसिद्धमिति भावः नूनमित्युत्प्रेक्षा। अत्र वाच्यायाः सुहृदाश्लेषप्रभवायाः शोभायाः श्रियेति श्लेषमहिम्ना प्रतीयमानया रमया सहाभेदाध्यवसायात् क्रमेण नाभिमुखकमलाधारसम्बन्धाभिधानात् श्लेषमूलातिशयोक्त्युत्थापितः पर्यायभेदः। क्रमेणैकमनेकस्मिन्नाधारे वर्त्तते यदि। एकस्मिन्नथ वानेकम्पर्यायालङ्कृतिर्मतेति लक्षणात्। तदुपजीविता श्रीमुखारोहणस्य भयहेतुकत्वकथनादुत्प्रेक्षेति अनयोरङ्गाङ्गिभावेन सङ्करः ॥ ११ ॥

शिरसि स्म जिघ्रति सुरारिबन्धने
छलवामनं विनयवामनन्तदा ।
यशसेव वीर्य्यविजितामरद्रुम
प्रसवेन वासितशिरोरुहे नृपः ॥ १२ ॥

सुखवेदनाहृषितरोमकूपया
शिथिलीकृतेऽपि वसुदेवजन्मनि ।
कुरुभर्त्तुरङ्गलतया न तत्यजे
विकसत्कदम्बनिकुरम्बचारुता ॥ १३ ॥

शिरसीति । नृपो धर्म्मराजः सुरारिबन्धने पुरा बलिबन्धने छलवामनं कपटवामनं तदा पार्थोपपत्तिसमये तु विनयवामनं विनयनम्रमित्यर्थः । तं हरिमिति शेषः वीर्य्यविजितामरद्रुम प्रसवेन पारिजातहरणे शौर्य्यलब्धपारिजातकुसुमेन यशसेव पारिजातविजयप्रसूतयेव कीर्त्त्येत्युत्प्रेक्षा । वासितशिरोरुहे सुरभितकेशे शिरसि जिघ्रति स्म । प्रवासादेत्य मूर्द्धन्यवघ्राणमिति स्मरणात् । पुरा किल भगवान्सत्यभामाप्रीतये बलादिन्द्रलोका दपहृत्य पारिजातं निजगृहेष्वारोपितवानिति कथानुसन्धेया ॥ १२ ॥

सुखेति । वसुदेवाज्जन्म यस्य तस्मिन्वसुदेवजन्मनि वासुदेवे । जन्मोत्तरपदत्वाद्व्यधिकरणोबहुव्रीहिर्नामनवचनादित्युक्तं प्राक् । शिथिलीकृतेऽपि विश्लेषिते सत्यपि सुखवेदनया आलिङ्गनसुखानु भवेन हृषिताउद्गतारोमकूपारोममूलानि यस्यां तया । हृषे र्लोमस्वितीडागमः । कुरुभर्त्तुर्द्धर्म्मराजस्य अङ्गलतया विकसत्

इतरानपि क्षितिभुजोऽनुजन्मनः
प्रमनाः प्रमोदपरिफुल्लचक्षुषः।
स यथोचितञ्जनसभाजनोचितः
प्रसभोद्धृतासुरसभोऽसभाजयत् ॥ १४ ॥

कदम्बनिकुरम्बस्य कदम्बकुसुमसमूहस्य चारुता कामनीयकं न तत्पुष्पे न त्यक्ता किन्तु स्वीकृतेत्यर्थः। आश्लेषापगमेऽपि तज्जन्म सुखानुवृत्त्या तत्कार्य्यस्य रोमहर्षस्यानुवृत्तिरिति तात्पर्य्यार्थः। अतएव शिथिलीकृते हर्षितरोमकूपयेत्यकारणकार्य्यकथना द्विभावना तदपेक्षया चेयमुत्पन्ना कदम्बनिकुरम्बचारुतानिदर्शना तया सहाङ्गेन सङ्कीर्य्यते ॥ १३ ॥

इतरानिति। जनसभाजनोचितः सर्व्वजनसंभावनार्हः प्रसभेन बलात् उद्धृता असुरसभा असुरसङ्घो येन सः प्रमनाः हृष्टचित्तः स हरिः प्रमोदपरिफुल्लचक्षुषोहर्षात्फुल्लनेत्रान् इतरान् भीमादीन् क्षितिभुजोन्नृपस्यानुपश्चाज्जन्म येषां तान् अनुजन्मनः अनुजान् यथोचितं यथार्हमसभाजयत् सभाजयति स्म आलिङ्गनादिभि रानन्दयामासेत्यर्थः। आनन्दनसभाजने इत्यमरः। सभाज प्रीति दर्शनयोरिति धातोश्चौरादिकाल्लङ् ॥ १४ ॥

समिति। तुल्यमहसः समतेजस्कान् शिलाद्दव शिलाभिरिव घनान् दृढान् घनैः पक्षैरिव दीर्घतरबाहुभिः बाहुभिरेव पक्षा शालन्त इति तथोक्तान् एवम्भूतान् क्षितिपतीन् एवम्भूताः क्षिती श्वराः समं युगपदेत्यागत्य। आङ्पूर्व्वादिणः क्त्वापि तुक्। कुलिशात्परेण परतः कुलिशकृतेः पूर्व्वमित्यर्थः। सम्भत्यसम्भावा

समुपेत्य तुल्यमहसः शिलाघनान्
घनपक्षदीर्घतरबाहुशालिनः ।
परिशिश्लिषुः क्षितिपतीन् क्षितीश्वराः
कुलिशात्यरेण गिरयोगिरीनिव ॥ १५ ॥

इभकुम्भतुङ्गघटितेतरेतर
स्तनभारदूरविनिवारितोदराः ।
परिफुल्लगण्डफलकाः परस्पर
म्परिरेभिरे कुकुरकौरवस्त्रियः ॥ १६ ॥

इति भावः । परेणेति विभक्तिप्रतिरूपकमव्ययम् । गिरयो गिरीनिव परिशिश्लिषुः आलिङ्गितवन्तः । उपमा ॥ १५ ॥

इभेति । इभकुम्भाइव ये तुङ्गाः घटिताश्च इतरेतराणां स्तनभारास्तैर्दूरे विनिवारितान्यतिकार्श्याद्स्फुटतया स्थापितान्युदराणि यासान्ताः । स्ताङ्गाचेति विकल्पाद्नोकारः । परिफुल्लगण्डफलकाः हर्षपुलकितगण्डस्थलाः कुकुरकौरवस्त्रियोयादवपाण्डवाङ्गनाः परस्परं परिरेभिरे । आश्लिष्टवत्यः । परिरम्भः परिष्वङ्गश्लेषउपगूहनमित्यमरः । परिफुल्लेति । फुल्लतेः पचाद्यजन्तं न तु फुल्लेति निष्ठान्तं अनुपसर्गादिति कथनाविरोधात् ॥ १६ ॥

रथेति । रथवाजिपत्तिकरिणीभिः समाकुलं सङ्कीर्णं करिणी ग्रहणं पुंगजव्यावृत्त्यर्थं । अतोयुद्धानर्हतया तासामसेनाङ्गत्वान्न द्वन्द्वैकवद्भावः । तदनीकयोः सैन्ययोः । वरूथिनी बलं सैन्यञ्चक्रं चानीकमस्त्रियामित्यमरः । द्वयं मिथस्त्वन्योऽन्यं समगत सङ्गतं ।

रथवाजिपत्तिकरिणीसमाकुल
न्तदनीकयोस्समगत द्वयम्मिथः।
दधिरे पृथक्करिणएव दूरतो
महतां हि सर्व्वमथवा जनातिगम्॥ १७॥

अधिरुह्यतामिति महीभृतोदितः
कपिकेतुनार्पितकरोरथं हरिः।
अवलम्बितैलविलपाणिपल्लवः
श्रयति स्म मेघमिव मेघवाहनः॥ १८॥

गमेर्लुङि समोगम्यृच्छेत्यादिनात्मनेपदं वा गमइति सिचः किवा दनुदात्तोपदेशेत्यादिना अनुनासिकलोपः ह्रस्वादङ्गादिति सकार लोपः। करिणः पुञ्जाः दूरतएव पृथगसङ्गतं दधिरे धृताः स्थापिताइत्यर्थः अथ वा किमत्र चित्रमिति भावः। महतां महा सत्वानां सम्बन्धि सर्व्वं चेष्टितमिति भावः। जनानतिगच्छतीति जनातिगमतिजनं सर्व्वलोकविलक्षणमिति भावः। सामान्येन विशेष समर्थनरूपोऽर्थान्तरन्यासः॥ १७॥

अधीति। हरिरधिरुह्यतां रथआरुह्यतामित्येवं महीभृता धर्म्मराजेनोदितः उक्तः सन्। वदेः कर्म्मणि क्तः वचिस्वपी त्यादिना सम्प्रसारणम्। कपिकेतुनार्ज्जुनेनार्प्पितकरोदत्तहस्तः सन्। अवलम्बितोऽवष्टब्धः ऐलविलस्य कुवेरस्य पाणिपल्लवोयेन सः मेघवाहनइन्द्रोमेघमिव रथं श्रयति स्म आरूढवानित्यर्थः। उपमा॥ १८॥

रथमास्थितस्य च पुराभिवर्त्तिन
स्तिसृणाम्पुरामिव रिपोर्मुरद्विषः।
अथ धर्म्ममूर्त्तिरनुरागभावितः
स्वयमादित प्रवयणम्प्रजापतिः ॥ १९ ॥

रथमिति। किञ्चेति चार्थः अथ रथारोहणानन्तरं रथमास्थितस्या रूढस्य पुराभिवर्त्तिनः इन्द्रप्रस्थाभिवर्त्तिनः त्रिपुराभिवर्त्तिनस्य मुरद्विषो हरेस्तिसृणां पुरां रिपोः त्रिपुरान्तकस्येव। न तिसृचतसृ इति नामि दीर्घप्रतिषेधः। धर्म्ममूर्त्तिर्धर्मात्मा प्रजापतिर्जनेश्वरः धर्म्मराजो ब्रह्मा च अनुरागभावितः सन्। प्रवीयते प्रेर्य्यतेऽनेनेति प्रवयणं प्राजनं प्रतोदइति यावत्। अतएव प्रवयणोदण्डः प्राजनोदण्डइति काशिका। अजेः करणे ल्युट् वा याविति विकल्पादजेर्वीभावः पूर्व्वपदात्संज्ञायामिति णत्वम्। स्वयमादित गृहीतवान् सारथ्यं कृतवानित्यर्थः। ददातेः कर्त्तरि लुङि तङ् स्थाघ्वोरितीकारे सिचः कित्त्वे च ह्रस्वादङ्गादिति सलोपः। अत्र त्रिपुरहरणे ब्रह्मा हरस्येव हरेरयं सारथ्यं चकारेत्युपमा तस्याः प्रजापतिरिति राजब्रह्मणोः श्लेषमूलाभेदाध्यवसायादति शयोक्तिनिर्व्यूढेति सङ्करः ॥ १८ ॥

मनकैरिति। किंचेति चार्थः अथास्य हरेस्तनुषु सूक्ष्मेषु जालकान्तरेषु गवाक्षरन्ध्रेषु स्फुरितस्य प्रसृतस्य चपाकरोत्करस्य शशिकिरणपुञ्जस्याकृतिरिवाकृतिर्यस्य तत्प्रकीर्णकं चामरं निम्नगा पतेः समुद्रस्य पृथु विपुलं फेनकूटं फेनपुञ्जमिव महत.

शनकैरथास्य तनुजालकान्तर
स्फुरितातपाकरकरोत्कराकृति ।
पृथुफेनकूटमिव निम्नगापते
र्मरुतस्य सूनुरधुवत्प्रकीर्णकम् ॥ २० ॥
विकसत्कलायकुसुमासितद्युते
रलघूडुपाण्डु जगतामधीशितुः ।
यमुनाह्रदोपरिगहंसमण्डल
द्युतिजिष्णु जिष्णुरभृतोष्णवारणम् ॥ २१ ॥

सूनुर्भीमसेनः शनकैरधुवत् धुवति स्म । धुवतिरयं तौदादिक इत्युक्तम् । उपमया: सङ्करः ॥ २० ॥

विकसदिति । विकसत्कलायकुसुमं कालपुष्पं । कलायः स्यात् काल इति वैजयन्ती । तद्वदसितद्युतेर्नीलवर्णस्य जगतामधीशितु र्जगन्नाथस्य जिष्णुरर्जुनः अलघूडुपाण्डु स्थूलनक्षत्रधवलं । अत एव यमुनाह्रदस्योपरिगमुपरिगतं । अन्यत्रापि दृश्यते इति ड प्रत्ययः। तस्य हंसमण्डलस्य द्युतिं शोभां जिष्णु जयनशील। ग्लाजिस्थ श्चेति गस्नुच् । उष्णवारणमातपत्रमभृत धृतवान् । भृञः कर्त्तरि लुङ् स्वरितञितइत्यात्मनेपदं झ्लः सिचः किस्वादगुणत्वाद्ध्रस्वादङ्गा दिति सकारलोपः । अत्राप्युपमासङ्करः ॥ २१ ॥

पवनेति। पवनात्मजेन्द्रसुतमध्यवर्त्तिना भीमार्ज्जुनमध्यगतेन रुचिरेण चक्रिणा हरिणा उभयोरर्कं न्ययशाणामन्यतमयोरन्तरे मध्ये स्थित्या वासेन कारितं सम्पादितं । द्वित्वविषये उभशब्दस्य स्थाने ऽप्युभयशब्दस्यैव प्रयोगोव्याख्यातः । दुरधुरेत्याख्या यस्य तत्

पवनात्मजेन्द्रसुतमध्यवर्त्तिना
नितरामरोचि रुचिरेण चक्रिणा ।
दधतेव योगमुभयग्रहान्तर
स्थितिकारितन्दुरुधुराख्यमिन्दुना ॥ २२ ॥
वशिनं क्षितेरयनयाविवेश्वर
न्नियमोयमस्य नियतं यतिं यथा ।
विजयश्रिया वृतमिवार्कमारुता
वनुसस्रतुस्तमथ दस्रयोः सुतौ ॥ २३ ॥

दुरुधुराख्यं योगं दधता अर्कान्यग्रहमध्यगतेनेत्यर्थः । इन्दुनेवे त्युपमा । नितरामतिशयेन । अव्ययादाम्वद्रव्ये इत्यामुप्रत्ययः । अरोचि अशोभि । रोचतेर्भावे लुङ् । स्वभावरमणीयस्यानु रूपान्तरसमायोगाच्छोभातिशयोजायते रत्नकाञ्चनयोरिवेति भावः । अत्र भगवानाचार्यमिहिरः । हित्वार्कं सुनफाऽनफा दुरु धुरा स्वान्त्योभयस्थैर्ग्रहैः शीतांशोरिति । एतदेव स्पष्टीकृतं कल्याणशर्मणा रविवर्जं द्वादशगैरनफा चन्द्राद्द्वितीयगैः सुनफा । उभयस्थितैर्दुरुधुरा केमद्रुमसंज्ञितोऽतोऽन्यइति ॥ २२ ॥

वशिनमिति । अथ भीमार्जुनोपवेशनानन्तरं वशिनमिन्द्रिय जयवन्तं । अव्यसनिनमिति यावत् । क्षितीश्वरं भूपतिं अयः शुभावहोविधिर्नीतिर्नयस्ताविव दैवपुरुषकाराविवेत्यर्थः । नियत मावारनिष्ठं यतिं जितेन्द्रियं । यतिर्नोयतवशेत्यमरः । नियमः शरीरातिरिक्तदेशकालादिसाधनापेक्षः सन्ध्योपासनजपादिः । यमः शरीरमात्रसाधनापेक्षोऽहिंसादिः शरीरसाधनापेक्षं नित्यं

मुदितैस्तदेति दितिजन्मनां रिपा-
वविनीयसम्भ्रमविकासिभक्तिभिः ।
उपसेदिवद्भिरुपदेष्टरीव तै-
र्ववृते विनीतमविनीतशासिभिः ॥ २४ ॥

यत्कर्म तद्यमः । नियमस्तु स यत्कर्म नित्यमागन्तु साधनं । स च यथा यमनियमाविवेत्यर्थः । इववद्वायथाशब्दा इति दण्डिन्यभिधानात् । विजयश्रिया युतं आसन्नविजयं विजिगीषुं रिपुमित्यर्थः अर्कमारुताविव दस्रयोरश्विनोः सुतौ नकुलसहदेवौ । नासत्यावश्विनौ दस्रावित्यमरः । तं हरिमनुसस्रतुरनुचेरतुः पृष्ठोपसर्पणं चक्रतुरित्यर्थः । इह सर्व्वकर्त्तृमनोरथानुकूलव्यापारवत्त्वमनुसरणम् । इयं मालोपमा ॥ २३ ॥

मुदितैरिति । तदा तस्मिन् समये इति मुदितैर्हृष्टैरविनीयोऽकल्कोऽकपट इति यावत् यः सम्भ्रम आदरस्तेन विकासिनी स्फुटीभवन्ती भक्तिर्येषां तैः । विपूयविनीयजित्यामुञ्जकल्कहलिष्विति कल्कार्थे निपातः । नपुंसकपूर्व्वपदः स्त्रीलिङ्गपूर्व्वपदो वा बहुव्रीहिः । अविनीतं शासतीत्यविनीतशासिभिः दुष्टशिक्षकैः पाण्डवैः दितिजन्मनां रिपौ कृष्णविषये उपसमीपे सीदन्ति अस्मिन्नित्युपसेदिवांसोऽन्तेवासिनः । भाषायां सदवसश्रुवः इति सदेर्लिटः क्वसुरादेशः । तैरुपसेदिवद्भिरुपदेष्टरि गुराविवेत्युपमा । विनीतमनुद्धतत्वं ववृते वृत्तं । भावे लिट् । ननु विकासिभक्तिभिरिति अत्र कथं पूर्व्वपदस्य पुंवद्भावः भक्तिशब्दस्य प्रियादिपाठात् स्त्रियाः पुंवदिति पुंवद्भावसूत्रे प्रियादिष्विति

गतयोरभेदमिति सैन्ययोस्तयो
रथ भानुजह्नुतनयाम्भसोरिव ।
प्रतिनादितामरविमानमानकै
र्नितराम्मुदा परमयेव दध्वने ॥ २५ ॥

निषेधादिति विकार्शिशब्दस्याविकार्शिनिवृत्तिमात्रपरतयाऽस्त्रीत्वस्य त्रिवक्षितत्वान्नपुंसकपूर्व्वपदोवक्त्रीहिरिति केचित् तदेतदभिप्रेत्योक्तं वृत्तिकारेण दृढभक्तिरित्येवमादिषु स्त्रीपूर्व्वपदस्याविवक्षितत्वात्सि द्धिरिति एतदेव स्पष्टीकृतं गणव्याख्याने। दृढं भक्तिर्यस्येति नपुंसकं पूर्व्वपदम्। धात्वर्थविशेषणमात्रपरे दृढशब्दे लिङ्गविशेषस्यानप कारत्वात् स्त्रीत्वमविवक्षितमिति। भोजराजस्तु भक्तौ कर्म्मसाधनाया मित्यनेन सूत्रेण भज्यते सेव्यते इति कर्म्मार्थत्वेन दृढा भक्ति रित्यादि भवति। भावसाधनायां तु दृढभक्तिर्भवत्येवेत्याह। तदेत त्सर्व्वमस्माभिः कालिदासचयसञ्जीविन्यां दृढभक्तिरिति ज्येष्ठे इत्या दिषु विवेचितं तस्माद्विकार्शिभक्तिभिरित्यत्रापि मतभेदेन पूर्व्व पदस्य स्त्रीत्वे नपुंसकत्वे च रूपसिद्धिरस्तीति स्थितम् ॥ २४ ॥

गतयोरिति । इति इत्थं गतयोः सैन्ययोः भानुजह्नुतनये यमुनाजाह्नव्यौ तयोरम्भसी प्रवाहौ तयोरिव अभेदमैक्यं गतयोः सतोः। यस्य च भावेन भावलक्षणमिति सप्तमी। एतेन सैन्ययो रवार्य्यत्वमुक्तम्। अथ सैन्यमेलनानन्तरं आनकैर्मङ्गलदुन्दुभिभिः परमया मुदेव हर्षेण इवेत्युत्प्रेक्षा। प्रतिनादितानि प्रतिध्वनितानि अमरविमानानि द्रष्टुमागत्याम्बरस्थितानि विमानानि देवयानानि यस्मिन् कर्म्मणि तद्यथा तथा नितरान्दध्वने ध्वनितम्। भावे लिट् ॥ २५ ॥

मखमीक्षितुं क्षितिपतेरुपेयुषा-
म्परितः प्रकल्पितनिकेतनं बहिः ।
उपरुध्यमानमिव भूभृतां बलैः
पुटभेदनं दनुसुतारिरैक्षत ॥ २६ ॥

प्रतिनादपूरितदिगन्तरः पतन्
पुरगोपुरं प्रति स सैन्यसागरः ।
रुरुचे हिमाचलगुहामुखोन्मुखः
पयसां प्रवाह इव सौरसैन्धवः ॥ २७ ॥

मखमिति । क्षितिपतेर्धर्मराजस्य मखं क्रतुमीक्षितुमुपेयुषां ततस्तत आगतानां भूभृतां राज्ञां बलैः सैन्यैः बहिः परितः प्रकल्पितानि निर्मितानि निकेतनानि निवासा यस्य तत् अत एवोपरुध्यमानं प्रभुसेनावेष्ट्यमानमिव स्थितमित्युत्प्रेक्षा । पुटभेदनं पत्तनं नगरमिन्द्रप्रस्थं । पत्तनं पुटभेदनमित्यमरः । दनुसुतारिर्दानवारिः पुरोऽग्रे ऐक्षताद्राक्षीत ॥ २६ ॥

प्रतीति । प्रतिनादैः प्रतिध्वानैः पूरितं व्याप्तं दिशामन्तरमन्तरालं येन सः पुरगोपुरं पुरद्वारं प्रति । गोपुरं तु पुरद्वारि द्वारमात्रे नपुंसकमिति विश्वः । एवं च न पुरशब्दस्य पौनरुक्त्यशङ्का । पतन् धावन् स सैन्यसागरः सेनासमुद्रः हिमाचलगुहामुखोन्मुखोऽभिमुखः सुरसिन्धोर्गङ्गाया अयं सौरसैन्धवः । हृद्भगसिन्ध्वन्ते पूर्वपदस्य चेत्युभयपदवृद्धिः । पयसां प्रवाह इव रुरुचे रेजे । उपमालङ्कारः ॥ २७ ॥

असकृद्गृहीतबहुदेहसम्भव
स्तदसौ विभक्तनवगोपुरान्तरम् ।
पुरुषः पुरम्प्रविशति स्म पञ्चभिः
सममिन्द्रियैरिव नरेन्द्रसूनुभिः ॥ २८ ॥
तनुभिस्त्रिणेत्रनयनानवेक्षित
स्मरविग्रहद्युतिभिरद्युतन्नराः ।
प्रमदाश्च यत्र खलु राजयक्ष्मणः
परतो निशाकरमनोरमैर्मुखैः ॥ २९ ॥

असकृदिति । असकृद्बहुशो गृहीतो लोकधारणाय स्वीकृतो बहुषु देहेषु मत्स्यकूर्मादिषु शरीरेषु सम्भवः प्रादुर्भावो येन सः । अन्यत्र स्वकर्मणा प्राक्तनयोनिसम्बन्धस्वरूपसम्भव इत्यर्थः । पुरुषः पुराणपुरुषो हरिर्जीवश्च विभक्तानि नवानि प्रत्यग्राणि गोपुरान्तराणि द्वारविशेषा यस्य तत् अन्यत्र नवसंख्याकानि गोपुरान्तराणि इन्द्रियद्वारभेदा यस्मिन् तत् पुरं पत्तनं शरीरञ्च । पुरं पुरि शरीरे चेति विश्वः । पञ्चभिरिन्द्रियैः सममिव पञ्चभि र्नरेन्द्रसूनुभी राजपुत्रैः पाण्डवैः सह असौ हरिस्तत्पुरं प्रविशति स्म । जीवो हि देहाद्देहान्तरं पूर्वेन्द्रियैः सह प्रविशति लिङ्ग शरीरस्यानपायादिति भावः । श्लेषसङ्कीर्णेयमुपमा ॥ २८ ॥

तनुभिरिति । यत्र पुरे नराः पुरुषाः त्रिणेत्रस्त्र्यम्बकः । पूर्व पदात्संज्ञायामगइति णत्वम् । तस्य नयनेनानवेक्षितस्य स्मरविग्रहस्य द्युतिरिव द्युतिर्यासान्ताभिस्तनुभिः मूर्त्तिभिः । स्त्रियां मूर्त्ति स्तनुस्तनूरित्यमरः । अद्युतन्द्योतन्ते स्म । द्युत दीप्तौ द्युद्भ्यो

अवलोकनाय सुरविद्विषान्द्विषः
पटहप्रणादविहितोपहूतयः ।
अवधीरितान्यकरणीयसत्वराः
प्रतिरथ्यमीयुरथ पौरयोषितः ॥ ३० ॥

लुङीति विकल्पात्परस्मैपदं पुषादिसूत्रेण च्लेरङादेशः । प्रमदाः स्त्रियश्च राजश्चन्द्रस्य यक्ष्मा राजयक्ष्मा क्षयरोगः । राजानं यक्ष्मा आरदिति श्रवणात् । राजयक्ष्मा क्षयः शोष इत्यमरः । तस्मात्परतः पूर्वमित्यर्थः निशाकरवन्मनोरमैरक्षीणैन्दुसुन्दरैरित्यर्थः मुखं रघुतन् तत्पुरं प्रविष्ट इति पूर्वेणान्वयः । उपमयोः संसृष्टिः ॥२९॥

अवलोकनायेति । अथ हरेः पुरः प्रवेशानन्तरं पटहप्रणादै र्दुन्दुभिध्वनिभिर्विहितोपहूतयः कृताह्वानाद्इवेत्यर्थः पुरे भवाः पौर्य्यस्ता योषितः पौरयोषितः । स्त्रियः पुंवद्भावः । सुरद्विषां असुराणां द्विषो हरेरवलोकनाय दर्शनार्थमवधीरितान्यकरणीयाः त्यक्तान्यकार्याः ताश्च ताः सत्वराश्च ताः सत्यः रथ्यामति प्रतिरथ्यं । याथार्थे ऽव्ययीभावः । ईयुः प्राप्ताः। एतेन स्त्रीणां हरिविलोकने कालाक्षमत्वलक्षणमौत्सुक्यमुक्तं अत्र पौराङ्गनाप्राप्तेः प्रवेशवाद्यश्रवणानन्तर्य्या त्तदुपक्रान्तोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या ॥ ३० ॥

अथाष्टादशभिः पौराङ्गनाशृङ्गारचेष्टां वर्णयति । अभीति । सामिकृतमण्डनमर्द्धविरचितप्रसाधनं यथा तथा यतीर्गच्छन्तीः । इणः शतरि ङीप् । करधृतनीवीनि करगृहीतग्रन्थीनि गलदंशुकानि संस्रमानपरिधानानि यासान्ताः स्रवदिति पाठान्तरं तदा स्रवदुत्स्रवदित्यर्थः । अंशुकं वस्त्रमात्रे स्यात्परिधाने

अभिवीक्ष्य सामिकृतमण्डनं यतीः
कररुद्धनीविगलदंशुकाः स्त्रियः ।
दधिरेऽधिभित्ति पटहप्रतिस्वनैः
स्फुटमट्टहासमिव सौधपङ्क्तयः ॥ ३१ ॥
रभसेन हारपददत्तकाञ्चयः
प्रतिमूर्द्धजन्निहितकर्णपूरकाः ॥
परिवर्त्तिताम्बरयुगाः समापतन्
वलयीकृतश्रवणपूरकाः स्त्रियः ॥ ३२ ॥

त्तरीययोरिति शब्दार्णवे । स्त्रियः स्त्रीः अभिवीक्ष्य सौधपङ्क्तयः अधिभित्ति भित्तिषु । विभक्त्यर्थेऽव्ययीभावः । पटहप्रतिस्वनै स्तुर्य्यप्रतिध्वनिभिः स्फुटमुद्भूतं अट्टहासं उच्चैर्हसितमिव दधिरे । इवेत्युत्प्रेक्षा । विकृतिदर्शनाद्धासोभवतीति भावः अत्र कुट्टमिताख्या चेष्टोक्ता । कुट्टमितं रम्यदृष्टौ चापल्यं परिकीर्त्तितमिति लक्षणात् ॥ ३१ ॥

रभसेनेति । रभसेन त्वरया हारपदे मुक्तादामस्थाने वक्षसि दत्तकाञ्चयोन्यस्तरशनाः प्रतिमूर्द्धजं मूर्द्धजेषु केशेषु । विभक्त्यर्थेऽव्ययीभावः । विहिताः कर्णपूरकाः । कर्णावतंसायाभिस्ताः । परिवर्त्तितं विपर्य्यासेन धृतं अम्बरयुगं वाससी याभिस्ताः परिधानी कृतमुत्तरीयं कुचांशुकञ्च जघने दत्तमित्यर्थः । वलयीकृताः कङ्कणी कृताः श्रवणपूरकाः कुण्डलानि याभिस्ताः स्त्रियः समापतन् अधावन् एतेन विभ्रमाख्या चेष्टोक्ता । विभ्रमस्त्वरया काले भूषास्थान विपर्य्ययइति लक्षणात् । स च भ्रममूलइति भ्रान्तिमदलङ्कारेत ग्राह्यत ॥ ३२ ॥

व्यतनोदपास्य चरणम्प्रसाधिका
करपल्लवाद्रसवशेन काचन ।
द्रुतयावकैकपदचित्रितावनि
म्पदवीङ्गतेव गिरिजा हरार्द्धताम् ॥ ३३ ॥

व्यचलन् विशङ्कटकटीरकस्थली
शिखरस्खलन्मुखरमेखलाकुलाः ।
भवनानि तुङ्गतपनीयसङ्क्रम
क्रमणक्वणत्कनकनूपुराः स्त्रियः ॥ ३४ ॥

व्यतनोदिति । काचन स्त्री रसवशेन हरिवीक्षणपारतन्त्र्येण । गुणे द्रवे रस इत्यमरः । प्रसाधिकायाः अलङ्कर्त्र्याः करपल्लवाच्चरणमपास्य असमाप्तावेवाक्षिप्य । हरार्द्धतां हरस्यार्द्धाङ्गताङ्गता अन्यथैकपादालक्तकासम्भवादिति भावः । गिरिजा गौरीव । यावकेनार्द्रालक्तकेन एकपदेन चित्रिता चित्रवर्णीकृता अवनिर्यस्याः तां पदवीं व्यतनोदकरोत् । उपमालङ्कारः । एषा कुतूहलाख्या चेष्टा रसाद्दिदृक्षाजनितचापलरूपत्वादिति ॥ ३३ ॥

व्यचलन्निति । विशङ्कटानां विशालानां कटीरकस्थलीनां कटिभागानां शिखरेषु अग्रेषु स्खलन्त्यो लुठन्त्योऽतएव मुखराः शब्दायमानाः ताभिर्मेखलाभिराकुलाः तुङ्गेषु तपनीयसङ्क्रमेषु कनकसोपानेषु क्रमणेन क्वणन्तः कनकनूपुरा यासान्ताः स्त्रियः भवनानि हर्म्याणि व्यचलन् तत्र गतारोहन्नित्यर्थः । चले र्गत्यर्थाल्लङ् । एतदपि पूर्ववदतिकुतूहलमेव । इत्यनुप्रासोऽलङ्कारः ॥ ३४ ॥

अधिरुक्ममन्दिरगवाक्षमुल्लसत्
सुदृशो रराज मुरजिद्दिदृक्षया ।
वदनारविन्दमुदयाद्रिकन्दरा
विवरोदरस्थितमिवेन्दुमण्डलम् ॥ ३५ ॥

अधिरूढया निजनिकेतमुच्चकैः
पवनावधूतवसनान्तयैकया ।
विहितोपशोभमुपयाति माधवे
नगरं व्यरोचत पताकयेव तत् ॥ ३६ ॥

अधीति । मुरजितो हरेर्दिदृक्षया द्रष्टुमिच्छया । दृशेः सन्नन्तादप्रत्ययादिति स्त्रियामप्रत्यये टाप् । रुक्ममन्दिरस्य कनकहर्म्यस्य गवाक्षे अधिरुक्ममन्दिरगवाक्षं । विभक्त्यर्थेऽव्ययीभावः । उल्लसत् प्रकाशमानं सुदृशः स्त्रिया वदनारविन्दं उदयाद्रिकन्दरा विवरोदरस्थितं तच्च स्थितमिन्दुमण्डलमिव रराजेत्युपमा। अत्रापि सुदृशो गवाक्षाक्रमणस्य रम्यदर्शनार्थचापलरूपत्वात् कुतूहलमेव मुरजिद्दिदृक्षयेत्यादिना व्यक्तमेव ॥ ३५ ॥

अधीति । उच्चकैर्निजनिकेतं स्वसौधमधिरूढया आरूढवत्या पवनेनावधूतः कम्पितः वसनान्तो वस्त्राञ्चलो यस्यास्तया एकया कयाचिदङ्गनया हेतुना तन्नगरं इन्द्रप्रस्थं माधवे उपयात्यागच्छति । यातेर्लटः शत्रादेशः । पताकया वैजयन्त्या विहितोपशोभं कृतशोभमिवालङ्कृतमिवेत्युत्प्रेक्षा । व्यरोचत व्यराजत । तत्तस्यापि नगरस्य स्वयं पताकेव बभावित्युत्प्रेक्षा । तस्याः सकल

करयुग्मपद्ममुकुलापवर्जितैः
प्रतिवेश्म लाजकुसुमैरवाकिरन्।
अवदीर्णशुक्तिपुटमुक्तमौक्तिक
प्रकरैरिव प्रियरथाङ्गमङ्गनाः ॥ ३७ ॥
हिममुक्तचन्द्ररुचिरः सपद्मको
मदयन्द्विजान् जनितमीनकेतनः।
अभवत्प्रसादितसुरो महोत्सवः
प्रमदाजनस्य स चिराय माधवः॥ ३८ ॥

पौराङ्गनातिशायि लावण्यं व्यज्यतइत्यलङ्कारेण वस्तुध्वनिः। अत्रापि प्रासादारोहणं पूर्ववत्कुतूहलमेव ॥ ३६ ॥

करेति। प्रतिवेश्म वेश्मनि। विभक्त्यर्थेऽव्ययीभावः। अङ्गनाः परस्त्रियः। करयुग्मान्यञ्जलयस्तानि पद्ममुकुलानीवेत्युपमितसमासः। तैरपवर्जितैरतएवावदीर्णैर्विभिन्नैः शुक्तिपुटैः शुक्तिकोशैः मुक्ता उत्सृष्टा ये मौक्तिकप्रकरामुक्तानिकरास्तैरिव स्थितैरित्युत्प्रेक्षा। लाजाः कुसुमानीव तैः लाजकुसुमैः आचारलाजैरित्यर्थः। प्रियं रथाङ्गं चक्रं यस्य तं प्रियरथाङ्गं चक्रिणं हरिमित्यर्थः। अवाकिरन् छादयामासुः ॥ ३७ ॥

हिमेति। हिममुक्तः शिशिरापगमाद्धिमान्निर्मुक्तोयश्चन्द्रः स इव रुचिरः। अन्यत्र तेन रुचिरः पद्मेन पद्मया च सह वर्त्ततइति सपद्मः स एव सपद्मकः। पद्महस्तः सश्रीकश्च। शैषिकः स्वार्थिको वा कप्प्रत्ययः। अन्यत्र सपङ्कजः। शैषिकः कप्रत्ययः। द्विजान् ब्राह्मणान् अन्यत्र पक्षिगणान् कोकिलादीन् मदयन् हर्षयन्

धरणीधरेन्द्रदुहितुर्भयादसौ
विषमेक्षणः स्फुटममूर्न पश्यति।
मदनेन वीतभयमित्यधिष्ठिताः
क्षणमीक्षते स्म स पुरोविलासिनीः ॥ २९ ॥

.नितमीनकेतनः प्रद्युम्नजनकः अन्यत्र मदनोद्दीपकः। प्रसादिता अनुगृहीताः सुरादेवा येन। अन्यत्र प्रसादिता निर्मलीकृता सुरा मदिरा यस्मिन् स माधवो हरिर्वसन्तश्च। माधवस्तु वसन्ते स्यादैशाखे गरुडध्वजे इति विश्वः। प्रमदैव जनस्तस्य प्रमदाजनस्य। जाता वेकवचनम्। चिराय महोत्सवोऽभवत्। तद्वदानन्दकरोऽभूदित्यर्थः। दृष्टानन्दकरत्वसाम्येन माधवे महोत्सवरूपणात् रूपकसिद्धिः। श्लेषस्तु हरिवसन्तयोरिह नास्त्येव। प्रकृताप्रकृतश्लेषे विशेष्यश्लेषायोगात्। किन्तु शब्दशक्तिमूलोध्वनिरेव ॥ २८ ॥

धरणीति। असौ स्वदाहको विषमेक्षणस्त्र्यक्षः धरणीधरेन्द्रदुहितुः पार्वत्याः सपत्नीशङ्किन्या इति भावः। भीत्रार्थानां भयहेतुरिति पञ्चमी। भयात् स्फुटं अमूः पौरयोषितः न पश्यतीति हेतोरितिविश्वासादित्यर्थः। अतएव गम्योत्प्रेक्षा। मदनेन वीतभयमधिष्ठिता आक्रान्ता अत्यारूढमदना इत्यर्थः पुरोविलासिनीः स हरिः क्षणमीक्षते स्म सविस्मयमिति भावः ॥ २९ ॥

विपुलेति। युगक्षये कल्पान्ते। सागरे शेते इति सागरशयस्य। अधिकरणे शेतेरित्यच्प्रत्ययः शयवासवासिष्वकालादिति विकल्पा

विपुलेन सागरशयस्य कुक्षिणा
भुवनानि यस्य पपिरे युगक्षये।
मदविभ्रमासकलया पपे पुनः
स पुरस्त्रियैकतमयैकया दृशा। ॥ ४० ॥
अधिकोन्नमद्घनपयोधरं मुहुः
प्रचलत्कलापिकलशिञ्जकस्वना।
अभिकृष्णमङ्गुलिमुखेन काचन
द्रुतमेककर्णविवरं व्यघट्टयत् ॥ ४१ ॥

द्वन्द्वगर्भावः। यस्य हरेर्विपुलेन कुक्षिणा भुवनानि पपिरे पीतानि। पिबतेः कर्मणि लिट्। स हरिरेकतमया पुरस्त्रिया पुनः कयाचित्पौराङ्गनया मदविभ्रमेण मदविकारेणासकलया असमग्रया एकया दृशा पपे पीतः सतृष्णं दृष्ट इत्यर्थः। कुक्षिकोण निविष्टनिखिलविष्टपस्य हरेर्महतः आधेयस्यात्यल्पतरैककान्ता कटाक्षकोणाधारलोक्त्या चमत्कारादधिकालङ्कारः। आधाराधे ययोराानुरूप्याभावोऽधिकोमतइति लक्षणात्। अयञ्च तात्कालिक विकारात्मा विलासाख्योभावोयत्कटाक्षवीक्षणं। तात्कालिकविकारः स्याद्विलासोऽङ्गक्रियादिभिरिति दशरूपकात् ॥ ४० ॥

अधिकेति। काचन कान्ता अभिकृष्णं कृष्णाभिमुखं। आभिमुख्येऽव्ययीभावः। अधिकं भृशमुन्नमत् दूरमुन्नमत् घनः कठिनः पयोधरः स्तनोयस्याः सा मुहुः प्रचलतो नृत्यतः कलापिनोवर्हिणइव कलोमधुरः शिञ्जकस्वनोवलयध्वनिर्यस्याः सा

परिपाटलाब्जदलचारुणासकृ
च्चलिताङ्गुलीकिशलयेन पाणिना ।
सशिरःप्रकम्पमपरा रिपुम्मधो
रनुदीर्णवर्णनिभृतार्थमाह्वयत् ॥ ४२ ॥
नलिनान्तिकोपहितपल्लवश्रिया
व्यवधाय चारु मुखमेकपाणिना ।
स्फुरिताङ्गुलीविवरनिःसृतोल्लस
द्दशनप्रभाङ्कुरमजृम्भतापरा ॥ ४३ ॥

सती । शङ्कुकं वलये कम्बाविति विश्वः । अङ्गुलिमखेनाङ्गुल्यग्रेणैकस्य कर्णस्य विवरं रन्ध्रं द्रुतं शीघ्रं व्यघट्टयत् । कण्डूविनोदार्थमिवाताड यत् । वस्तुतस्तु भावाविष्करणार्थमेवेति भावः अयञ्च पूर्व्व वद्विलास एव । कलापिकलेत्युपमा ॥ ४१ ॥

परीति । अपरा स्त्री । परिपाटलाब्जदलचारुणा रक्ताब्ज पत्ररुचिरेण असकृन्मुहुश्चलितान्यङ्गुल्यः किशलयानीवाङ्गुली किशलयानि यस्य तेन पाणिना सशिरःप्रकम्पं शिरःकम्पयुक्तं यथा तथा मधोरिपुं हरिं अनुदीर्णवर्णं अनुच्चारिताक्षरं अतएव निभृतार्थम्परेषामविदितार्थं यत्तदनुदीर्णवर्णनिभृतार्थं यथा तथा आह्वयत् परप्रकाशनभयादव्याहरन्ती चेष्टयैवाकार्नं कृत वतीत्यर्थः । अत्रापि पूर्व्ववद्विलासोपमे भावालङ्कारौ ॥ ४२ ॥

नलिनेति । अपरा स्त्री नलिनान्तिके उपहितस्य पल्लवस्य श्रीरिव श्रीर्यस्य तेन मुखसन्निधानादिति भावः । एकपाणिना

वलयार्पितासितमहोपलप्रभा
वकुलीकृतप्रतनुरोमराजिना ।
हरिवीक्षणाक्षणिकचक्षुषान्यया
करपल्लवेन गलदम्बरन्दधे ॥ ४४ ॥

चारु निसर्गसुन्दरं मुखं व्यवधाय तिरोधाय स्फुरदङ्गुलीविवर निःसृताउज्ज्वलाङ्गुल्यन्तरालनिर्गता अत एवोल्लसन्तउल्लसर्पन्तोदशन प्रभा एवाङ्कुरायस्मिन् कर्मणि तद्यथा तथा अजृम्भत जृम्भणमास्य विवरणन्तच्चेष्टवस्तुसाक्षात्कारकृतआद्यानुभावः । अत्र नलिन पल्लवयोरसम्बन्धयोः सम्भावनया सम्बन्धाभिधानादतिशयोक्तिः ॥ ४३ ॥

वलयेति । हरिवीक्षणे अक्षणिकचक्षुषा स्थिरदृष्ट्या विस्म यादराभ्यां स्तिमितनेत्रयेत्यर्थः । अन्यया स्त्रिया गलत्सुखपारव श्यात् स्रंसमानमम्बरं वलयेष्वर्पिताः खचितायेऽसितमहोपला नीलमहामणयः । उपलौ मणिपाषाणाविति विश्वः । तेषां प्रभाभि र्वकुलीकृता सान्द्रीकृता प्रतनुः सूक्ष्मा रोमराजिर्यस्य तेन कर पल्लवेन दधे धृतं । अयञ्च तात्कालिकविहारलक्षणविलासः । अत्रेन्द्रनीलप्रभाणां रोमावलीवकुलीकरणोक्त्या प्रभास्वपि रोम राजित्वप्रतीतेर्भ्रान्तिमदलङ्कारोव्यज्यते इति वस्तुनालङ्कारध्वनिः ॥ ४४ ॥

भिजेति । काचित् स्त्री भिन्नेनात्मीयेन सौरभेण सौगन्ध्येन भ्रमितानां भ्रमणं कारितानां भृङ्गाणां पङ्क्तयः पङ्क्तमूलानि । स्त्री पङ्क्तिः पङ्क्तमूलमित्यमरः । पचाक्तिरिति तिप्रत्ययः । ता एव

निजसौरभभ्रमितभृङ्गपक्षति
व्यजनानिलक्षयितघर्म्मवारिणा ।
अभिशौरि काचिदनिमेषदृष्टिना
पुरदेवतेव वपुषा व्यभाव्यत ॥ ४५ ॥

व्यजनानि इति रूपकं खेदहरणलिङ्गात्। तासामनिलेन क्षयितं नाशितं घर्म्मवारि खेदोदकं येन तेन अभिशौरि शौरेरभिमुखं । आभिमुख्येऽव्ययीभावः । अनिमेषा दृष्टिर्यस्य तेन वपुषा निमित्तेन पुरदेवतेव नगराधिदेवतेव व्यभाव्यत विभाविता तर्किता इति यावत् । अनिमेषत्वञ्चेष्टदर्शनजन्यआश्चर्यानुभावः । अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः । अनिमेषनयननिरीक्षण तूष्णीम्भावादयस्तत्रेति लक्षणात् इत्याह सौरभानिमेषत्वाभ्यां पुराधिवासाच्च पुराधिदेवतात्वमुत्प्रेक्ष्यते इत्युपात्तगुणनिमित्ता जातिस्वरूपोत्प्रेक्षा तथा चास्याजात्याः पद्मिनीत्वं व्यज्यते इत्यलङ्कारेण वस्तुध्वनिः निजसौरभेत्यनेन । कमलमुकुलमृद्वी फुल्लराजीवगन्धिः सुरतपयसि यस्याः सौरभन्दिव्यमङ्ग इत्यादि पद्मिनीलक्षणोपलक्षणादिति । विपुलेनेत्यादिश्लोकोक्ताः षडपि नायिकाः प्रौढाः साधारणस्य तत्र चासम्भवात् अन्यथासां कृतचेष्टावर्णनानाचित्यापत्त्यलमतिप्रपञ्चेन ॥ ४५ ॥

अभियातीति । असौ नितम्बिनीजनः स्त्रीजनः नोऽस्माकं चक्षुषः स्रष्टा सहस्त्रेव सतसचुषि सहस्त्रे सत्येव अनाष्टत्येत्यर्थः । षष्ठी चानादरइति षष्ठी । एष हरिरभियात्यभिगच्छतीत्यखिद्यत खेदङ्गतः । खिद दैन्यदिवादिकात्कर्त्तरि लङ् । असौ

अभियाति नः सतृषमेष चक्षुषो
हरिरित्यखिद्यत नितम्बिनीजनः ।
न विवेद यस्सततमेनमीक्षते
न वितृष्णतां व्रजति खल्वसावपि ॥ ४६ ॥

अकृतस्वसद्मगमनादरः क्षणं
लिपिकर्म्मनिर्म्मित इव व्यतिष्ठत ।
गतमच्युतेन सह शून्यतां गतः
प्रतिपालयन्मन इवाङ्गनाजनः ॥ ४७ ॥

त्प्रेक्ष्यते । नेति । यो जन एनं हरिं सततमीक्षते असावपि खलु वितृष्णतां न व्रजतीति न विवेद नित्यदर्शनेऽप्यपूर्ववदेव भवतीति नाबुद्धेत्यर्थः । वेद चेन्नाखिद्यतेति भावः । अत्राखिद्यतेति स्त्रीणां प्रारब्धहरिवीक्षणसुखविच्छेदकृतविषादाख्यसञ्चारिभावनिबन्धनात्प्रेयोऽलङ्कारः तदुत्थापिता चेयमुक्तावेदनोत्प्रेक्षेति सङ्करः । प्रारब्धकार्य्यासिद्ध्यादेर्विषादः सत्त्वसङ्क्षय इति दशरूपके सत्त्वसङ्क्षयश्चित्तभङ्गः ॥ ४६ ॥

अकृतेति । अङ्गनाजनः । अच्युतेन सह गतं मनः प्रतिपालयन् प्रतीक्षमाण इवेत्युत्प्रेक्षा । शून्यतां निरोजस्कतां गतः । अकृतस्वसद्मगमनादरः निवृत्तनिजगृहप्राप्त्यपेक्षः सन् लिपिकर्म्मनिर्म्मितः चित्रलिखित इव इत्युत्प्रेक्षा । क्षणं व्यतिष्ठत विस्पन्दमास्तेत्यर्थः । समवप्रविभ्यः स्थ इत्यात्मनेपदम् । अतः शून्यतानुभावाच्चिन्तावगम्यते । ध्यानं चिन्ता हितानाप्तेः शून्यताश्वासतापकृदिति दशरूपके । अत्रोत्प्रेक्षयोः सापेक्षत्वात्सङ्करः ॥ ४७ ॥

अलसैर्मदेन सुदृशः शरीरकैः
स्वगृहान्प्रति प्रतिययुः शनैःशनैः ।
अलघुप्रसारितविलोचनाञ्जलि
द्रुतपीतमाधवरसौघनिर्भरैः ॥ ४८ ॥

अलसैरिति । अलघु अधिकं प्रसारितैर्विलोचनैरेवाञ्जलिभिर्द्रुतं सत्वरम् । लघु क्षिप्रमरं द्रुतमित्यमरः । पीतो यो माधवो हरिरेव रसोऽमृतं अन्यत्र मधु मद्यं तत्सम्बन्धि रसो माधुर्य्यं माधवरसः। रसो रागे विष वीर्य्ये तिक्तादौ पारदे द्रवे रेतस्यास्वादने हेम्नि निर्यासेऽमृतशब्दयोरिति वैजयन्ती । तस्यौघः समूहस्तेन निर्भरैर्दुर्भरैर्गुरुभिरिति यावत् अतएव मदेनालसैर्मन्थरैः शरीरकाण्यल्पशरीराणीत्यर्थः । अल्पइति परिमाणे कन्प्रत्ययः । तैरुपलक्षिताः सुदृशः शनैःशनैः स्वगृहान् प्रतिययुः प्रतिनिर्गताः स्वयं लघून्यपि द्रव्याणि रसद्रवभरणाद्गुरूणि भवन्तीति भावः । अत्र माधवरसौघनिर्भरत्वविशेषणगत्या शनैःशनैः प्रतियानहेतुत्वात्कार्य्यहेतुककाव्यलिङ्गन्तच्च माधवरसेनेति श्लेषमूलातिशयोक्त्यापितमिति सङ्करः ॥ ४८ ॥

नवेति । अथ पुरप्रवेशानन्तरं हरिणा पुरः पूर्व्वन्नवगन्धवारिभिर्गन्धवासितोदकैः विरजीकृता अविरजसो विरजसः सम्पद्यमानाः कृताः । अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्चेत्यभूततद्भावे च्विप्रत्यये सलोपः अस्य च्वावितीकारः । घनैः सान्द्रैर्धूपानामगुरुधूपानां धूमैः कृतो रेणुविभ्रमो रजोभ्रमो याभिस्ताः प्रचुरं बहुलमुद्धूतेषु उच्छ्रितेषु ध्वजेषु ध्वजस्तम्भेषु विलम्बीनि विलम्बमानानि

नवगन्धवारिविरजीकृताः पुरो
घनधूपधूमकृतरेणुविभ्रमाः ।
प्रचुरोद्धतध्वजविलम्बिवाससः
पुरवीथयोऽथ हरिणातिपेतिरे ॥ ४९ ॥
उपनीय विन्दुसरसोमयेन या
मणिदारु चारु किल वार्षपर्व्वणम् ।
विदधेऽवधूतसुरसद्मसम्पदं
समुपासदत्सपदि संसदं स ताम् ॥ ५० ॥

वासांसि पताकायासु ताः पुरवीथयोऽतिपेतिरेऽतिपातिताः अति क्रान्तादित्यर्थः । पतेः कर्म्मणि लिट् एत्वाभ्यासलोपौ । अत्र सादृश्याद्धू रेणुभ्रान्त्या भ्रान्तिमदलङ्कारः रेणुविभ्रमशब्देन रजोविलासस्यापि प्रतीतेस्तस्य विरजीकरणेन विरोधाद्विरोधाभासश्चेति अनयोरेक वाचकानुप्रवेशलक्षणः सङ्करः ॥ ४९ ॥

उपनीयेति । मयेनासुरशिल्पिना वृषपर्वा नाम कश्चिदसुरे श्वरः वृषपर्वण इदं वार्षपर्वणं । तस्येदमित्यण । चारु मनोहरं मणि रेव दारु काष्ठं मणिमयं स्तम्भादिकलापमित्यर्थः । तद्विन्दुसरसो हैमवतात्सरोविशेषात् उपनीय समीपमानीय किलेत्यैतिह्ये या संसत् विदधे निर्म्मिता । अवधूता अधरीकृता सुरसद्मसम्पत् इन्द्रभवनलक्ष्मीर्यया सा तां संसदं सभां । सभासमितिसंसदः । आस्थानी क्लीवमास्थानं स्त्री नपुंसकयोः सदइत्यमरः । स हरिः सपदि समुपासदत् प्रापत् । सदेर्लुङि पुषादित्वात् च्लेरङादेशः । पुरा किल खाण्डवदाहे पाण्डवेनाग्निदाहान्मोचितेन मयेन

अधिरात्रि यत्र निपतन्नभोलिहां
कलधौतधौतशिलवेश्मनां रुचौ।
पुनरप्यवापदिव दुग्धवारिधि
क्षणगर्भवासमनिदाघदीधितिः ॥ ५१ ॥
लयनेषु लोहितकनिर्म्मिताभुवः
शितिरत्नरश्मिहरितीकृतान्तराः।
जमदग्निसूनुपितृतर्प्पणीरपो
वहति स्म या विरलशैवलादिव ॥ ५२ ॥

प्रत्युपकारार्थं पूर्व्वमात्मनैव विन्दुसरसि गुप्तेन वृषपर्वगृहनिर्माणा वशिष्टेन मणिशिलाकलापेन काञ्चनसभा धर्म्मराजाय निर्म्मितेति भारते। सभावर्णनाङ्गत्वेनार्ज्जुनमयचरितवर्णनादुदात्तालङ्कारः प्रभूतमहापुरुषचिन्तनं चेति सूचम् ॥ ५० ॥

अथ दशभिः सभां वर्णयति। अधीत्यादि। अधिरात्रि रात्रिषु। विभक्त्यर्थेऽव्ययीभावः। यत्र सभायां नभोलिहामभ्रंलिहां। क्विप्। कलधौतं रौप्यं। कलधौतं रूप्यहेम्नोरित्यमरः। तद्वद्धौताः धवलाः शिला येषान्तानि वेश्मानि स्फटिकभवनानीत्यर्थः तेषां रुचौ प्रभायां निपतन् प्रविशन् अनिदाघदीधितिरनुष्णरश्मि र्हिमांशुः पुनरपि दुग्धवारिधौ क्षीराब्धौ क्षणं गर्भवासं न तु मथनात्प्रागिव चिरगर्भवासमिति भावः अवापत् प्रापदिवेत्युत्प्रेक्षा। तया वेश्मनां चन्द्रमण्डलातिक्रमो व्यज्यते ॥ ५१ ॥

लयनेष्विति। लीयते एष्विति लयनानि तेषु गृहेषु शिति रत्नानां नीलमणीनां रश्मिभिर्हरितीकृतानि हरितवर्णीकृतानि

विशदाश्मकूटघटिताः क्षपाकृतः
क्षणदासु यत्र च रुचैकताङ्गताः ।
गृहपङ्क्तयश्चिरमतीयिरे जनै-
स्तमसीव हस्तपरिमर्शसूचिताः ॥ ५३ ॥

अन्तराणि मध्यानि यासां ताः लोहितमणयो लोहितकाः पद्म रागाः । लोहितान्मणाविति कन्प्रत्ययः । तैर्निर्मिताः भुवो भूमी र्विरलाः शैवलायास्तु ताः जमदग्निसूनोः परशुरामस्य पितॄणां तर्पणीः क्षत्रियरुधिरपङ्कवेत्युपमा या सभा वहति स्म । जामदग्न्यः क्षत्रियास्तैः पञ्चशो ह्रदानुत्पाद्य ताभिरद्भिः पितॄनपतर्पयत् तासु रुधिरप्रकृतिकत्वाद्रक्तवर्णाएवेति पुराणम् ॥ ५२ ॥

विशदेति । किञ्चेति चार्थः यत्र सभायां विशदाश्मकूटघटिताः स्फटिकशिलासङ्घातनिर्मिताः अतएव क्षणदासु क्षपाकृतो निशाकरस्य रुचा चन्द्रिकयैकतां सावर्ण्यादभेदङ्गताः अतएव तम सीव हस्तपरिमर्शसूचिताः पाणिस्पर्शैकगम्या इत्यर्थः । गृहपङ्क्तयः जनैश्चिरमतीयिरे अतिक्रान्ताः पुरोगतान्यपि स्फटिकभवनानि चन्द्रिकाभ्रमादतीत्य गत्वा पश्चात्करपरामर्शैः कथञ्चित्प्राप्यन्त इत्यर्थः । अत्र प्रकृतानां स्फटिकवेश्मनां गुणसाम्यादप्रस्तुतचन्द्रि कैक्योक्त्या सामान्यालङ्कारः । सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैक तेति लक्षणात् ॥ ५३ ॥

निलयेष्विति । यत्र सभायां निलयेषु नक्तं रात्रौ विशिन्यो दीर्घिकापद्मिन्यस्तएव वध्वस्तासां परिभवेन निमीलितेन दूष णेन च स्फुटागसः स्पष्टापराधाः शशलाञ्छनांशवः चन्द्रपादाः

निलयेषु नक्तमसिताश्मनाञ्चयै
र्विसिनीवधूपरिभवस्फुटागसः ।
मुहुरत्रसद्भिरपि यत्र गौरवा
च्छशलाञ्छनांशव उपांशु जघ्निरे ॥ ५४ ॥

सुखिनः पुरोऽभिमुखतामुपागतः
प्रतिमासु यत्र गृहरत्नभित्तिषु ।
नवसङ्गमैरबिभरुः प्रियाजनैः
प्रमदन्त्रपाभरपराङ्मुखैरपि ॥ ५५ ॥

अत्रसद्भिरत्रस्यद्भिरपि निर्दोषैरपि इति चार्थः। आगोभीमन्तुदोषयो-
रिति विश्वः। वा भ्राशेत्यादिना श्यनभावपक्षे शतृप्रत्ययः। असिता-
श्मनां इन्द्रनीलमणीनां चयैः समूहैः गौरवात्तथ्यभूतत्वात् सम्भावित-
त्वाच्च उपांशु अंशुसमीपे रहस्य। रहस्योपांशु चालिङ्गे इत्यमरः।
मुहुर्जघ्निरे तिरोहिता मारिताश्च। हन्तेः कर्मणि लिट्। समीपगता
चन्द्रांशवः प्रभूतैरिन्द्रनीलांशुभिस्तिरस्कृता इत्यर्थः अन्यत्रान्तः-
पुरद्वाःस्थैर्निर्भीकैरपि संभावितैर्दुष्कीर्त्तिभयाद्गूढं हन्यन्त इति
भावः। अत्र विसिनीनां वधूत्वरूपणात्तत्परिभाविनां चन्द्रांशूनां
धूर्त्तकामुकत्वरूपणप्रतीतेः एकदेशविवर्त्तिरूपकन्तच्च गौरवादुपांशु
जघ्निर इति च श्लेषेणात्रसद्भिरपीति विरोधेन च सङ्कीर्य्यते ॥ ५४ ॥

सुखिन इति। यत्र सभायां नवः सङ्गमो येषान्तैर्नवसङ्गमैरत
एव त्रपाभरेण पराङ्मुखैर्विमुखैरपि गृहाणां रत्नभित्तिषु प्रति-
मासु तत्सङ्क्रान्तप्रतिबिम्बेषु पुरोऽग्रेऽभिमुखतामुपागतैः प्रियाजनैः
कान्ताजनैः सुखिनो भोगिनः प्रमदं हर्षं अबिभरुः बिभ्रति स्म।

तृणवाञ्छया मुहुरवाञ्चिताननान्
निचयेषु यत्र हरिताश्मवेश्मनाम् ।
रसनाग्रलग्नकिरणाङ्कुराञ्चितो
हरिणान् गृहीतकवलानिवैक्षत ॥ ५६ ॥

भृञोर्लङि श्लाविति द्विर्भावे भृञामिदित्यभ्यासस्येति इर्जुमादेशः । स्त्रीणां वैमुख्येऽपि तत्प्रतिबिम्बाभिमुख्यात्पुंसां सुखमत्र स्त्रीणां तु उभयथापि क्लिष्टमित्यर्थः । अत्र वैमुख्येऽप्याभिमुख्यमिति विरोधस्य प्रतिमास्विति निरासाद्विरोधाभासोऽलङ्कारः ॥ ५५ ॥

तृणेति । यत्र सभायां हरिताश्मवेश्मनां मरकतमणीनां गृहाणां । गारुत्मतं मरकतमश्मगर्भो हरिन्मणिरित्यमरः । निचयेषु सङ्घेषु तृणवाञ्छया तृणाशया मुहुरवाञ्चिताननान्नमितमुखान् अतएव रसनाग्रेषु लग्नाः किरणाः अङ्कुरा इव येषान्तेतान् । अतएव गृहीतकवलान् उपात्ततृणग्रासानिव स्थितान् हरिणान् जनऐक्षत ईक्षितवान् । ईक्षतेर्लङि आडजादीनामित्याट् आटश्चेति वृद्धिः । अत्र तृणवाञ्छयेति हरिणानां मरकतेषु तृणभ्रान्तेर्भ्रान्तिमदलङ्कारः तन्मूला चेयं गृहीतकवलत्वोत्प्रेक्षेति सङ्करः ॥ ५६ ॥

विपुलेति । यदुपान्तिकेषु यस्याः सभायाः उपान्तिकेषु समीपेषु महोदरोदराः विपुलेष्वालवालेषु मूलजलाधारेषु । स्यादालवालमावालमित्यमरः । भृतानि सम्भृतानि शरीरिणीव दर्पणतलेषु प्रतिमां प्रतिबिम्बिताकृतैः प्रतिबिम्बितैरित्यर्थः । आत्मभिः

विपुलालवालभृतवारिदर्पणै
प्रतिमागतैरभिविरेजुरात्मभिः ।
यदुपान्तिकेषु दधतोमहीरुहः
सपलाशराशिमिव मूलसंहतिम् ॥ ५७ ॥

उरगेन्द्रमूर्द्धरुहरत्नसन्निधे
र्मुहुरुन्नतस्य रसितैः पयोमुचः ।
अभवन् यदङ्गणभुवः समुच्छ्वस
न्नवबालवायजमणिस्थलाङ्कुराः ॥ ५८ ॥

स्वमूर्त्तिभिरित्यर्थः सपलाशराशिं सपत्रसन्ततिं मूलसंहतिं दधत इव दधाना इवाभिविरेजुः । स्वालवालेषु स्वप्रतिबिम्बितैरधोमुखैः मूलेष्वपि सपत्रा इव रेजुरित्युत्प्रेक्षा ॥ ५७ ॥

उरगेन्द्रेति । उरगेन्द्राणां मूर्द्धसु रत्नानि रूढानि । इगुपधलक्षणः कः । तेषां रत्नानां सन्निधेः सन्निधानात् मुहुरुन्नतस्य यदा यदा तत्सन्निधिस्तदा तदोदितस्येत्यर्थः पयोमुचो मेघस्य रसितैः स्तनितैर्यदङ्गणभुवो यस्याः प्राङ्गणप्रदेशाः समुच्छ्वसन्तः प्रादुर्भवन्तो नवाः प्रत्यग्राः बालवायजमणिस्थलाङ्कुराः वैदूर्य्यभूप्ररोहा यासु तास्तथोक्ता अभवन् । वैदूर्य्यं बालवायजमित्यमरः बालवायो नाम वैदूर्य्यप्रभवो देशविशेषः । उरगेन्द्रमूर्द्धन्यरत्नाङ्कुरैः सहोदितमेघध्वनेर्विदूरभूमिरुद्भिन्नाङ्कुरा भवतीति प्रसिद्धिः तदुक्तं उरगमूर्द्धन्यरत्नसन्निधानादकालेऽपि मेघागर्ज्जनोति वार्त्ता । केचित्तु यत्रैवोरगरत्नं मेघरसितं च तत्रैव वैदूर्य्य

नलिनी निगूढसलिला च यत्र सा
स्थलमित्यधः पतति या सुयोधने ।
अनिलात्मजप्रहसनाकुलाखिल
क्षितिपक्षयागमनिमित्ततां ययौ ॥ ५९ ॥
हसितुम्परेण परितः परिस्फुर
त्करवालकोमलरुचावुपेक्षितैः ।
उदकर्षि यत्र जलशङ्कया जनै
र्मुहुरिन्द्रनीलभुवि दूरमम्बरम् ॥ ६० ॥

भूमिः । अत्र समृद्धिमद्वस्तुवर्णनादुदात्तालङ्कारभेदः । तदुदात्तं भवेद्यत्र समृद्धं वस्तु वर्ण्यते इति लक्षणात् ॥ ५८ ॥

नलिनीति । यत्र सभायां निगूढसलिला दलच्छन्नत्वाददृश्यसलिला नलिनी वर्त्तत इति शेषः । या नलिनी सुष्ठु युध्यत इति सुयोधने दुर्योधने । भाषायां शासियुधिदृशिधृषिमृषिभ्यो युच् वक्तव्यः । स्थलमिति भ्रान्त्या अधः पतति सति अनिलात्मजस्य भीमसेनस्य प्रहसनेनाट्टहासेनाकुलानां क्षुभितानामखिलक्षितिपानां क्षयागमे नाशप्राप्तौ निमित्ततां ययौ । नलिनीदलच्छन्नत्वात्सुयोधनस्य जले स्थलभ्रान्तिः तया तस्य पातस्तेन भीमसेनप्रहासस्तेन राज्ञां क्षोभस्ततस्तेषां मारणो रणः प्रवृत्त इति परम्परया तत्क्षयकारणत्वं गतेत्यर्थः । अत्र सभावर्णनाङ्गतया भीमसेनादिचरितवर्णनादुदात्तालङ्कारभेदः लक्षणं चोक्तम् ॥ ५९ ॥

हसितुमिति । यत्र सभायां परितः परिस्फुरन्ती करवालकोमला असिश्यामा रुचिर्यस्यास्तस्यां इन्द्रनीलभुवि हसितुं परेण

अभितस्सदोऽथ हरिपाण्डवौ रथा-
दमलांशुमण्डलसमुल्लसत्तनू ।
अवतेरतुर्नयननन्दनौ नभः
शशिभार्गवावुदयपर्व्वतादिव ॥ ६१ ॥
तदलक्ष्यरत्नमयकुड्यमादरा-
दभिधातरीत इत इत्यथो नृपे ।
धवलाश्मरश्मिपटलाविभावित-
प्रतिहारमाविशदसौ सदः शनैः ॥ ६२ ॥

आनतान्येन अनेनोपेक्षितैः स्थलमेतत् न जलमिति उपदिष्टै-र्जनैरज्ञैरागन्तुकजनैर्जलशङ्कया जलभ्रान्त्या मुहुर्दूरमम्बरं वस्त्र-मुदकर्षि नितम्बादुद्धृतम् । अत्रेन्द्रनीलस्थलसादृश्यात्सलिलभ्रान्ते-र्भ्रान्तिमदलङ्कारः ॥ ६० ॥

अभित इति । अथामलांशुमण्डलेन तेजःपुञ्जेन समुल्लसन्त्यौ भासमाने तनू मूर्त्ती ययोस्तौ नयननन्दनौ नेत्रानन्दकरौ हरि-पाण्डवौ सदोऽभितः सभाभिमुखं । अभितः परित इति द्वितीया । रथात् शशिभार्गवौ अमलेत्यादिविशेषणविशिष्टौ चन्द्रशुक्रौ नभो-भितो नभोभिमुखं उदयाख्यात्पर्वतादुदयाचलादिवावतेरतुः अव-तीर्णवन्तौ । तरतेर्लिट् तृफलभजत्रपश्चेति एत्वाभ्यासलोपौ । उपमा ॥ ६१ ॥

तदिति । अथो रथावतरणानन्तरं असौ हरिर्नृपे युधि-ष्ठिरे आदरादित इत इत्यभिधातरि सति इत इत आगम्यतामित्यभि-दधाने सतीत्यर्थः । तत्पूर्व्वोक्तमलक्ष्यरत्नमयकुड्यं अदृश्य

नवहाटकेष्टकचितन्ददर्श सः
क्षितिपस्य वस्त्यमथ तत्र संसदि ।
गगनस्पृशाम्मणिरुचाञ्चयेन य
त्सदनान्युदस्मयत नाकिनामपि ॥ ६३ ॥

रत्नभित्तिकं । वहुलेन सान्द्रेण रश्मिपटलेन मणिप्रभापुञ्जेन विभावितप्रतिहारमलक्ष्यद्वारं । स्त्री द्वार्द्वारं प्रतीहार इत्यमरः । सदः सभां प्रविवेश प्रविष्टवान् । अत्र कुड्यप्रतीहारयोरलक्ष्यत्वासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः ॥ ६२ ॥

नवेति । अथ प्रवेशानन्तरं स हरिस्तत्र संसदि सभायां नवभिर्हाटकेष्टकाभिः हिरण्येष्टकाभिश्चितम् । हिरण्यं हेम हाटकमित्यमरः । इष्टकेषीकामालानाञ्चिततूलभारिष्विति ह्रस्वः । पक्वमृत्तिकाविशेषवाचकस्येष्टकाशब्दस्य तादृशि सुवर्णविकारे सुवर्णघटवदुपचारात्प्रयोगः । क्षितिपस्य युधिष्ठिरस्य वस्त्यं सदनं । निशान्तवस्त्यसदनमित्यमरः । ददर्श । यत् सदनं गगनस्पृशां उच्चैस्तराणां मणिरुचां चयेन समूहेन नाकिनां देवानामपि सदनानि उदस्मयत अहसत् । स्मयतेर्ण्यन्तात्कर्त्तरि लङ् । अत्रापि नृपसदनस्य सुरसदनादाधिक्यासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः ॥ ६३ ॥

उदयाद्रीति । अथ नृपसदनदर्शनानन्तरं उदयाद्रेर्मूर्द्धि शिखरे युगपत्प्रकाशतोः प्रकाशमानयोः । चकास्र दीप्ताविति धातोर्लटः शत्रादेशः । दिननाथपूर्णशशिनोः सूर्य्यपूर्णचन्द्रमसोरसम्भवां सम्भवरहितान्तयोस्तथाभूतयोर्योगपद्यायोगादभूतपूर्वामित्यर्थः रुचिं शोभां बिभ्रतौ नृपाच्युतौ रुधिरधारि उज्ज्वलतेजसि ।

उदयाद्रिमूर्ध्नि युगपच्चकासतो
र्दिननाथपूर्णशशिनोरसम्भ्रमाम् ।
रुचिमासने रुचिरधाम्नि बिभ्रता
वलघुन्यथ न्यषदतां नृपाच्युतौ ॥ ६४ ॥

सुतरां सुखेन सकलक्लमच्छिदा
सनिदाघमङ्गमिव मातरिश्वना ।
यदुनन्दनेन तदुदन्वतः पयः
शशिनेव राजकुलमाप नन्दथुम् ॥ ६५ ॥

अलघुनि विपुले आसने सिंहासने न्यषदतामुपविष्टौ । सदेर्लङि पुषादित्वात् च्लेरङादेशः सदिरप्रतेरिति षत्वम् । अत्र सम्भावनया अर्कपूर्णेन्दुशोभासम्बन्धोक्तेरसम्बन्धे सम्बन्धरूपातिशयोक्तिः ॥ ६४ ॥

सुतरामिति । तद्राजकुलं कुरुकुलं । सकलक्लमच्छिदा सकलदुःखहारिणा यदुनन्दनेन कृष्णेन सनिदाघं ससन्तापमङ्ग मातरिश्वा वायुस्तेन । उदकान्यस्य सन्तीति उदन्वान् उदधिः । उदन्वानुदधौ चेति निपातः । तस्य पयोजलं शशिनेव सुतरामत्यन्तं । अव्ययादाम्वद्रव्यइति आमुप्रत्ययः । सुखेनाक्लेशेन नन्दथुं आनन्दमाप । स्यादानन्दथुरानन्दइत्यमरः । ट्वितोऽथुजित्य थुच्प्रत्ययः । मालोपमा ॥ ६५ ॥

अनवद्येति । सविलासो विलासयुक्तो लासिकविलासिनीजनः नर्त्तकस्त्रीजनः सविलासलासिकविलासिनीजनः । नर्त्तकीलासिके समे इत्यमरः । अनवद्यमगर्ह्यं वाद्यं वंशादि तस्य लयः साम्यक्रीतस्य

अनवद्यवाद्यलयगामि कोमलं
नवगीतमप्यनवगीततान्दधत्।
स्फुटसात्त्विकाङ्गिकमनृत्यदुज्ज्वलं
सविलासलासिकविलासिनीजनः ॥ ६६ ॥

समकालत्वं तद्गामि द्रुतविलम्बादिमानानुवर्त्तीत्यर्थः । तालः कालक्रियामानं लयः साम्यमित्यमरः । नवङ्गीतं यस्य तन्नव गीतं तथाप्यनवगीततां दधदिति विरोधेऽपिशब्दः अगर्हितत्वं दधदित्यविरोधाद्विरोधाभासः । अवगीतं तु निर्वादे मुहुर्गीते च गर्हिते इति विश्वः । सत्वमन्तःकरणं तेन निर्वृत्तं नृत्यं सात्त्विकं अङ्गं हस्तादि तेन निर्वृत्तमाङ्गिकं । निर्वृत्ते त्वङ्गसत्वाभ्यां द्वे त्रिष्वाङ्गिकसात्त्विके इत्यमरः । ते स्फुटे यस्मिंस्तत्तथोक्तं । वाचिकस्याप्युपलक्षणमेतत् । यथाह भगवान् भरतः । पदार्थाभिनयो नाम ज्ञेयो वागङ्गसत्वजइति । अतएव कालिदासोऽपि अङ्गसत्ववचनाश्रयं मिथः स्त्रीषु नृत्यमुपधाय दर्शयन्निति । कोमलं मधुरनृत्यमुज्ज्वलमुद्धतं चानृत्यत् । तथोक्तं दशरूपके । भावाश्रयन्तु नृत्यं स्यान्नृत्यं ताललयाश्रयम् । आद्यं पदार्थाभिनयो मार्गो देशी तथापरः । मधुरोद्धतभेदेन तद्द्वयं द्विविधं पुनः । लास्य ताण्डवरूपेण नाटकाद्युपकारकमिति ॥ ६६ ॥

सकलइति । किं चेति चार्थः । स राजा हरौ कृष्णे गृहमागते सकले तत्र नगरे इन्द्रप्रस्थे । अकाले प्रसिद्धवसन्ताद्यतिरिक्ते काले । महमुत्सवं । मह उद्धव उत्सवइत्यमरः । आदिदेश आज्ञापयामास । नूनमत्रोत्प्रेक्ष्यते उन्मुदः कृष्णागमनादुत्कटानन्दस्य मनोवृत्ता

सकले च तत्र गृहमागते हरौ
नगरेऽप्यकालमहमादिदेश सः ।
सततोत्सवन्तदिति नूनमुन्मुदो
रभसेन विस्मृतमभून्महीभृतः ॥ ६७ ॥
हरिराकुमारमखिलाभिधानवि
त्स्वजनस्य वार्त्तमयमन्वयुङ्क्त च ।
महतीमपि श्रियमवाप्य विस्मयः
सुजनोन विस्मरति जातु किञ्चन ॥ ६८ ॥

धर्म्मनन्दनस्य तन्नगरं सततं उत्सवायस्मिन् तत् सततोत्सवमिति इत्येन द्रभसेन त्वरया विस्मृतमभूत् अन्यथा कथ इतकरणोपदेशइति भाव: ॥ ६७ ॥

हरिरिति । किञ्चेति चार्थ: । अखिलान्यभिधानानि नामानि वेत्तीति अखिलाभिधानवित् सकलनामप्रपञ्चाभिज्ञः । नामरूपे व्याकरवाणीतिश्रुतेरिति भाव: । आख्याह्वे चाभिधानं च नामधेयं च नाम चेत्यमर: । अयं हरि: कृष्ण: कुमारमारभ्यत्याकुमारं । आङ्मर्य्यादाभिविध्योरित्यभिधानादव्ययी भाव: । स्वजनस्य बन्धुजनस्य । बन्धुस्वस्वजना: समाइत्यमर: । वार्त्तमनामयं आरोग्यमित्यर्थ: । वार्तं फल्गुन्यरोगे चेत्यमर: । ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयमिति मनुस्मरणात् । अन्वयुङ्क्त अपृच्छत् । प्रश्नोऽनुयोग: पृच्छा चेत्यमर: । युजे: कर्त्तरि लङ् । तथा हि महतीं श्रियं सम्पदमवाप्यापि विस्मय: निरहङ्कार: सुजन: अतएव जातु कदाचिदपि किञ्चन

मर्त्यलोकदुरवापमवाप्तरसोदयं
नूतनत्वमतिरिक्ततयानुपदन्दधत्।
श्रीपतिः पतिरसाववनेश्च परस्पर
सङ्कथामृतमनेकमसिस्वदतामुभौ॥ ६९ ॥
इति श्रीशिशुपालवधे महाकाव्ये श्रीशब्दा
लङ्कृतसर्गान्ते श्रीकृष्णसमागमोनाम
त्रयोदशः सर्गः ॥ १३ ॥

किमपि न विस्मरति। सुजनः सम्पन्नोऽप्यहङ्कारं न करोतीति भावः सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ६८ ॥

मर्त्येति। उभौ श्रीपतिः कृष्णः असाववनेः पतिः धर्मसुतश्च परस्परं मर्त्यलोकैर्मनुष्यलोकैर्दुरवापं दुर्लभं अवाप्तरसोदयं प्राप्तरसोत्कर्षं स्वादुभवदित्यर्थः अतिरिक्ततया अतिस्निग्धतया अनुपदमनुक्षणं प्रतिवाक्यं च नूतनत्वमपूर्वतां दधत् अनेकं बहुलं सङ्कथा संभाषणं चैदिराजजरासन्धादिकार्यचिन्तारूपं तदेवामृतं तदसिस्वदतां स्वादितवन्तौ। आकरः स्वपरभूरिकथानां प्रायशो हि सुहृदोः सहवासइति भावः। स्वदतर्णौ चङ्युपधायाः ह्रस्वः। सङ्कथामृतमिति रूपकालङ्कारः स्वादनलिङ्गात् ॥ ६९ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघकाव्यव्याख्याने सर्वङ्कषाख्ये त्रयोदशः सर्गः ॥ १३ ॥

तं जगाद गिरमुद्गिरन्निव
स्नेहमाहितविकाशया दृशा ।
यज्ञकर्मणि मनः समादधद्
वाग्विदांवरमकद्वदो नृपः ॥ १ ॥

तमिति । वदतीति वदः । पचाद्यच् । कुत्सितस्य वदः कद्वदः गर्ह्यवाक् । गर्ह्यवादी तु कद्वद इत्यमरः । रथवदयोश्चेति कोः कदादेशः । स न भवतीत्यकद्वदः साधुवादी नृपो युधिष्ठिरः यज्ञकर्मणि यज्ञानुष्ठाने मनः समादधत् सम्यगादधत् तदेव हृदि निधायेत्यर्थः । आहितविकाशया कृतप्रसादया दृशा दृष्ट्या स्नेह मुद्गिरन्नुद्वमन्निवेत्युत्प्रेक्षा । दृष्टिविकाशात् प्रकटितस्नेहः सन्नित्यर्थः । वाचो विन्दन्ति वक्तुं विवेक्तुं च जानन्तीति वाग्विदः वाक्यकोविदाः । सत्सूद्विषेत्यादिना क्विप् । तेषां वरं श्रेष्ठं तं हरिं गिरं जगाद । ब्रूतेरर्थग्रहणात् दुह्याद्येत्यादिना गदेर्द्विकर्मकत्वम् । अत्रोत्प्रेक्षावृत्त्यनुप्रासयोः संसृष्टिः । अस्मिन्सर्गे रथोद्धता वृत्तं रान्नराविह रथोद्धता लगौ इति लक्षणात् ॥ १ ॥

गिरं जगादेत्युक्तामेव गिरं दशभिः प्रपञ्चयति । लज्जत इत्यादिभिः। परः अन्यः कश्चित्पुमान् प्रियमुदितः प्रियवाक्यमुक्तः सन्नित्यर्थः । गदेर्दुहादित्वादप्रधाने कर्मणि क्तः । अप्रधाने दुहादीनामिति वचनात् । न लज्जते तस्योत्सुकत्वादिति भावः किन्तु वक्तुः श्रोतुरेवाधिका त्रपा भवति । भयादिना मिथ्यावाचकत्वादिति भावः । प्रकृते तु नैवमित्याह । तव प्रियं वदन् त्वां स्तुवन्नित्यर्थः श्रोतां न एति अनन्तगुणाधारे त्वयि वहोरपि प्रियस्य

लज्जते न गदितः प्रियं परो
वक्तुरेव भवति त्रपाधिका ।
व्रीडमेति न तव प्रियं वदन्
ह्रीमतात्रभवतैव भूयते ॥ २ ॥
तोषमेति वितथैः स्तवैः पर
स्ते च तस्य सुलभाः शरीरिभिः ।
अस्ति न स्तुतिवचोऽनृतन्तव
स्तोत्रयोग्य न च तेन तुष्यसि ॥ ३ ॥

अमिथ्यात्वादिति भावः । किन्तु स्तवनेन अत्रभवता पूज्येनैव ह्रीमता भूयते प्रत्युत त्वमेवात्र जिह्रेषीत्यर्थः महतामनुत्सुकत्वादिति भावः । पूज्यस्तत्रभवानिति सज्जनः । इतराभ्योऽपीति सार्वविभक्तिकस्तसिल्प्रत्यये सुप्सुपेति समासः ॥ २ ॥

तोषमिति । परस्त्वदन्यः वितथैरसत्यभूतैः स्तवैः स्तोत्रैः । स्तवः स्तोत्रं नुतिः स्तुतिरित्यमरः । तोषमुत्सुकतामेति ते च तस्य परस्य ते मिथ्यास्तवाः शरीरिभिः प्राणिभिः सुलभाः असम्बद्धप्रलापानामनिर्मलत्वादिति भावः । त्वयि तु नैवमित्याह । अस्तीति । हे स्तोत्रयोग्य गुणाकरादिति भावः । अतएव तव सम्बन्धि स्तुतिवचोऽनृतं नास्ति न भवति तेन स्तुतिवचसा न तुष्यसि न प्रसीदसि गम्भीरत्वादिति भावः अत्र श्लोकद्वये पुरुषान्तरादुपमानभूतादाधिक्यकथनाद्व्यतिरेकालङ्कारः ॥ ३ ॥

वक्त्यपीति । अयञ्जनः स्वयमित्यर्थः परास्तूयते वक्त्यपि तव प्रियं ब्रुवन् सन् अनृतवादितां मिथ्यावादित्वं न व्रजति न

वक्त्यपि प्रियमयन्त्रितं भृशं
न व्रजत्यनृतवादितां जनः ।
सम्भवन्ति यददोषदूषिते
सार्व सर्व्वगुणसम्पदस्त्वयि ॥ ४ ॥

सा विभूतिरनुभावसम्पदां
भूयसी तव यदायतायति ।
एतदूढगुरुभारभारतं
वर्षमद्य मम वर्त्तते वशे ॥ ५ ॥

गच्छति यद्यस्मात् हे सार्व सर्वहितत्वात्सार्वः तत्सम्बोधने । यद्दोषदूषितो न भवतीत्यदोषदूषिते सर्व्वागुणवर्जिते त्वयि सर्वगुणसम्पदः सम्भवन्ति । अनारोपितगुणवादो भूयानपि न विपर्येतीति भावः । अत्रोत्तरवाक्यार्थेन पूर्व्ववाक्यार्थसमर्थनाद्वाक्यार्थहेतुकं काव्यलिङ्गम् ॥ ४ ॥

सेति । हे ऊढगुरुभार विश्वम्भरत्वादिति भावः । एतत भरतस्य राज्ञइदं भारतं । भारतनामाख्यं वर्षं । वर्षोऽस्त्री भारतादौ चेति हेमः । लोकोऽयं भारतं वर्षमित्यमरः । अद्येदानीमायतायति बहुतरकालस्थिरं यथा तथेत्यर्थः । उत्तरः कालआयतिरित्यमरः । मम वशे आयत्ततायां वर्त्ततइति यावत् । वश आयत्ततायाञ्चेति विश्वः । स मद्मवर्त्तनं विधेयप्राधान्यात् स्त्रीलिङ्गता । तवानुभावसम्पदां सामर्थ्यातिशयानां भूयसी महती विभूतिर्महिमा कार्यमिति यावत् । त्वत्प्रसादलब्धमिदमैश्वर्यमित्यर्थः ।

सप्ततन्तुमधिगन्तुमिच्छतः
कुर्व्वनुग्रहमनुज्ञया मम।
मूलतामुपगते खलु त्वयि
प्रापि धर्म्ममयवृक्षता मया॥ ६ ॥

सम्भृतोपकरणेन निर्म्मलां
कर्त्तुमिष्टिमभिवाञ्छता मया
त्वं समीरणइव प्रतीक्षितः
कर्षकेण वलजान्पुपूषता ॥ ७ ॥

अत्र निजैश्वर्य्यस्य भगवदनुभावसम्पदं विना सम्बन्धेऽप्यसम्बन्धोक्तेरतिशयोक्तिः ॥ ५ ॥

तदेवं स्तुत्या हरिमभिमुखीकृत्य कृत्यांशमावेदयति । सप्तेति । सप्त तन्तवः संस्था यस्य तं सप्ततन्तुं क्रतुं । सप्ततन्तुर्मखः क्रतुरित्यमरः । अधिगन्तुमाप्तुमिच्छतो ममानुज्ञयानुज्ञादानेनानुग्रहं प्रसादं कुरु साहाय्यं कुर्व्वित्यर्थः स्वतःसमर्थस्य किं मदनुग्रहेणेत्याह हे प्रभो त्वयि मूलतां मुख्यकारणतामस्मिन् चोपगते सति । मया धर्म्ममयवृक्षता धर्म्मात्मकवृक्षता प्रापि प्राप्ता । प्राप्नोतेः कर्मणि लुङ् । प्रागपि त्वदनुग्रहादेव धर्म्मसर्व्वस्वम् धर्म्मराजोऽहमस्मीति भावः अत्र नृपस्य धर्म्मवृक्षत्वेन हरेस्तन्मूलत्वेन रूपणात् सावयवरूपकं तेन त्वदनुग्रहः सर्वथा प्रार्थनीयो मया धर्म्मार्थिनेति तात्पर्य्यं व्यज्यते ॥ ६ ॥

सम्भृतेति । निर्म्मलां निर्द्दोषां इष्टिं यागं । यजेः स्त्रियां क्तिन् वचिस्वपीत्यादिना सम्प्रसारणं । कर्त्तुमभिवाञ्छता अतएव सम्भृतो

वीतविघ्नमनघेन भाविता
सन्निधेस्तव मखेन मेऽधुना ।
कोऽविहन्तुमलमास्थितोदये
वासरश्रियमशीतदीधितौ ॥ ८ ॥

पकरणेन सम्पादितसाधनेन मया खलजान् धान्यराशीन् । खल ओधान्यराशिः स्यादिति वैजयन्ती । पुपूषता पवितुं साधयितुं निर्बुसीकर्तुं इच्छता । पुनातेः सन्नन्ताल्लटः शत्रादेशः सनि ग्रहगुहोश्चेति सकारादेरिटः प्रतिषेधः । कर्षकेण कृषीवलेन समीरणो वायुरिव प्रतीक्षितः । प्रवाते शूर्पादिना धान्यस्योत्क्षेपः पवनं तद्वातं विनेव त्वां विना समाहृतसम्भारेणापि मया यागो दुष्कर इति भावः ॥ ७ ॥

वीतविघ्नमिति । अधुना तव सन्निधेर्हेतोर्मे मखेन क्रतुना कर्त्रा वीतविघ्नमविघ्नं अनघेन निर्दोषेण भाविता भविष्यतइत्यर्थः । भावे लुट् स्यसिच्सीयुट्तासिष्वित्यादिना लुटि चिण्वद्भावात् वृद्धिः । तथा हि अशीतदीधितावुष्णांशावास्थितोदये प्राप्तोदये सति कोवासरश्रियमह्नश्शोभां विहन्तुमलं शक्तः न कोऽपीत्यर्थः । अत्र हरिमरीचिमालिनोर्वाक्यभेदात् बिम्बप्रतिबिम्बतया सन्निहितद्योतितया समानधर्मतया निर्देशो दृष्टान्तालङ्कारः । यत्र वाक्यद्वये बिम्बप्रतिबिम्बतयोच्यते सामान्यधर्मवाक्ययोः स दृष्टान्तो निगद्यतइति लक्षणात् ॥ ८ ॥

स्वापतेयमिति । स्वपतौ स्वामिनि साधु स्वापतेयं वित्तं । पथ्यतिथिवसतिस्वपतेर्ढञ् । द्रव्यं वित्तं स्वापतेयमित्यमरः ।

स्वापतेयमधिगम्य धर्म्मतः
पर्य्यपालयमवीवृधञ्च यत्।
तीर्थगामि करवै विधानत
स्तज्जुषस्व जुहवानि चानले ॥ ९ ॥

पूर्व्वमङ्ग जुहुधि त्वमेव वा
स्नातवत्यवभृथे ततस्त्वयि।
सोमपायिनि भविष्यते मया
वाञ्छितोत्तमवितानयाजिना ॥ १० ॥

धर्म्मतः क्षत्रियस्य विजितमिति शास्त्रोक्तप्रकारादित्यर्थः अधिगम्य लब्ध्वा। यत्नेन पर्य्यपालयं पालितवान् अवीवृधं वृद्धिं च प्रापितवान्। तत्तीर्थगामि विप्राधीनं करवै करिष्यामि। विधानतः। पालितं वर्द्धयेन्नीत्या वृद्धं पात्रेषु निर्वपेदिति स्मरणात्। तच्च पात्रं त्वमेवेत्याह। तत्सर्व्वं जुषस्व सेवस्व सदैव भुङ्क्ष्वेत्यर्थः। जुषी प्रीतिसेवनयोरिति धातोर्लोट्। अनले जुहवानि च जुह्वां त्वन्मुखेनापि तवैव भोक्तृत्वादिति भावः। जुहोतेः संप्रश्नलोटि मेर्निरादेशः ॥ ९ ॥

पूर्व्वमिति। वेति पक्षान्तरे अथवेत्यर्थः अङ्ग हे कृष्ण। अथ सम्बोधनार्थकाः स्युः अङ्ग हे है भोः इत्यमरः। पूर्व्वं त्वमेव जुहुधि यजस्वेत्यर्थः। हुझल्भ्यो हेर्धिरिति हेर्धिरादेशः। सोमपायिनि त्वयि अवभृथे यज्ञे। दीक्षान्तोऽवभृथो यज्ञ इत्यमरः। स्नातवति सति ततोनन्तरं मया वाञ्छितः उत्तमो वितानः राजसूयाख्यः। क्रतुविस्तारयोरस्त्री वितानं त्रिषु तुच्छके इत्यमरः। तेन तथा

किं विधेयमनया विधीयतां
त्वत्प्रसादजितयार्थसम्पदा ।
शाधि शासक जगत्त्रयस्य मा-
माश्रवोऽस्मि भवतः सहानुजः ॥ ११ ॥

याजिना भविष्यते । भावे लृट् । त्वयि इष्टवति पश्चादहं यक्ष्ये इत्यर्थः । अत्र श्लोकद्वयेन हरेर्यागाङ्गसम्बन्धे तत् सम्बन्धोक्तेरतिशयोक्तिः ॥ १० ॥

किमिति । अथवा त्वत्प्रसादेन त्वदनुग्रहेण जितया अयत्नलब्धया अनयार्थसम्पदा धनसम्पदा किं विधेयं किमनुष्ठेयं विधीयतां त्वयैव क्रियतां अहं तु अस्वतन्त्र इत्याह । हे जगत्त्रयस्य शासक मत् ममैवेति भावः मां शाधि शिक्षयेत्यर्थः । शासेर्लोटि शाहौ इत्यत्र शाहौ इति धिरादेशः झलो झलीति सकारलोपः । सहानुजः । सानुजः सन् । वोपसर्जनस्येति सहशब्दस्य सभावविकल्पः । भवतः तवाश्रवो विधेयोऽस्मि । विधेयो विनयग्राही वचने स्थित आश्रव इत्यमरः । अत्रानाश्रवस्याश्रवत्वसम्बन्धोक्तेरतिशयोक्तिरिति । दण्ड्याद्या मात्यमतेऽतिप्रियतराख्यानात्प्रेयोऽलङ्कारः । प्रियः प्रियतराख्यानमिति लक्षणात् आधुनिकास्तु भावनिबन्धने प्रेयोऽलङ्कार इति लक्षयन्ति । रथोद्धतस्य तचोक्ष्यते च ॥ ११ ॥

तमिति । अथानन्तरं विष्टराविव श्रवसी यस्य स विष्टरश्रवाः । विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवा इत्यमरः । इति एतां इत्थं तं वदन्तं नृपं । समस्तभूभृतः सर्वान् नृपान् आवयन् दशनां शुमयूखमिति व्याजोऽपदेशो यस्य तेन हारेण मुक्ताहारेण श्रवणं

तं वदन्तमिति विष्टरश्रवाः
श्रावयन्नथ समस्तभूभृतः ।
व्याजहार दशनांशुमण्डल
व्याजहारशबलन्दधद्वपुः ॥ १२ ॥

सादिताखिलनृपम्महन्मह
स्सम्प्रति स्वनयसम्पदैव ते ।
किम्परस्य स गुणः समश्नुते
पथ्यवृत्तिरपि यद्यरोगिताम् ॥ १३ ॥

श्यामं वपुर्दधत् व्याजहार व्याहृतवान् । अत्र दशनांशुमण्डलस्य व्याजशब्देनासत्यत्वप्रतिपादनात् अपह्नवभेदः ॥ १२ ॥

यदुक्तं या विभूतिरित्यादि तत्रोत्तरमाह । सादितेति । सम्प्रति ते तव महन्महस्तेजः स्वनयसम्पदैव निजनीतिमहिम्नैव सादिताखिलनृपं विजितसमस्तराजकं न तु मदनुभावादिति भावः तथा हि पथ्या हिता वृत्तिरन्नपानादिक्रिया यस्य सोऽपि अरोगितामारोग्यं समश्नुते यदि प्राप्नोतीति चेत् सोऽपि तदारोग्यमित्यर्थः विधेयप्राधान्यात्पुंलिङ्गता । परस्य भिषजस्य गुणः किं नेत्यर्थः । पथ्यवृत्तेरारोग्यमौषधवाद्यत्वाद्भिषजो गुणोऽस्तु हितमेध्याशिनो न तथेत्यर्थः स्वयमसमर्थः पराधीनसिद्धिरित्युपचारइति भावः । दृष्टान्तालङ्कारः सुगमः ॥ १३ ॥

यदुक्तं पूर्वमङ्ग जुडधि त्वमेवेति तत्राप्याह । तदिति तत्तस्माद्दुक्तरीत्या तवैवाधिकारित्वादित्यर्थः । सुराज्ञि । विजयप्रतापचत्वादिगुणयोगात् शङ्कुचर्चिये । न पूजनादिति समासान्तप्रतिषेधः ।

इत्युदीरितगिरन्नृपस्त्वयि
श्रेयसि स्थितवति स्थिरा मम ।
सर्वसम्पदिति शौरिमुक्तवा
न्नन्दयन्मुदमुदस्थित क्रतौ ॥ १७ ॥

आननेन शशिनः कलान्दध
द्दर्शनक्षयितकामविग्रहः ।
आप्लुतस्स विमलैर्जलैरभू
दष्टमूर्त्तिधरमूर्त्तिरष्टमी ॥ १८ ॥

इतीति । इतीत्थं उदीरितगिरमुपन्यस्तवाचं शौरिं नृपो युधिष्ठिरः त्वयि श्रेयस्यभ्युदये विषये स्थितवति सति क्षेमङ्करे सतीत्यर्थः मम सर्वसम्पत् स्थिरेत्युक्तवान् । मुदं उद्वहन् सहाय सम्पत्त्या सम्मुखम् सन् । क्रतावुदस्थित क्रतुं कर्त्तुं उद्युक्तवानित्यर्थः । तिष्ठतेर्लुङि उदोऽनूर्द्ध्वकर्म्मणि इत्यादिनात्मनेपदं स्थाघ्वोरिच्चेति सिचः किच्चादिकारः ह्रस्वादङ्गादिति सकारलोपः ॥ १७ ॥

अथ पञ्चविंशता श्लोकैरनेकधा क्रतुं वर्णयति । आननेनेत्यादि । आननेन शशिनः कलामिव कलां कान्तिं दधत् । निदर्शनालङ्कारः । शशिमुख इत्यर्थः । अन्यत्र शशिकलाधरेत्यर्थः । दर्शनेन क्षयितौ नाशितौ कामविग्रहौ कामक्रोधौ येन सः । अन्यत्र दृष्टिदग्धस्मरशरीरः विमलैर्जलैराप्लुतः स्नातः । नद्यां स्नातीति दीक्षायां स्नानविधानादिति भावः । अन्यत्र गङ्गोदकक्लिन्नः गङ्गाधर इत्यर्थः । स नृपः । अष्टानां पूरणी अष्टमी । तस्य पूरणे डडिति डट् प्रत्ययः नान्तादसङ्ख्यादेर्मडिति मडागमः टिड्ढाणञित्यादिना

तस्य साङ्ख्यपुरुषेण तुल्यतां
बिभ्रतः स्वयमकुर्व्वतः क्रियाः।
कर्त्तृता तदुपलम्भतोऽभव
द्वृत्तिभाजि करणे यथर्त्त्विजि ॥ १९ ॥

ङीप्। अष्टानां मूर्त्तीनां समाहारोऽष्टमूर्त्ति। तद्धितार्थेत्यादिना समाहारे द्विगुरेकवचनं नपुंसकञ्च। तस्य धरो धारयिताऽष्टमूर्त्तिधरः शिवः तस्य अष्टमी मूर्त्तिरभूत् सोमदीक्षितोऽभूदित्यर्थः तस्याप्यागमे शिवमूर्त्तित्वप्रसिद्धेः। अत्र प्रकृताप्रकृतयोर्नृपशिवयोः शिवशब्दमात्रसाधर्म्यात् श्लेषालङ्कारः ॥ १८ ॥

तस्येति। क्रियाः कर्म्माणि होमादीनि। अन्यत्र पुण्यपापकर्म्माणि। स्वयमकुर्वतोऽननुतिष्ठतः। अन्यत्र उदासीनस्य। अतएव साङ्ख्यपुरुषेण साङ्ख्यशास्त्रोक्तेनात्मना तुल्यतां बिभ्रतस्तस्य राज्ञः करणे अन्तःकरणे यथा बुद्धाविवेत्यर्थः। ऋतौ यजतीति ऋत्विक् याजकः। ऋत्विजो याजकाश्च ते इत्यमरः। ऋत्विग्दधृगिति निपातः। तस्मिन्वृत्तिभाजि होमादिव्यापारं कुर्वतीत्यर्थः। अन्यत्र पुण्यपापकारिणि सति तदुपलम्भतः तस्य ऋत्विग्वृत्तेरुपलम्भान्ममेदमित्यनुसन्धानादेव कर्त्तृता क्रियानुष्ठातृत्वमभवत्। तथैव विधिसामर्थ्यादिति भावः। अतएवाह भगवान् जैमिनिः अन्या वा स्यात्परिक्रियाम्नानात्त्वप्यात्मनेपदं इति। अन्यत्र तदुपलम्भतस्तस्या बुद्धिवृत्तेरुपलम्भात्प्रतिबिम्बेनानुसन्धानादेव कर्त्तृत्वमभवत् स्वयं क्रियाभोगरहितोऽपि आत्मा बुद्धेः सन्निधानाज्जपास्फटिकवत्तथा भवतीत्यर्थः। उपमालङ्कारः ॥ १९ ॥

शब्दितामनपशब्दमुच्चकै
र्वाक्यलक्षणविदोऽनुवाक्यया ।
याज्यया यजनकर्मिणोऽत्यजन्
द्रव्यजातमपदिश्य देवताम् ॥ २० ॥

शब्दितामिति । वाक्यलक्षणविदो मीमांसाशास्त्रज्ञाः । यजनकर्मिणो यजनव्यापारवन्त ऋत्विजः । व्रीह्यादित्वादिनिप्रत्ययः । अनूच्यत इति अनुवाक्या तया अनुवाक्यया । अनूच्य याज्यया जुहोतीति श्रुतेः सा च मन्त्ररूपा तदभावे होतृपाठ्या देवताह्वानी ऋक् । वचेः ऋहलोर्ण्यत् चजोः कु घिण्ण्यतोरिति कुत्वं शब्दसंज्ञत्वाद्वचोऽशब्दसंज्ञायामिति न प्रतिषेधः । उच्चकैः अनपशब्दं यथा तथा शब्दितां मन्त्रवर्णेनोच्चैः प्रकाशितामित्यर्थः उच्चैः ऋचा क्रियत इति विधानात् । शब्द संशब्दने इति धातोश्चौरादिकात्कर्मणि क्तः । देवतामिन्द्रादिकामपदिश्य द्रव्यजातं पशुपुरोडाशादि हविःसमूहं इज्यतेऽनयेति याज्या सा च होतृपाठ्या यागाङ्गसाधनमृक् याज्यया जुहोतीति श्रुतेः । पूर्ववत् ऋहलोर्ण्यदिति करणे ण्यत् यजयाचरुचप्रवचर्चश्चेति कुत्वप्रतिषेधः । तया अत्यजन् अयजन्नित्यर्थः । देवतोद्देशेन द्रव्यत्यागो याग इति लक्षणात् । स च त्यागः सामान्यत आहवनीये जुहोतीति तदाहवनीय इति सामान्यन्यायात् विधानादन्यत्रेति ध्येयम् । द्रव्यत्यागस्याध्वर्युमात्रकर्तृत्वेऽपि याज्यापुरोनुवाक्याद्वारा होतृप्रशास्त्रोरपि साहित्यादत्यजन्निति बहुत्वव्यपदेशः । तथाच मैत्रावरुणेन पुरोऽनुवाक्यायामनुक्तायां तत्प्रकाशितदेवतोद्देशेनाध्वर्युर्होतृ

सप्तभेदकरकल्पितस्वरं
साम सामविदसङ्गमुज्जगौ ।
तत्र सूनृतगिरश्च सूरयः
पुण्यमृग्यजुषमध्यगीषत ॥ २१ ॥

पठितयाज्यामन्त्रे वषट्कारेण सोमादिकं हविरग्नावत्याचीदित्यर्थः। स्वभावोक्तिरलङ्कारः ॥ २० ॥

सप्तेति । तत्र क्रतौ । सामानि वेत्तीति सामविदुद्गाता । सप्त भेदं सप्तप्रकारं यथा तथा करेण हस्तेन कल्पिताः सम्पादिताः स्वराः निषादादयः यस्य तत् करविन्यासभेदादिभिर्व्यञ्जितसप्त स्वरमित्यर्थः । निषादर्षभगान्धारषड्जमध्यमधैवताः पञ्चमश्चेत्यमी सप्तेत्यमरः । यद्वा स्वराः क्रुष्टादयः । क्रुष्टः प्रथमोद्वितीयो मन्द्रोनीचइत्यादयः । साम बृहद्रथन्तरादिकमसङ्गमस्खलित मुज्जगौ उदगायत् । किञ्च सूनृतगिरः प्रियसत्यवाचः । प्रियं सत्यञ्च सूनृतं इत्यमरः । सूरयोविद्वांसोहोत्रध्वर्य्वादयः पुण्यं श्रेयस्करं । ऋचश्च यजूंषि च तत् ऋग्यजुषमग्निमीळइषेत्वेत्यादिकम् । द्वन्द्वैकवद्भावः अचतुरेत्यादिना द्वन्द्वे समासान्तनिपातः । अध्यगीषत । इङोलुङि विभाषा लुङ्लृङोरिति गाङादेशः पक्षे कुटादित्वात् सिचः कित्त्वे घुमेत्यादिना ईत्वम् । अत्र साम सामेत्यादौ वृत्त्यनुप्रासभेदोद्रष्टव्यः ॥ २१ ॥

बद्धेति । बद्धं दर्भमयं दर्भविकारं काञ्चिदाम रसनागुणो यथा तथा । दामेति डाबुभाभ्यामन्यतरस्यामिति डाप्प्रत्ययः । यजमानोयष्टा । पूज्यजोः शानजिति यजेः शानच्प्रत्ययः । तस्य

बद्धदर्भमयकाञ्चिदामया
वीक्षितानि यजमानजायया ।
शुष्मणि प्रणयनादिसंस्कृते
तैर्हवींषि जुहवाम्बभूविरे ॥ २२ ॥
नाञ्जसा निगदितुं विभक्तिभि-
र्व्यक्तिभिश्च निखिलाभिरागमे ।
तत्र कर्म्माणि विपर्य्यणीनमन्
मन्त्रमूहकुशलाः प्रयोगिणः ॥ २३ ॥

जायया पत्न्या वीक्षितानि दृष्टानि हवींषि आज्यानि पत्न्यवेक्षत इत्याज्यस्य पत्न्यवेक्षणसंस्कारविधानात् अर्थप्रधानत्वात् सर्वेषामाज्यादीनां प्राणभृन्न्यायेन वीक्षितत्वव्यपदेशः प्रणयनं नाम गार्हपत्यादुद्धृत्य मन्त्रेणायतने सादनं आदिशब्दात्परिस्तरणपरिधानसंमार्गादिसंस्कारसङ्ग्रहः तैः प्रणयनादिभिः संस्कृते आहितातिशये शुष्मणि अग्नौ । वर्हिः शुष्मा कृष्णवर्त्मेत्यमरः । अत्राप्याहवनीये जुहोतीति हूयमाने अध्वर्युः कर्त्ता । जुहूपात्रव्यापृतया स्रुवाहवनीयं प्रधानमिति न्यायवचनात् । तैः ऋत्विग्भिः जुहवांबभूविरे । जुहोतेः कर्म्मणि लिट् भीह्रीभृहुवामिति विकल्पादाम्प्रत्ययः । अत्र विषयस्य योक्त्रस्यानुपादानेन विषयिणः काञ्चीगुणस्यैव तदभेदेन निर्द्देशाद्भेदे अभेदरूपातिशयोक्तेरनुप्राणेन सङ्करः ॥ २२ ॥

नेति । तत्र तस्मिन् कर्म्मणि यज्ञकर्म्मणि । अन्यथाश्रुतस्य मन्त्रस्यान्यथा लिङ्गवचनादिभेदेन विपरिणमनमूहः तत्र कुशलाः ।

संशयाय दधतोः सरूपतां
दूरभिन्नफलयोः क्रियां प्रति ।
शब्दशासनविदः समासयो-
र्विग्रहं व्यवससुः स्वरेण ते ॥ २४ ॥

प्रयोगिण एषामस्तीति प्रयोगिणः प्रयोक्तारः ऋत्विजः आगमे आम्नाये निखिलाभिर्विभक्तिभिः प्रथमादिभिः सुब्विभक्तिभिस्तिङ्विभक्तिभिश्च त्रिभक्तिग्रहणं वचनोपलक्षणम् । व्यक्तिभिर्लिङ्गैश्चाञ्जसा सुखेन निगदितुं पठितुं न भवत्यशक्यत्वादिति नाञ्जसानिगदितुम् । अञ्जस उपसङ्ख्यानमिति अलुक् नञर्थस्य नशब्दस्य सुप्सुपेति समासः । अथवा अञ्जसेति तृतीयान्तप्रतिरूपकमव्ययं तत्त्वार्थे । अञ्जसा तत्त्वतूर्णयोरिति विश्वः । अञ्जसा तत्त्वत इत्यर्थः । अस्मिन् पक्षे नैकपद्यनियमः । तं मन्त्रं । कर्माङ्गदेवतारूपवाक्यविपर्ययेणानमन् विपरिणमन्ति स्म विपरिणमितवन्त इत्यर्थः । विपरिपूर्वकात् ण्यन्तात् णमधातोः लुङ् सन्वद्भावे सन्यत इत्यभ्यासस्येत्वं दीर्घो लघोरिति दीर्घः । उपसर्गादसमासेऽपि णोपदेशस्येति णत्वम् । अत्र नाञ्जसेतिपाठविशेषणगत्या मन्त्रविपरिणमनहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गम् ॥ २३ ॥

संशयायेति । संशयाय सन्देहोत्पादनाय सरूपतां सादृश्यं दधतोरुभयत्र रूपसाम्यादयं समासोऽयं वेति संशयं कुर्वतोरित्यर्थः । यथेन्द्रशत्रुरित्यत्रेन्द्रस्य शत्रुः शातयिता हन्तेति षष्ठीतत्पुरुषः इन्द्रः शत्रुर्यस्येति बहुव्रीहिरिति सारूप्यसंशयः तत्रानियमे दोषमाह । क्रिया प्रकृतं कर्म तां प्रति तामुद्दिश्येत्यर्थः

लोलहेतिरसनाशतप्रभा
मण्डलेन लसता हसन्निव।
प्राश्यमाज्यमसकृद्वषट्कृत
न्निर्मलीमसमलीढ पावकः ॥ २५ ॥

दूरभिन्नमत्यन्तविलक्षणं फलं ययोर्दूरभिन्नफलयोस्तयोरर्थभेदात्कर्मणः फलभेदं प्रतिपादयतोरित्यर्थः यथेन्द्रशत्रुरित्यत्रैव षष्ठीसमासस्येष्टत्वे इन्द्रस्य शत्रुत्वं बहुव्रीहौ तु तस्येन्द्रेण वध्यत्वमिति फलभेद इति भावः। समासयोरेवंविधयोः प्रसक्तयोः सतोरित्यर्थः। भावलक्षणे सप्तमी। शब्दशासनविदः शब्दशास्त्रज्ञाः अन्येषामनधिकारादिति भावः ते प्रकृताः ऋत्विजः स्वरेण तत्तत्समासविहितस्वरवशेन विग्रहं वाक्येन समर्थाभिधानं व्यवसुः निश्चिक्यु अस्मिन् स्वरेऽयं समासः तथायं विग्रह इति अन्यतरपक्षावधारणं चक्रुः। यथेन्द्रशत्रुरित्यत्रैव पूर्वपदे उदात्तत्वेन बहुव्रीहिस्वरेण बहुव्रीहिसमासनिश्चयः इन्द्रः शत्रुर्यस्येति विग्रहावधारणमित्यर्थः। व्यवपूर्वस्य स्यतेर्लिटि आदेच इत्यात्वे द्विर्वचनादिकार्य्ये झेरुसादेशः। अत्र संशयजनकत्वफलभेदप्रतिपादकपदार्थयोर्विशेषणगत्या सन्दिग्धे न्यायः प्रवर्त्तते इति न्यायेन विग्रहस्य व्यवसायहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ २४ ॥

लोलेति। लसता प्रकाशमानेन लोलाश्चञ्चला हेतयो ज्वाला एव रसना रशनाः। वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियामिति रसना रशना जिह्वेति चामरः। तासां शतानि तेषां प्रभामण्डलेन हसन्निवेति रूपकसङ्कीर्णोत्प्रेक्षा। पावको वह्निः वषट्कृतं वषट्कारेण त्यक्तं हुतमित्यर्थः। हुतं त्रिषु वषट्कृतमित्यमरः।

तत्र मन्त्रपवितं हविः क्रता
वश्नतो न वपुरेव केवलम्।
वर्णसम्पदमतिस्फुटां दध
न्नाम चोज्ज्वलमभूद्धविर्भुजः ॥ २६ ॥

निर्मलोमसममलिनं शुद्धमित्यर्थः । मलीमसं तु मलिनमित्यमरः । ज्योत्स्नातमिस्रेत्यादिना मलिनशब्दान्मत्वर्थे इमनिच्प्रत्ययान्तो निपातः । प्राज्यं प्रभूतमाज्यमलक्षदलीढमास्वादयत्। लिहेः स्वरितत्वात्तङि होढ इति ढत्वं झषस्तथोर्धोऽध इति धत्वं ष्टुत्वे ढलोपदीर्घौ ॥ २५ ॥

तत्रेति। तत्र क्रतौ। मन्त्रैरुत्पवनादिमन्त्रैः पवितं पवित्रितं शोधितमित्यर्थः । पूङश्चेति विकल्पादिडागमः । हविराज्यादिकमश्नतो भुञ्जानस्य । अश्नेर्भोजनार्थाल्लटः शत्रादेशः । हवींषि भुङ्क्त इति हविर्भुजोऽग्नेः सम्बन्धि। अतिस्फुटां अतिविकसितां वर्णसम्पदं रूपसमृद्धिं दधत् केवलमेकं । केवलं त्वेककृत्स्नयोरिति शाश्वतः। वपुरेवोज्ज्वलमोजिष्ठं नाभूत् । किन्तु अति स्फुटामतिव्यक्तां वर्णसम्पदमक्षरसमुदायं दधत्। वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णन्तु चाक्षर इत्यमरः। नाम हविर्भुगिति नामधेयं चोज्ज्वलं रूढं अभूत् निरन्तरं हविर्भोजनाद्वपुः पुष्टिमाप नाम चार्थवदासीदित्यर्थः अत्र भोजनस्याश्नत इति विशेषणगत्या हेतुत्वात्पदार्थहेतुकं काव्यलिङ्गम्॥ २६ ॥

स्पर्शमिति। उचितं स्वाभाविकं उष्णं उष्णाख्यं स्पर्शं स्पर्शनेन्द्रियग्राह्यं गुणविशेषं दधत् दधानः शिखी शिखावान्

स्पर्शमुष्णमुचितं दधच्छिखी
यद्ददाह हविरद्भुतं न तत्।
गन्धतोऽपि हुतहव्यसम्भवा
देहिनामदहदोघमंहसाम् ॥ २७ ॥

अग्निः। शीताद्रित्यादिभिः। हविराज्यादिकं ददाह भस्मीचकारेति यत् तदद्भुतं न उष्णस्पर्शवत्तस्याग्नेः पार्थिवद्रव्यदहनशक्तेः स्वाभाविकत्वादिति भावः कुतः हुतहव्यसम्भवात् हुतहवनीयहविर्जन्यात् गन्धतोगन्धात् अपि स्वगुणिकगुणादपीत्यर्थः देहिनां गन्धं जिघ्रतां प्राणिनामित्यर्थः अंहसां पापानामोघमपीति भावः अदहत् भस्मीकृतवान् नाशितवानित्यर्थः। अदाह्यदहनं त्वाश्चर्य्यमिति भावः। अत्रोष्णस्पर्शधारणस्य शिखिविशेषणभावेनास्य हविर्दाहहेतुत्वात् पदार्थहेतुकं तावदेकहाव्यलिङ्गम्। उत्तरार्द्धे त्वंहसां भस्मीकरणाभावलक्षणदाहविरोधस्य नाशलक्षणया समाधानाद्विरोधाभासे लक्ष्यस्य वाच्याभेदाध्यवसायमूलातिशयोक्तिप्रतिभोत्थापितः स एवादाह्यदाकत्वरूपोवाक्यार्थभूतपूर्व्वोक्तपदार्थहेतुककाव्यलिङ्गसहकृतो हविर्दहनाद्भुतत्वहेतुरिति वाक्यार्थहेतुककाव्यलिङ्गमन्यैः प्राधान्येन सङ्कीर्य्यते ॥ २७ ॥

उच्चमिति। सपदि होमधूममेत्रोच्चमनुद्गच्छन् दिशो धूमयन् धूमवर्णाः कुर्वन् साम्द्रतां नीरन्ध्रतां दधत् अतएवाधः कृताम्बुदः होमसावधीरितमेघोमेघापरिगतस्य दहनस्याग्नेः केतनः केतुर्धूमइत्यर्थः। धौरोकोयेषां तेषां दिवौकसान्देवानां। पृषोदरादित्वात्साधुः। अथवा दिवमोकोयेषामिति विग्रहः।

उन्नमन्सपदि धूम्रयन्दिशः
सान्द्रतान्दधदधःकृताम्बुदः ।
द्यामियाय दहनस्य केतनः
कीर्त्तयन्निव दिवौकसां श्रियम् ॥ २८ ॥
निर्जिताखिलमहार्णवौषधि
स्यन्दसारममृतं ववल्गिरे ।
नाकिनः कथमपि प्रतीक्षितुं
हूयमानमनले विषेहिरे ॥ २९ ॥

दिवं स्वर्गान्तरिक्षयोरिति विश्वः । तेषां प्रियमिष्टं कीर्त्तयन् कथयन्निव कीर्त्तनहेतोरिव कीर्त्तनार्थमिवेत्यर्थः अतएव फलोत्प्रेक्षा । कीर्त्तयन्निति लक्षणहेत्वोः क्रियाया इति हेत्वर्थे लटः शत्रादेशः । द्यामन्तरिक्षमियाय प्राप । इणो लिट् ॥ २८ ॥

निर्जितेति । नाकः स्वर्ग एषामस्तीति नाकिनो देवाः अखिलानां महार्णवौषधीनां महार्णवमन्थनसमये उत्थितानां दिव्यौषधिलतानां स्यन्दो मन्थनाभिः स्रुतो रसस्तस्य सारो मृष्टांशोऽमृतमिति यावत् स निर्जितो येन तत् अमृतादपि स्वादित्यर्थः । अमृतं हविरास्वाद्यामृतं । अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृते इति मेदिनी । ववल्गिरे अभ्यवजह्रुः । वल्ग भोजने कर्त्तरि लिट् । वल्गाभ्यवहारं प्रत्यवसानञ्च जेमनं जग्धिरिति हलायुधः । तथाप्यमृताधिक्यं व्यनक्ति अनले हूयमानं हीयमानममृतमिति भावः प्रतीक्षितुं कथमपि विषेहिरे सोढवन्तः क्षेमविलम्बं कथञ्चित् सहन्तेत्यर्थः क्षुधा तु प्रागेव जिग्रतीति रसातिशयोक्तिः । अथ हविषो

तत्र नित्यविहितोपहूतिषु
प्रोषितेषु पतिषु द्युयोषिताम् ।
गुम्फिताः शिरसि वेणयोऽभव
न्न प्रफुल्लसुरपादपस्रजः ॥ ३० ॥
प्राशुराशु हवनीयमत्र य
त्तेन दीर्घममरत्वमध्यगुः ।
उद्धतानधिकमेधितौजसो
दानवांश्च विबुधा विजिग्यिरे ॥ ३१ ॥

ऽभूतमित्यभेदेऽप्यभेदरूपातिशयोक्तिस्तद्विशेषणपदार्थस्य वलान हेतुत्वात्काव्यलिङ्गभेदः तया सङ्कीर्यते । परिनिविभ्यः सेवसित सयसिवुसहेत्यादिना सहेः षत्वम् ॥ २९ ॥

तत्रेति । तत्र क्रतौ नित्यं विहितोपहूतिषु कृताह्वानेषु पतिषु भर्तृषु इन्द्रादिषु प्रोषितेषु प्रवासं गतेषु । वसेः कर्त्तरि क्तः वसति क्षुधोरितीडागमः । द्युयोषितां स्वर्गस्त्रीणां इन्द्राण्यादीनां शिरसि वेणयो जटा एव गुम्फिता ग्रथिताः अभवन् प्रफुल्लाः विकसिताः सुरपादपस्रजो मन्दारमालाः न गुम्फिता अभवन् । अत्र सुरयोषितां वेण्यसम्बन्धेऽपि सम्बन्धोक्तेः स्रक्सम्बन्धेऽप्यसम्बन्धोक्तेश्च सम्बन्धेऽसम्बन्धरूपा असम्बन्धे सम्बन्धरूपा चातिशयोक्तिः ताभ्यां क्रतोरजस्रत्वं व्यज्यते इत्यलङ्कारेण वस्तुध्वनिः ॥ ३० ॥

प्राशुरिति । विबुधाः सुराः अत्र क्रतौ आशु क्षिप्रं हूयत इति हवनीयं हविः यत् प्राशुः प्राशितवन्तः । अश भोजने लिट् द्विर्वचनादिकार्ये अत आदेरित्यभ्यासदीर्घः । तेन हविःप्राशनेन

नापचारमगमन् क्वचित् क्रियाः
सर्व्वमत्र समपादि साधनम्।
अत्यशेरत परस्परन्धियः
सत्रिणान्नरपतेश्च सम्पदः ॥ ३२ ॥

दीर्घं चिरभोग्यममरत्वं देवत्वमध्यगुः प्रापुः। इणोगा लुङीति गादेशः। किञ्च अधिकमत्यन्तमेधितौजसो वर्द्धितबलास्सन्तः प्रबुद्धान् दानवान् असुरांश्च विजिग्यिरे जितवन्तः। विपूर्व्वाज्जयतेः कर्त्तरि लिट् विपराभ्यां जेरित्यात्मनेपदम्। अत्र विबुधानां दीर्घामरत्वासुरविजयित्वासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः एधितौजस्त्वस्य विशेषणगत्या विजयहेतुत्वात्काव्यलिङ्गं तदुत्थापितस्यामरत्वासुरविजयक्रियासमुच्चयइति सङ्करः। गुणक्रियायौगपद्यं समुच्चयः ॥ ३१ ॥

नापचारमिति। अत्र क्रतौ क्वचित् कुत्रापि क्रियाः कर्म्माणि अपचारं लोपविषयविपर्य्यासादिदोषं नागमन्। गमेर्लुङि पुषादित्वा च्लेरङादेशः। अनपचारे हेतुमाह। अत्र सर्व्वं साधनं समपादि सम्पन्नं। पद्यतेः कर्त्तरि लुङ् चिण्ते पदइति चिण् प्रत्ययः कर्म्मणि वा। सम्पादितमित्यर्थः चिण्भावकर्म्मणोरिति चिण्प्रत्ययः। साधनसम्पत्तिमेव व्यनक्ति। अतीति। सत्रं यज्ञ तन्त्रं येषामस्तीति सत्रिणां ऋत्विजां। सत्रमाच्छादनं यज्ञमित्यमरः। धियः उत्तरोत्तरप्रयोगविज्ञानानि। तदुक्तं आचतुर्थात्कर्म्मणोऽभ्ये समोक्षेतेदं करिष्यामीति। तथा नरपतेराज्ञः सम्पदः पदार्थसमृद्धयश्च परस्परं अत्यशेरत अतिशयितवत्यः उभये

दक्षिणीयमवगम्य पङ्क्तिशः
पङ्क्तिपावनमथ द्विजव्रजम् ।
दक्षिणः क्षितिपतिर्व्यशिश्रण
द्दक्षिणाः सदसि राजसूयकीः ॥ ३३ ॥

ऽप्यतिशयमपादित्यर्थः ज्ञानद्रव्ये हि क्रियासाधन तत्सम्पत्त्य कुतः क्रियापचारइति भावः । अत्रानपचारवाक्यार्थस्य साधनसम्पत्ति वाक्यार्थहेतुकत्वाद्वाक्यार्थहेतुककाव्यलिङ्गं तस्य परस्परातिशयक्रिया रूपधर्म्मसाम्यगम्यौपम्यकेवलप्रकृतधीमत्पद्योचरया तुल्ययोगितयो क्नोवितनेत्यनयोरङ्गाङ्गिभावेन सङ्करः ॥ ३२ ॥

दक्षिणीयमिति । अथानन्तरं दक्षिणश्चौदार्यवान् । दक्षिणः सरलोदाराविल्यमरः । क्षितिपतिः राजा । दक्षिणामर्हतीति दक्षणीयः । दक्षिणीयोदक्षिणार्हः तत्र दाक्षिण्यइत्यपीत्यमरः । कडङ्गरदक्षिणाच्छ चेति छप्रत्ययः तं पङ्क्तेः स्वाधिष्ठितायाः पावनं पावयितारं पङ्क्तिपावनं । पावयतेः कर्त्तरि ल्युट् । द्विजव्रजं ऋत्विग्वर्गमित्यर्थः पङ्क्तिशः पङ्क्त्यनुसारेण अधिगम्य प्राप्य सदसि राजसूयकीः । राजसूयकाण्डोक्ता इत्यर्थः । दक्षिणाशब्दः स्फुटार्थः । राजसूयेत्यत्र दक्षिणार्थएव ठकोविधानात् । व्यशिश्रणत विश्राणयति स्म वितीर्णवानित्यर्थः । विश्राणनं वितरण मित्यमरः । श्रण दाने इति धातोर्लुङ्णौ चङ्युपधायाह्रस्वः । वृत्त्य नुप्रासोऽलङ्कारः ॥ ३३ ॥

वारीति । नराधिपोराजा सत्क्रियाभिरभिषेकसंस्कारैर्लब्धा शुद्धिर्निर्दोषता याभिस्तासु अखिलासु । द्विजाएव क्षेत्रभूमयः

वारिपूर्व्वमखिलासु सत्क्रिया
लब्धशुद्धिषु धनानि वीजवत् ॥
भावि बिभ्रति फलमहद्विज
क्षेत्रभूमिषु नराधिपोऽवपत् ॥ ३४ ॥
किन्नु चित्रमधिवेदि भूपति
र्दक्षयन्द्विजगणानपूयत ।
राजतः पुपुविरे निरेनसः
प्राप्य तेऽपि विमलम्प्रतिग्रहम् ॥ ३५ ॥

केदारभूमयः तासु । क्षेत्रं गेहे पुरे देहे केदारे योनिभार्य्ययो रिति वैजयन्ती । भावि भविष्यत् महत्फलं स्वर्गादिकं धान्यादिकं च बिभ्रति बिभ्राणानीत्यर्थः । वा न पुंसकस्येति विकल्पान्नु मागमप्रतिषेधः । धनानि वीजवत् वीजैस्तुल्यं वारिपूर्व्वमुदकदानपूर्व्वकमवपत् उप्तवान् दत्तवानित्यर्थः । अत्र वीजवत् इत्युपमानं । तेन तुल्यमिति तुल्यार्थे वतेर्विधानात् तथापि वाप क्रियायोगात् द्विजक्षेत्रेति रूपकसमासेनोपमितसमासः किन्तु रूपकस्याङ्गमुपमा तदुत्थापितत्वादिति मल्लिः ॥ ३४ ॥

किमिति । भूपतिरधिवेदि वेद्यां मखवेद्यामित्यर्थः । अत्र विभक्त्यर्थेऽव्ययीभावः । द्विजगणान्त्विग्गणान् दक्षयन् हर्षयन् दक्षिणाप्रतिग्रहेण सदक्षिणान् कुर्वन् प्रतिग्राहयन्नित्यर्थः तस्मिणे दक्षिणां प्रतिगृह्णीति श्रुतिदर्शनात् । दक्ष नैपुण्य इति धातोर्ण्यन्तात् लटः शत्रादेशः । अत एव निष्णाते दक्षिणे वापि नैपुण्ये निपुणेऽपि चेति भट्टः । अपूयत पूतोऽभवदिति । कर्म्मकर्त्तरि लङ् । किञ्चित्रं

स स्वहस्तकृतचिह्नशासनः
पाकशासनसमानशासनः।
आशशाङ्कतपनार्णवस्थिते
र्विप्रसादकृत भूयसीर्भुवः ॥ २६ ॥

हाता पूत इति न चित्रमित्यर्थः किन्तु प्रतिगृहीतापि पूत इति चित्रमाह। ते द्विजगणा अपि निरेनसो निष्पापा तद्राजतो राज्ञः। पञ्चम्यास्तसिल्। विमलं शुद्धं प्रतिग्रहं प्राप्य पुपुविरे पूता बभूवुः। विशुद्धाच्च प्रतिग्रह इत्यभिधानादिति भावः। अत्रापि पूञो कर्मकर्त्तरि लिट्। प्रतिगृहीतापि शुद्ध इति विरोधः स एव वाक्यार्थभूतश्चित्रत्वनिरोधहेतुरिति विरोधवाक्यार्थहेतुककाव्यलिङ्गयोरङ्गाङ्गिभावेन सङ्करः ॥ २५ ॥

स इति। पाको नाम कोऽपि राक्षसस्तस्य शासनः शासको हन्ता पाकशासनः इन्द्रस्तेन समानं शासनं तुल्याज्ञा यस्य स इत्यर्थः स राजा स्वहस्तेन कृतं लिखितं चिह्नं स्वनामलेखनादिलाञ्छनं येषु तानि शासनानि नियमपत्राणि यस्य सः दत्तस्वहस्तलेखाङ्कितशासनः स इत्यर्थः। आशशाङ्कतपनार्णवस्थितेः शशाङ्कतपनार्णवानभिव्याप्य आकल्पमित्यर्थः। अभिविधावाङ्। आङ्मर्यादाभिविध्योरिति विकल्पादसमासः। भूयसीर्भुवो देयभूमीः विप्रसात् विप्राधीनाः। देये त्रा चेति चकारात्सातिप्रत्ययः। अकृत कृतवान् दत्तवानित्यर्थः। कृञो लुङि तङ् उश्चेति सिचः कित्त्वात् ह्रस्वादङ्गादिति सकारलोपो गुणाभावश्च। पाकशासनसमानशासन इत्यपमानुप्रासयोः संसृष्टिः ॥ २६ ॥

शुद्धमश्रुतिविरोधि बिभ्रतं
शास्त्रमुज्ज्वलमवर्णसङ्करैः।
पुस्तकैः सममसौ गणम्मुहु-
र्वाच्यमानमशृणोद्द्विजन्मनाम् ॥ ३७ ॥

शुद्धमिति। असौ नृपः शुद्धमाचारपूतं। अन्यत्र विभक्ति विपरिणामेन शुद्धैरक्षरैः। श्रुतिविरोधि वेदविरुद्धं न भवतीत्यश्रुतिविरोधि शास्त्रं बिभ्रतं आत्मनि धारयन्तं सकलवैदिकशास्त्राभिज्ञमित्यर्थः। नाभ्यस्ताच्छतुरिति नुम्प्रतिषेधः। अन्यत्र श्रुत्यविरोधिभिः पुराणादिभिः। वाच्यमानं अन्वयगुणादिक्रमेण प्रस्तूयमानमन्यत्र वाच्यमानैर्द्विजगणेन व्याख्यायमानैरित्यर्थः। वचेश्चौरादिकात्कर्मणि लटः शानजादेशः। द्विजन्मनां ब्राह्मणानां गणं अवर्णसङ्करैरसङ्कीर्णाचारैः अन्यत्र जातिसङ्कररहितमिति विपरिणामः। पुस्तकैः समं पुस्तकाक्षरैर्वाच्यैः सह अशृणोत् दानकाले प्रत्येकं ब्राह्मणानां गुणान् गोष्ठीषु श्रुतवानित्यर्थः। मुखस्थविद्यानामपि पुस्तकधारणविलक्षणत्वेनोक्तमित्यदोषः अन्यत्र पुस्तकैः समं द्विजगणं अशृणोदिति। सम्बन्धिभेदे भिन्नयोः श्रवणयोरभेदाध्यवसायभेदे अभेदरूपातिशयोक्तिचमत्कारिणी द्विजानां प्रकृतत्वात् पुस्तकानीव द्विजानिति वैवक्षिकोपमानोपमेयभावपर्यवसायिनी श्लेषसङ्कीर्णसहोक्तिरलङ्कारः। सहार्थेनान्वयोयच भवेदतिशयोक्तितः कल्पितौपम्यपर्यन्ता सा सहोक्तिरिष्यते इति लक्षणात्। क्वचित् पुस्तकैः समं वाच्यमानमिति योजयित्वा पुस्तकेषु द्विजगणान्। लेखेष्वायतमानानिति

तत्प्रणीतमनसामुपेयुषा
न्दृष्टमाहवनमग्र्यजन्मनाम् ।
आतिथेयमनिवारितातिथिः
कर्त्तुमाश्रमगुरुः स नाश्रमत् ॥ ३८ ॥
मृग्यमाणमपि यद्दुरासद
म्भूरिसारमुपनीय तत्स्वयम् ।
आसतावसरकाङ्क्षिणो बहि
स्तस्य रत्नमुपदीकृतन्नृपाः ॥ ३९ ॥

व्याचष्टे । तैः पुस्तकेषु शास्त्रभरणासम्भावादवर्णसङ्करेति श्लिष्ट विशेषणावगतप्रकृतश्लेषभङ्गः पुस्तकानां वाचनकरणत्वात्सना दिशब्दवैयर्थ्यमुक्तमहोक्कालङ्कारभ्रंशश्चेति एवमादयो दोषादुस्तरा इत्यलं विस्तरेण ॥ ३७ ॥

तदिति । अनिवारिताः अप्रत्याख्याता अतिथयो येन सः आश्रमाणां ब्रह्मचर्य्यादीनां गुरुर्नियन्ता स राजा । आ समन्ता ज्जुहोत्यस्मिन्नित्याहवनं यागं । जुहोतेर्ल्युट् । दृष्टमुपेयुषामागतानां । अतएव प्रणीतमनसां सत्कर्मदर्शनात् हृष्टचित्तानां अग्र्यजन्मनां । अतिथिषु साध्वातिथेयमतिथिसत्कारं । पथ्यतिथीत्यादिना ढञ्प्रत्ययः । कर्त्तुं नाश्रमत् । न श्रान्तः । श्रम्यतेः पुषादित्वा ल्लुङि श्नेरङादेशः । अत्रानिवारितातिथित्वस्य विशेषणगत्या श्रम निषेधहेतुत्वात्काव्यलिङ्गं तदनुप्रासेन संसृज्यते ॥ ३८ ॥

मृग्यमाणमिति । यत् रत्नं मृग्यमाणं अन्विष्यमाणमपि दुरा सद दुर्लभं । भूरिसारं महासारं उपदीकृतमुपायनीकृतं मनसा

एकएव वसु यद्ददौ नृप
स्तत्समापकमतर्क्यत क्रतोः ।
त्यागशालिनि तपःसुते ययुः
सर्वपार्थिवधनान्यपि क्षयम् ॥ ४० ॥
प्रीतिरस्य ददतोऽभवत्तथा
येन तत्प्रियचिकीर्षवो नृपाः ।
स्पर्द्धिनैरधिकमागमन्मुद
स्ताधिवेश्म निहितैरुपायनैः ॥ ४१ ॥

यथासङ्कल्पितमित्यर्थः । उपायनमुपग्राह्यमुपहारस्तथोपदेत्यमरः । तद्रत्नं श्रेष्ठवस्तु । रत्नं श्रेष्ठे मणावपीति विश्वः । नृपाः स्वयमुपनीय तस्य राज्ञोऽवसरकाङ्क्षिणः सेवावसरं प्रतीक्षमाणाः वहिरासत स्थिता इत्यैश्वर्यातिशयोक्तिः । अत्र रत्ने उपदात्वस्यारोप्यमाणस्य प्रकृतोपयोगात्परिणामालङ्कारः ॥ ३८ ॥

एक इति । एकएव नृपो यद्वसु धनं ददौ उपायनमिति भावः । तद्धनमेव क्रतोः समापकं सम्पूरकं अतर्क्यत दक्षिणादानादिसर्व्वक्रतुव्ययपर्य्याप्ततया तर्कितमित्यर्थः । तपःसुते धर्म्मपुत्रे त्यागशालिनि सति सर्व्वपार्थिवधनान्यपि क्षयं व्ययं ययुः । अत्रैकपार्थिवधनस्य क्रतुसमापकत्वासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः । तयोश्च सापेक्षत्वात्सजातीयसङ्करः ॥ ४० ॥

प्रीतिरिति । ददतो दानं कुर्वतोऽस्य राज्ञस्तथा तेनैव प्रकारेण राजोपायनानां अर्थिसात्करणेनैव प्रीतिरभवदासीत् न तु कोशगृहार्पणेनेत्यर्थः । कुतः येन प्रकारेण तस्य राज्ञः प्रियं चिकीर्षवः

यं लघुन्यपि लघूकृताहितः
शिष्यभूतमशिषत्स कर्म्मणि ।
सस्पृहन्नृपतिभिर्न्नृपोऽपरै
र्गौरवेण ददृशेतरामसौ ॥ ४२ ॥

प्रियं कर्त्तुमिच्छवः । मधुपिपासुप्रभृतित्वात् द्वितीयासमासः । न्टपाः स्पर्शितैः प्रतिपादितैः । स्पर्शनं प्रतिपादनमित्यमरः । उपायनैरुपहारैरधिकं यथा तथा मुदमागमन्प्रापुः । तथैव प्रभुप्रीतिसिद्धेस्तोपायनानां सिद्धिर्नियोगलाभाश्चेति भावः । अधि वेश्म वेश्मनि निहितैरुपायनैर्मुदं नागमन् तयोक्तप्रयोजनासिद्धे रिति भावः । येनैव राज्ञां मोदः स्वस्य च महान् धर्म्मलाभः तेनोपायनानामर्थिसात्करणादेव राज्ञः प्रीतिरासीत् न कोश गृहार्पणादित्यर्थः । अतएव दानसङ्ग्रहयोः प्रकृतयोः प्रीतेः सङ्ग्रहपरिहारेण दानएव नियमनात्परिसङ्ख्यालङ्कारः । एकस्या नेकत्र प्राप्तावेकत्र नियमनं परिसङ्ख्येति लक्षणात् । एतेन सर्व्वस्व दानं व्यज्यते इत्यलङ्कारेण वस्तुध्वनिः ॥ ४१ ॥

यमिति । लघूकृता अल्पीकृता अहिता: शत्रवो येन सः । स राजा शिष्येण तुल्यं शिष्यभूतं । भूतं क्ष्मादौ पिशाचादौ न्याय सत्योपमानयोरिति विश्वः । सुप्सुपेति नित्यसमासः । यमपं लघुन्यप्यल्पेऽपि यज्ञीयपशुरक्षणादिकर्म्मणि अशिषत् आज्ञापित वान् । सर्त्तिशास्त्यर्त्तिभ्यश्चेति लुङि च्लेरङादेशः शासइदङ्हलो रितीकारः । असौ कर्म्मकरो नृपः अपरैस्ततोऽन्यैर्नृपतिभिः सस्पृहं अहो सभ्यागमदति साभिलाषं गौरवेण ददृशेतरां अतिशयेन दृष्टः ।

आद्यकोलतुलितामकम्पनैः
कम्पितामुरुरनीदृगात्मनि ।
वाचि रोपितवतामुना महीं
राजकाय विषयाविभेजिरे ॥ ४३ ॥

हृञः कर्मणि लिट् तिङश्चेति तरप्प्रत्यये किमेत्तिङव्ययघादाम्‌द्रव्यप्रकर्षे इत्यामुप्रत्ययः तद्धितश्चासर्वविभक्तिरित्यव्ययसंज्ञा । अत्र कर्मकरनृपत्वेतरनृपकर्तृकत्रिविष्टदर्शनकर्मत्वासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः तया राज्ञोमिरङ्कुशत्वं व्यज्यतइत्यलङ्कारेण वस्तुध्वनिः ॥ ४२ ॥

आद्येति । आद्यकोलः आदिवराहः । वराहः सूकरो घृष्टिः कोलः पोत्री किरिः किटिरित्यमरः । तेन तुलितां कल्पादौ उद्धृतां । तथापि प्रकम्पनैः प्रक्षोभकैर्हिरण्याक्षप्रमुखैः कम्पितां क्षोभितां महीं । अनीदृगात्मनि अनेवंरूपायां केनाप्यकम्पितायामस्खलितायां वाचि रोपितवता स्थापितवता स्थिरेण रोपणेन स्थिरी कुर्वतेत्यर्थः । अमुना राज्ञा राजकाय राज्ञां समूहाय । गोत्रोक्षेत्यादिना वुञ्प्रत्ययः । विषयाः देशाः । नीवृज्जनपदो देशविषयौ तूपवर्त्तनमित्यमरः । विभेजिरे अस्यायमिति विभक्ताः प्राक् विजयोद्धृताम् राज्ञः पुनः पदेषु स्थापयामासेत्यर्थः । अत्रादिवराहो महीमुद्धृतवानेव वाचैवासौ तु निरातङ्कं स्थापितवांश्चेति उपमानादुपमेयस्याधिक्यकथनाद्व्यतिरेकालङ्कारः ॥ ४३ ॥

आगतादिति । बलसम्पदा गुणाधिक्येन अविकारिमानसो लोभाभिभवाभ्यां अनुपप्लुतचित्तइत्यर्थः । बलं गुणे पिशाचादौ बले

आगतांद्व्यवसितेन चेतसा
सत्त्वसम्पदविकारिमानसः ।
तत्र नाभवदसौ महाहवे
शात्रवादिव पराङ्मुखोऽर्थिनः ॥ ४४ ॥

द्रव्यस्वभावयोरिति विश्वः । असौ राजा तत्र तस्मिन् आ समन्तात् जुह्वति अस्मिन्नित्याहवो यागः । ह्वेरबिति जुहोतेरप्प्रत्यये गुणावादेशौ । आह्वयन्ते शत्रवोऽस्मिन्नित्याहवो युद्धं । आङि युद्धे इति ह्वयतेराङ्पूर्वादप्प्रत्ययः सम्प्रसारणम् । आहवः यागयुद्धयोरिति विश्वः । महांश्चासौ स च महाहवस्तस्मिन्महाहवे व्यवसितेन निश्चितेन धनलाभं निश्चितवता । अन्यत्र शत्रोर्मृत्युरेवेति निश्चितवतेत्यर्थः । व्यवपूर्वात् स्यतेः सकर्मकत्वादप्यविवक्षिते कर्मकर्त्तरि क्तः प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रियेति वचनात् । चेतसा आगतात् चेतसा स्वयं निश्चित्यागतादित्यर्थः । अर्थिनो याचकात् । शत्रुरेव शात्रवः । स्वार्थेऽण् प्रत्ययो राक्षसवत् । तस्मादिव पराङ्मुखो नाभवत् । आहवेष्वनिवर्त्तित्वं प्रजानां चैव पालनं शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परमिति मनुस्मरणात् इति भावः । उपमालङ्कारोऽयमुपमा ॥ ४४ ॥

नैक्षतेति । स राजा अर्थिनं याचकं मुहुरवज्ञया अनादरेण नैक्षत । तर्हि विलम्बितं किं नेत्याह । याचितस्तु प्रार्थितएव कालं नाक्षिपत् न यापयामास याचकवत्सलात्तत्क्षणप्रदाता नेत्याह । अल्पमपि नादित न ददौ किं तु यथार्थिकाममिति भावः । ददातेर्लुङि तङि स्थाघ्वोरिच्चेतीकारः ह्रस्वादङ्गादिति

नैच्छतार्थिनमवज्ञया मुहु
र्याचितस्तु न च कालमाक्षिपत्।
नादिताल्पमथ न व्यकत्थय
द्दत्तमिष्टमपि नान्वशेत सः॥ ४५ ॥

निर्गुणोऽपि विमुखो न भूपते
र्दानशौण्डमनसः पुरोऽभवत्।
वर्षुकस्य किमपः कृतोन्नते
रम्बुदस्य परिहार्य्यमूषरम्॥ ४६ ॥

क्षेपः । तर्हि विकत्थनः किन्नेत्याह । न व्यकत्थयत् आत्मश्लाघां न चकार । कत्थ श्लाघायां । किंच दृष्टं प्रियमपि दत्तं वस्तु नान्वशेत नानुतप्तवान् । दत्तानुतापस्यातिप्रत्यवाय हेतुत्वादिति भावः । अत्रार्थिसन्दोहयाञ्चादिवाक्यरूपकारण सामग्र्येऽपि विलम्बादिकार्य्यानुत्पत्तेर्विशेषोक्तिरलङ्कारः । तत्सामग्र्या दनुत्पत्तिर्विशेषोक्तिर्निगद्यते इति लक्षणात् । तथा दातुः सात्त्विकं व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ॥ ४५ ॥

निर्गुण इति । दानशौण्डमनसो दानशूरचित्तस्य वक्रप्रदस्ये त्यर्थः । स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे मत्ते शौण्डोत्कटक्षीवा इत्यमरः । भूपतेः पुरोऽग्रे निर्गुणस्तपोविद्यादिगुणहीनोऽपि विमुखो निष्फलो नाभवत् किन्तु पूर्णकाम एवाभवत् भूरिदाने सर्व स्यापि पात्रत्वादिति भावः । अतएव तेनापात्रवर्षदोषोऽपि न कृत इत्याशयेन दृष्टान्तमाह । वर्षुकस्येति । अपो जलानि । न लोके त्यादिना षष्ठीप्रतिषेधः । वर्षुकस्य वर्षणशीलस्य । लषपतेत्यादिना

प्रेम तस्य न गुणेषु नाधिकं
न स्म वेद न गुणान्तरञ्च सः।
दित्सया तदपि पार्थिवोऽर्थिनं
गुण्यगुण्य इति न व्यजीगणत् ॥ ४७ ॥

एकञ्प्रत्यये लघुपधगुणः। क्षतोन्नतः क्षतोदयस्तस्माद्बुदस्य अम्बुदेनेत्यर्थः। कृत्यानां कर्तरि वेति षष्ठी। स्यादूषः क्षारमृत्तिके त्यमरः। तद्वत्क्षेत्रमूषरं। ऊषवानूषरो द्वावप्यन्यलिङ्गे स्थलं स्थलीत्यमरः। ऊषशुषिमुष्कमधुभ्यो र इति रप्रत्ययः। परिहार्यं त्याज्यं किं नेत्यर्थः। अत्र पर्जन्यभूपालयोर्वाक्यभेदेन विम्बप्रतिविम्बतया समानधर्माभिधानात् दृष्टान्तालङ्कारः ॥ ४६ ॥

प्रेमेति। तस्य राज्ञो गुणेषु अधिकं प्रेम नेति न किन्त्वस्त्येवेत्यर्थः। राजा गुणान्तरं गुणविशेषं न वेद न वेत्ति स्मेति न च किन्तु वेदैवेत्यर्थः। लट् स्मे इति भूतार्थे लट्। विदो लटो वेति णलादेशः संभाव्यनिषेधनिवर्त्तने द्वौ प्रतिषेधौ इति वामनः। संभावितयोरविमर्शादेवागुणप्रीतिज्ञानयोर्निषेध इति भावः। तदपि तथापि। पृथिव्या ईश्वरः पार्थिवः। सर्वभूमिपृथिवीभ्यामणञावित्यञ् प्रत्ययः। दित्सया दातुमिच्छया सत्पात्रदानकौतुकेनेत्यर्थः। सनि मीमेत्यादिना इसादेशः अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः। अर्थिनं याचकं गुणी गुणवान् अगुण्यो नायं गुणवानिति न व्यजीगणत् न गणयति स्म। गुणप्रियोऽपि गुणज्ञोऽपि दानशौण्डोऽर्थितया गुणान गणयामासेत्यर्थः। गणेर्णौ चङि ई च गण इत्यभ्यासस्य विकल्पादीकारः। अत्र गुणप्रियत्वगणनात्व

दर्शनानुपदमेव कामतः
स्वं वनीयकजनेऽधिगच्छति।
प्रार्थनार्थरहितन्तदाभव
द्दीयतामिति वचोऽतिसर्जने ॥ ४८ ॥

रूपकारणसामर्थ्येऽपि गुणागुणविमर्शरूपकार्यानुत्पत्तेः दित्सयेत्युक्त निमित्ता विशेषोक्तिरलङ्कारलक्षणात् ॥ ४७ ॥

दर्शनेति। वनीयकजने अर्थिजने। दर्शनानुपदं राजविलोकनानन्तरमेव प्रार्थनामकृत्वेत्यर्थः। वनीयको याचनको मार्गणो याचकार्थिनौ इत्यमरः। कामतो यथेच्छं स्वं धनमधिगच्छति लभमाने सति। तदा दीयतामिति वचो दीयतामित्येतत्पदं प्रार्थना याञ्चा मह्यं दीयतामिति वाञ्छा सैवार्थस्तेन रहितं शून्यं सत् तदा अतिसर्जने त्यागेऽभवत् अवर्त्तत मह्यं दीयतामिति अर्थिवाक्याभावादस्मै दीयतामिति दातृवाक्यमेवान्वर्थमभूदित्यर्थः। अर्थिनामागमनमेव याचनमिति विवेकिनां किं याञ्चादैन्यदर्शनचापलेनेति भावः। अत्र दीयतामिति वचः संप्रार्थनार्थवर्जनेन तेनातिसर्जनार्थताकथनादेकस्यानेकत्वप्रसक्तावेकत्र नियमनाख्या परिसङ्ख्या ॥ ४८ ॥

मागेति। अर्थकाम्यता अर्थमात्मन इच्छता धनार्थिना। काम्यचेति काम्यच्प्रत्यये सनादिधातुत्वात् शटि शत्रादेशः। तस्यदः उपेयुषा प्राप्तवता पुरुषेण अनवाप्तवसुना अलब्धधनेन न प्रत्यगामि न प्रत्यावर्त्ति। रोगिणा उपेयुषा अचिकित्सितगदेन अशमितरोगेण। रोगव्याधिगदामया इत्यमरः। न प्रत्यगामि। अशितुं

नानवाप्तवसुनार्थकाम्यता
नाचिकित्सितगदेन रोगिणा ।
इच्छतार्शितुमनाशुषा न च
प्रत्यगामि तदुपेयुषा सदः ॥ ४९ ॥

स्वादयन्नसमनेकसंस्कृत
प्राकृतैरकृतपात्रसङ्करैः ।
भावशुद्धिसहितैर्मुदं जनो
नाटकैरिव बभार भोजनैः ॥ ५० ॥

भोक्तुं इच्छता उपेयुषा अनाशुषा च अनश्नितेनाभुक्तवतेत्यर्थः। उपेयिवाननाश्वाननूचानश्चेति क्वसुप्रत्ययान्तो निपातितः । न प्रत्यगामि किन्तु सर्व्वेणापि पूर्णकामेनैव प्रत्यगामीत्यर्थः। गमेर्भावे लुङ् । अत्रार्थिरोगिक्षुधितानां प्रकृतानामेव पूर्णकामत्वसाम्याद्धर्म्यौपम्यत्वात्केवलप्रकृतविषया तुल्ययोगिता तथा च यो यत्काम आगतः स तत्सर्वमेवास्मादलभतेति व्यज्यते ॥ ४९ ॥

स्वादयन्निति । अनेकानि बहूनि संस्कृतानि हिङ्गुमरीचादिना कृतसंस्काराणि प्राकृतानि प्रकृतिसिद्धानि संस्कारं विना स्वादूनि कृतानि फलादीनि च येषु तैः। अन्यत्रानेकविचित्रसंस्कृतप्राकृतौ भाषाविशेषौ येषु तैः अकृतः पात्राणां भाजनानां अन्यत्र भूमिकानां च सङ्करो व्यतिकरो येषु तैः। भावशुद्धिः पदार्थानां स्वच्छता अथ वा भावशुद्धिः गर्हाविरहः तत्सहितैः । अन्यत्र भावाः स्थायिनो रत्यादयः तेषां शुद्धिः सजातीयविजातीयातिरस्कृतरूपकम। सजातीयैर्विजातीयैरतिरस्कृतमूर्त्तिमान् यावद्धं वर्त्तमानः

रक्षितारमिति तत्र कर्म्मणि
न्यस्य दुष्टदमनक्षमं हरिम् ।
अक्षतानि निरवर्त्तयत्तदा
दानहोमयजनानि भूपतिः ॥ ५१ ॥

अनुभवन् जनोभोक्तृजनः समाजिकजनस्य मुदमानन्दं बभार । श्लेष सङ्कीर्णेयमुपमा ॥ ५० ॥

रक्षितारमिति । इतीत्थं भूपतिर्युधिष्ठिरः । तत्र कर्म्मणि राजसूयाध्वरे दुष्टानां दमने मर्द्दने क्षमं समर्थं हरिं रक्षितारं विघ्नेभ्यस्त्रातारं न्यस्य निधाय अक्षतानि अविहतानि दानहोम यजनानि निरवर्त्तयदसाधयत्स्वकीयस्य द्रव्यस्य स्वस्वत्वनिवृत्तिपर स्वत्वोत्पादनं दानं देवतोद्देशेनाग्नौ हविषः प्रक्षेपोहोमः उक्तस्य देवतोद्देशेन वाङ्मनसाभ्यां न ममेति त्यागोयागः । अत्र दुष्टदमन क्षमत्वस्य विशेषणगत्या हरेरत्राधिकारहेतुन्यासहेतुत्वात्पदार्थ हेतुकं काव्यलिङ्गम् ॥ ५१ ॥

एकइति । सुन्वतां सोमाभिषवं कुर्वतां सोमयाजिनामि त्यर्थः । सुनोतेर्लटः शत्रादेशः । सम्रक्षा सम्रहायः । न पूजनादिति समासान्तप्रतिषेधः । एष शौरिरेकएवेत्यभिनयादिव नम्र आकचेष्टां कलेवेत्युत्प्रेक्षा । व्यञ्जकाभिनयौ समावित्यमरः । भूरेव यजनभूमिः । चषालेन यूपकटकेन । चषालोयूपकटकइत्यमरः । तेन लक्षितं समोकृतमित्यर्थः । तुलयतेस्तत्करोतेर्ण्यन्तात्कर्मणि क्तः । तदङ्गुलीयकमूर्मिका यस्य तं अङ्गुलीयकोपमानचषालमित्यर्थः । अङ्गुलीयकमूर्मिकेत्यमरः । जिह्वामूलाङ्गुले छइति भावे छप्रत्ययः ।

एक एव सुसखैष सुन्वतां
शारिरित्यभिनयादिवोच्चकैः ।
यूपरूपकमनीनमद्भुजं
भूश्रवालतुलिताङ्गुलीयकम् ॥ ५२ ॥

इत्थमत्र विततक्रमे क्रतौ
वीक्ष्य धर्म्ममथ धर्म्मजन्मना ।
अर्घदानमनु चोदितो वचः
सभ्यमभ्यधित शन्तनोः सुतः ॥ ५३ ॥

उच्चकैरुन्नतं यूपं पशुबन्धनदारुविशेषो रूपकं स्वरूपं यस्य तं भुजं अनीनमत् उन्नमितवती । नमेर्णौ चङि सन्वत्कार्य्यम् । अत्र सापेक्षत्वादुपमोत्प्रेक्षयोः सङ्करः ॥ ५२ ॥

इत्थमिति । इत्थमत्र क्रतौ विततक्रमे विस्तृतानुष्ठाने सति अथानन्तरं धर्म्मो जन्म यस्य तेन धर्म्मजन्मना धर्म्मात्मजेन । जन्माद्युत्तरपदो बहुव्रीहिर्व्यधिकरण इति वामनः । धर्म्मं वीक्ष्य धर्म्मशास्त्रमनुसृत्येत्यर्थः अर्घदानं पूजादानमनु तदस्य पूजामुद्दिश्येत्यर्थः मूल्ये पूजाविधावर्घ इत्यमरः । चोदितः कस्मै देयमिदमिति पृष्टः शन्तनोः सुतो भीष्मः । सभ्यं सभायां साधु । सभायां यत् इति यप्रत्ययः । वचो वाक्यमभ्यधित अभिहितवान् । दधातेर्लुङि तङि स्थाघ्वोरिच्चेति कित्त्वे ह्रस्वादङ्गादिति सकारलोपः । वृत्तमनुप्रासः ॥ ५३ ॥

अथासर्गसमाप्तेः भीष्मवचःप्रपञ्चमेव सफलं दर्शयति । आत्मनेति । नयात्मनो बहुमानकरणात् प्रीतस्त्वं भवान् भीष्माराधानं तावत् उक्ता

आत्मनैव गुणदोषकोविदः
किञ्च वेत्सि करणीयवस्तुषु ।
यत्तथापि न गुरून्न पृच्छसि
त्वत्क्रमोऽयमिति तत्र कारणम् ॥ ५४ ॥
स्नातकं गुरुमभीष्टमृत्विजं
संयुजा च सह मेदिनीपतिम् ।
अर्घभाजइति कीर्त्तयन्ति षट्
ते च ते युगपदागताः सदः ॥ ५५ ॥

हार्थमेकेनोपश्लोकयति । वेत्तीति विदो ज्ञाता । इगुपधलक्षणः कप्रत्ययः । कषोविद्यास्थानस्य विदः । कोविदः गुणदोषयोः कोविदो विवेक्ता । करणीयवस्तुषु कर्तव्यार्थेषु आत्मनैव स्वयमेव परोपदेशानपेक्षयैवेत्यर्थः । प्रकृत्यादित्वात् तृतीया । किञ्च वेत्सि सर्व्वं जानासीत्यर्थः तथापि त्वं ज्ञातापि गुरून् पृच्छसीति न किन्तु पृच्छस्येवेति यत् । ज्ञानप्रयुक्तं न पृच्छसीति वारणाय नञ्द्वयं । तत्र गुर्वनुयोगे ऽयं क्रम इति न्यायः सदाचारपरिपाटीत्येतदेव कारणं न त्वज्ञानमित्यर्थः । अत्र कर्तव्यार्थप्रश्नस्याज्ञानहेतुकत्ववारणेनापरहेतुकत्वे नियमनात्पूर्व्वोक्तलक्षणपरिसंख्यानम् ॥५४॥

एवं राजानं उपश्लोक्य प्रश्नस्योत्तरमाह स्नातकमिति । स्नातकोऽत्र स्वविशेषणं गुरुं पित्रादिकं अभीष्टमिष्टबन्धुमृत्विजं याजकं संयुज्यत इति संयुक् सम्बन्धी जामाता तेन सह मेदिनीपतिं राजानं च तं च मेदिनीपतिं चेत्यर्थः । षट् षडेतान् अर्घभाजः

शोभयन्ति परितः प्रतापिनो
मन्त्रशक्तिविनिवारितापदः ।
त्वन्मखम्मुखभुवः स्वयम्भुवो
भूभुजश्च परलोकजिष्णवः ॥ ५६ ॥

पूजार्हा इति । इतिशब्देनाभिहितत्वान्न कर्मणि द्वितीया । यथाह वामनः निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः परिगणनस्य प्रायिकत्वादिति । कीर्त्तयन्ति कथयन्ति इत्यूहा इति शेषः । न च ते दूरादित्याह । ते च यद्यपि ते तव सदः सभां युगपदागताः प्राप्ताः । अत्र स्नातकादीनां प्रकृतानामेवार्घभाक्त्वसाधर्म्यादौपम्याव गमात् तुल्ययोगिताभेदः ॥ ५५ ॥

शोभयन्तीति । किञ्च प्रतापयितुं शीलं येषां ते प्रतापिनः प्रभुतापकाः । ताच्छील्ये णिनिः । अन्यत्र तेजस्विनः । स प्रतापः प्रभावश्च यत्तेजः कोषदण्डजमित्यमरः । अतइनिठनाविति इन् प्रत्ययः । मन्त्रशक्त्या वेदमहिम्ना अन्यत्र विचारसामर्थ्येन विनिवारिताः आपदो दैवमानुषविपत्तयो यैस्ते । वेदवादे गुप्तवादे मन्त्र इत्यमरः । परलोकस्य लोकान्तरस्य शत्रुजनस्य च जिष्णवो जयशीलाः । स्वयंभुवो ब्रह्मणो मुखभुवो मुखजाताः ब्राह्मणाः । ब्राह्मणोऽस्य मुखमासीदिति श्रुतेः । भूभुजो राजानश्च । त्वन्मखं तव क्रतुं परितः शोभयन्ति परिष्कुर्वन्ति सर्वेऽप्यागत्य वसन्तीत्यर्थः । अत्र राज्ञां ब्राह्मणानां च प्रकृतानामेव प्रतापादिसाधर्म्येणौपम्यात्तुल्ययोगिताभेदः साधर्म्यं च श्लेषनिबन्धनमिति सङ्करः ॥ ५६ ॥

आभजन्ति गुणिनः पृथक्पृथक्
पार्थ सत्कृतिमकल्मषाममी ।
एक एव गुणवत्तमोऽथ वा
पूज्य इत्ययमपीष्यते विधिः ॥ ५७ ॥

आभजन्तीति । हे पार्थ पृथापुत्र । तस्येदमित्यण् सामान्यस्य विशेषपर्यवसाननियमादपत्यार्थलाभः अन्यथा स्त्रीभ्यो ढगिति ढक् स्यात् । गुणिनो गुणाढ्या अमी पूर्वश्लोकद्वयोक्ताः स्नातकादयः पृथक् पृथक् प्रत्येकमकल्मषामकपटां सत्कृतिं सत्कारं आभजन्ति अर्हन्ति । सममेषां प्रत्येकं पूजा कार्य्येत्यर्थः । अथ स्वाभिमतं पक्षान्तरमाह अथवेति । अथ वा गुणवत्तमोऽतिगुणवानेक एव पूज्य इत्ययमपि विधिः शास्त्रमनुष्ठानं वेष्यते वृद्धैरिति शेषः । अत्र स्नातकादीनां पूज्यत्वे गुणो विशेषणगत्या हेतुरिति काव्यलिङ्गभेदः । तदपेक्षया गुणवत्तमत्वमेकस्यैव पूज्यत्वे तथैव हेतुरिति काव्यलिङ्गान्तरमिति सजातीयसङ्करः ॥ ५७ ॥

अत्र कस्तथा सर्वोत्तरः पुमानस्तीत्याकाङ्क्षायां कोऽन्यो हरिं विनेत्याह । अत्रेति । अत्रास्मिन् कालेऽपि भूमिदेवा ब्राह्मणाः नरदेवा राजानस्तेषां सङ्गमे ब्राह्मणक्षत्रियसमवाये इत्यर्थः । अत्रैव गुणानां बन्धुः सुहृत्सर्वगुणाढ्य इत्यर्थः । असाधारणगुणाकार । पूर्वेति पूर्वदेवाः सुरद्विषस्तेषां रिपुर्हन्ता एषः हरिः कृष्णः अर्हणां पूजां अर्हति प्राप्नोतीति मामधिकृत्य भाति मम प्रतिभातीत्यर्थः अन्ये तु नार्हन्तीत्यपि सिद्धमिति भावः । अत्र तदन्येषु च प्रसक्तायां पूजायां हरावेव नियमात्परिसङ्ख्यालङ्कारः । एकस्य

अत्र चैष सकलेऽपि भाति मा
स्त्यग्र्यपूगुणबन्धुरर्हति ।
भूमिदेवनरदेवसङ्गमे
पूर्व्वदेवरिपुरर्चणां हरिः ॥ ५८ ॥
मर्त्यमात्रमवदीधरद्भवा
मैनमानमितदैत्यदानवम् ।
अंश एष जनतातिवर्त्तिनो
वेधसः प्रतिजनङ्कृतस्थितेः ॥ ४९ ॥

वस्तुनः प्राप्तावनेकधैकधा यदा । एकत्र नियमः सा हि परिसङ्ख्या निगद्यत इति लक्षणात् ॥ ५८ ॥

ननु तस्मिन्नाम्नाब्राह्मणवर्णाचयसमूहे कथमस्यैव पूज्यत्वमित्याशङ्क्य सर्वात्मकत्वादित्याशयेनाऽमर्य्यादमाप्तेरेनं स्तौति । मर्त्येत्यादि । आनमिताः प्रह्वीकृताः दैत्याः दितिसुताः दानवाः दनुसुताश्च येन तमेनं हरिं भवान् मर्त्यमात्रं मनुष्यमात्रं माऽवदीधरत् न जानीयात् । शेषे प्रथम इति प्रथमपुरुषः । कुतः एषः जनतातिवर्त्तिनः सर्व्वलोकातीतस्य प्रतिजनं कृतस्थितेश्च सर्व्वभूतान्तर्यामिण इत्यर्थः वेधसः परमात्मनोऽंशः कला अतो न मर्त्यमात्रमित्यर्थः । अत एव वाक्यहेतुकत्वाच्छ्लिङ्गम् ॥ ५९ ॥

पुनरप्यमानुषत्वमेव व्यनक्ति । ध्येयमिति । योगिनामरदा इयः । एकमद्वितीयं उत्तमं सर्व्वोत्तमं यमेनं ध्येयं ध्यातव्यं । एकाग्र्ययोगात्मधारणं ध्यानत्वादर्हमित्यर्थः । तथापि धियोद्यान

ध्येयमेकमपथे स्थितन्धियः
स्तुत्यमुत्तममतीतवाक्पथम्।
आमनन्ति यमुपास्यमादरा
द्दूरवर्त्तिनमतीव योगिनः ॥ ६० ॥

पद्मभूरिति सृजन् जगद्रजः
सत्त्वमच्युतइति स्थितिन्नयन्।
संहरन् हरइति श्रितस्तम
स्त्रैधमेष भजति त्रिभिर्गुणैः ॥ ६१ ॥

स्यापथेऽमार्गे स्थितं तदगोचरमित्यर्थः। पथाविभाषेति समासान्तः अपथं नपुंसकमिति नपुंसकम्। आमनन्ति कथयन्ति। पाघ्रेत्यादिना म्नाधातोर्मनादेशः। स्तुत्यं स्तोतुमर्हं। तथापि अतीतो वाक्पथो येन तं अवाङ्मनसगोचरमित्यर्थः। यतोवाचोनिवर्त्तन्ते अप्राप्य मनसा सहेतिश्रुतेः। आमनन्ति आदरादास्थया उपास्यं सेव्यं। तथापि अतीवात्यन्तं। अतीवेति निपातसमुदायोऽत्यन्तार्थेऽव्ययम्। दूरवर्त्तिनं आमनन्ति यमेनमचिन्त्यरूपमामनन्ति तमेनं मर्त्त्यमात्रं मावधारयेदिति पूर्व्वेणान्वयः अवाङ्मनसगोचरत्वदूरवर्त्तित्वानां ध्येयत्वस्तुत्यत्वोपास्यत्वैः सह विरोधस्य हरेरचिन्त्यमहिमत्वेन समाधानाद्विरोधाभासोऽलङ्कारः ॥ ६० ॥

ननु हरिहरहिरण्यगर्भादयस्त्रयोदेवा. सर्व्वोत्तरमहिमानः सन्त्येनं न जानीमः इत्यतआह। पद्मभूरिति। एष हरिः रजः रजोगुणं श्रितः जगत् सृजन् पद्मभूर्ब्रह्मेति। सत्त्वं सत्त्वगुणं श्रितः

सर्व्ववेदिनमनादिमास्थित
न्देहिनामनुजिघृक्षया वपुः ।
क्लेशकर्म्मफलभोगवर्जित
म्पुंविशेषममुमीश्वरं विदुः ॥ ६२ ॥

जगत् स्थितिम्नयन् स्थापयन् अच्युतोविष्णुरिति । तमस्तमोगुणं श्रितः जगत् संहरन् हरइति त्रिभिर्गुणैः सत्त्वरजस्तमोभिस्त्रेध त्रैविध्यं भजति । द्वित्र्योश्चधमुञिति विधार्थे धमुञ्प्रत्ययः । अस्यैव गुणभिन्नास्तास्तिस्रोऽपि मूर्त्तयः इत्ययमेव सर्व्वोपास्यइति भावः । अत्र सत्त्वादिगुणयोगस्य सृष्ट्यादिगुणयोगस्य च विशेषणगत्या त्रैविध्यहेतुत्वात् पदार्थहेतुकं काव्यलिङ्गम् ॥ ६१ ॥

तर्हि कीदृशमस्य स्वरूपं कुतोवा मानुषविग्रहइत्यपेक्षायामुभयं निरूपयन्नाह । सर्व्वेति । अमुं कृष्णं सर्व्ववेदिनं सर्व्वज्ञ मित्यर्थः । अतएवानादिमादिरहितं अनादिनिधनमित्यर्थः । तथापि देहिनां प्राणिनां अनुजिघृक्षया अनुग्रहीतुमिच्छया भूभाराव तरणार्थमित्यर्थः । ग्रहेः सन्नन्तात् स्त्रियामप्रत्ययादप्रत्यये टाप् । वपुराश्रितं मानुषविग्रहमाश्रितं न कर्म्मारब्धशरीरभाज मित्यर्थः । अतएव क्लेशकर्म्मफलभोगवर्जितं । क्लेशाः पञ्च क्लेशाः अविद्यास्मितारागद्वेषाभिनिवेशाख्याः । कर्म्माणि पुण्यपापानि तेषां फले सुखदुःखे तयोर्भोगोऽनुभवस्तेन क्लेशैश्च वर्जितं तैरसंस्पृष्ट मित्यर्थः । ईश्वरं ईश्वरशब्दितं पुंविशेषं चेतनविलक्षणं पुरुष विशेषं परमपुरुषं वा विदुर्वदन्ति सन्तइति शेषः । विदोलटोवेति झेर्जुसादेशः । अत्राकर्म्मारब्धत्वाश्रयत्वानत्वादिविरोधसमर्थना

भक्तिमन्त इह भक्तवत्सले
सन्ततस्मरणरीणकल्मषाः ।
यान्ति निर्वहणमस्य संसृति
क्लेशनाटकविडम्बनाविधेः ॥ ६३ ॥

ग्राम्यभावमपहातुमिच्छवो
योगमार्गपतितेन चेतसा ।
दुर्गमेकमपुनर्निवृत्तये
यं विशन्ति वशिनं मुमुक्षवः ॥ ६४ ॥

॥ युग्मम् ॥

विरोधाभासोऽलङ्कारः । तेषामेव गुणानां त्रिविधगत्या पुं विशेषहेतुत्वात्काव्यलिङ्गमिति सङ्करः ॥ ६२ ॥

एवं हरेः स्वरूपं निरूप्य तदुपासनात्फलं युग्मेनाह । भक्ति मन्त इति । भक्तवत्सले भक्तप्रिये इहास्मिन् हरौ । भक्तिमन्तोऽनु रागवन्तो जनाः । पूज्येषु अनुरागो भक्तिः । सन्ततं सततं तत् स्मर णेन निरन्तरध्यानेन रीणकल्मषाः क्षीणपापाः सन्तः । री क्षये ल्वादिभ्य इति निष्ठानत्वम् । अस्य अनुभूयमानस्य क्षणास्य संसृतिः संसारस्तस्य क्लेशः दुःखं तदेव नाटकमिति रूपकम । तस्य विड म्बनाभिनयस्तस्य निर्वहणं समाप्तिं यान्ति मुच्यन्ते इत्यर्थः । तमेवं विद्वानमृत इह भवतीति श्रुतेरिति भावः ॥ ६३ ॥

ग्राम्येति । ग्रामे भवाः ग्राम्याः प्राकृता मूढा इति यावत् । ग्रामाद्यञ् खञाविति यञ्प्रत्ययः । तेषां भावस्तं अपहातुं मोक्तुमिच्छवः मुमुक्षवो मोक्षार्थिनः अपुनर्निवृत्तयेऽपुनरावृत्तये पुनरावृत्त्य

आदितामजननाय देहिना
मन्तताञ्च दधतेऽनपायिने ।
बिभ्रते भुवमधः सदाथ च
ब्रह्मणोऽप्युपरि तिष्ठते नमः ॥ ६५ ॥

भावाय मोक्षाय इत्यर्थः । दुःखेन गम्यते इति दुर्गं दुष्प्रापं एकमेवाद्वितीयं वशिनं स्वतन्त्रं यं हरिं योगमार्गपतितेन ध्यानमार्गनिविष्टेन । योगः सन्नहनोपायध्यानसङ्गतियुक्तिष्वित्यमरः । चेतसा बिभ्रन्ति ध्यायन्तीत्यर्थः यं बिभ्रन्ति इह भक्तिमन्तः इति पूर्वेणान्वयः ॥ ६४ ॥

अथ भक्त्युद्रेकान्नमस्करोति । आदितामिति । देहिनां प्राणिनां आदितां कारणतां अन्तोऽन्तकरो नाशहेतुः । तत्करोतीति ण्यन्तादन्तयतेः पचाद्यच् । तस्य भावस्तत्तामन्ततां च दधते । यतो वा इमानि भूतानि जायन्त इत्यादि श्रुतेः । स्वयम जननाय जन्मरहिताय । अपायोऽस्यास्तीत्यपायी स न भवतीत्यनपायी तस्मै अनपायिने नाशरहिताय च कालतोऽपरिच्छिन्नायेत्यर्थः । देशतोपि तथेत्याह सदाऽधः पाताले भुवं बिभ्रते कूर्मरूपेण दधते । अथ च तथैव ब्रह्मणो लोकस्याप्युपरि तिष्ठते सर्वव्यापिने इत्यर्थः तस्मै हरये इति शेषः । नमः नमस्कारः । नमःस्वस्तीत्यादिना चतुर्थी । अत्र हरेरनादिनिधनत्वेन तद्वतः पुरुषान्तरादाधिक्यवर्णनाद्व्यतिरेकालङ्कारः ॥ ६५ ॥

केवलमिति । सृजतिश्च संज्ञा च शास्तिश्च सृजतिसंज्ञशास्तयः । सृज विसर्गे हञ् हरणे सम्पूर्वोऽयं शास अनुशिष्टौ इत्येते यत्र इत्यर्थः इक्श्तिपौ धातुनिर्देशे इति वचनादेवं निर्देशः ।

केवलन्दधति कर्तृवाचिनः
प्रत्ययानिह न जातु कर्मणि ।
धातवः सृजतिसंहृशास्तयः
स्तौतिरत्र विपरीतकारकः ॥ ६६ ॥

धातवोभुवादयोधातवइत्युक्तलक्षणाः शब्दविशेषाः । इहास्मिन् भगवति विषये केवलमनन्ययोगव्यवच्छिन्नं यथा तथा कर्तृवाचिनः कर्तृकारकवाचकान् दधति । तदन्ताएव भवन्तीत्यर्थः । जातु कदाचित्कर्मणि प्रत्ययान् कर्मार्थविहितान् यगादीन् न दधति न तदन्ताभवन्तीत्यर्थः । सर्वकर्तृत्वानियन्तृत्वाच्च सृजति स्रष्टा संहरति हर्त्ता शास्तीति शासितेत्यादिभिः कर्तृत्वेन निर्दिश्यते न कदाचित्सृज्यते संह्रियते शिष्यते इत्यादिभिः कर्मत्वेन अनादिनिधनत्वादनियम्यत्वाच्चेति भावः । किन्तु अत्र भगवति स्तौतिः । ष्टुञ् स्तुताविति धातुः । विपरीतं कारकं यस्य सः विपरीतकारकः स्तूयते स्तुत्यइत्यादिकर्मप्रत्ययान्तएव नतु कदाचित् स्तौति स्तोतादित्यादिकर्तृप्रत्ययान्तः । सकललोकस्तुत्यस्य तस्य स्तुत्यान्तराभावादित्यर्थः । अत्र शब्दानां कर्मकर्तृप्रत्ययविधिनिषेधद्वारा विभक्त्यन्तरेण सर्वकर्तृत्वसर्वोपास्यत्वादिस्वरूपार्थबोधपरत्वात्सौक्ष्म्याख्योगुणः । अन्तःसंकल्परूपत्वं शब्दानां सौक्ष्म्यमुच्यत इति लक्षणात् । अत्र भगवतः सृष्ट्यादिकर्तृकर्मत्वोभयप्राप्तावेकत्रैकनियमात्परिसंख्या । तत्र जातु कर्मणीति शब्दादेव कर्मत्वनिषेधादितरनिवृत्तिः शब्दात् स्तुतौ कर्तृत्वनिवृत्तिरार्थीति भेदद्वयसंसर्गः । अनया च भगवतः पुरुषान्तराधिक्यप्रतीतेर्व्यतिरेकश्च प्रतीयतइत्यलङ्कारेणालङ्कारध्वनिः ॥ ६६ ॥

पूर्व्वमेष किल सृष्टवानप
स्तासु वीर्य्यमनिवार्य्यमादधौ ।
तच्च कारणमभूद्धिरण्मयं
ब्रह्मणोऽसृजदसाविदञ्जगत् ॥ ६७ ॥

मत्कुणाविव पुरा परिप्लवौ
सिन्धुनाथशयने निषेदुषः ।
गच्छतः स्म मधुकैटभौ विभो
र्यस्य नैद्रसुखविघ्नतां क्षणम् ॥ ६८ ॥

पूर्व्वमिति । एष हरिः पूर्व्वं प्रथममपः सृष्टवान् । किलेत्यैतिह्ये तास्वप्सु अनिवार्य्यं वीर्य्यं रेतः । शुक्रं तेजोरेतसी च बीज वीर्य्येन्द्रियाणि चेत्यमरः । आदधावाहितवान् तद्वीर्य्यन्तु हिरण्यस्य स्वर्णस्य विकारः हिरण्मयं । दाण्डिनायनेत्यादिना निपातः । ब्रह्मणश्चतुर्मुखस्य कारणमभूत् । ब्राह्ममण्डं जातमित्यर्थः असौ तदुत्पन्नो ब्रह्मा ब्रह्माण्डमिदञ्जगदसृजत् सर्व्वस्यापि प्रपञ्चस्यायमेव मूलकारणमिति भावः । अत्र मनुः । अपएव ससर्ज्जादौ तासु बीज मवासृजत् । तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिन् जज्ञे स्वयं ब्रह्मा सर्व्वलोकपितामहइति । अत्र वीर्य्यमनिर्वार्य्यमिति वृत्त्यनुप्रासः ॥ ६७ ॥

अथैनं त्रिभिर्विशिनष्टि । मत्कुणाविवेत्यादिना । पुरा पूर्व्वं परि प्लवौ चञ्चलौ मुकुरितस्ततश्चलन्तावित्यर्थः । चञ्चलञ्चपलं तूर्णं पारिप्लवपरिप्लवे इत्यमरः । मधुकैटभावसुरविशेषौ मत्कुणौ सुप्तास्थकपायिनौ मक्तोत्कुणौ कीटविशेषौ ताविवेत्युपमा । सिंधुनाथः

श्रौतमार्गसुखगानकोविद
ब्रह्मषट्चरणगर्भमुज्ज्वलम् ।
श्रीमुखेन्दुसविधेऽपि शोभते
यस्य नाभिसरसीसरोरुहम् ॥ ६८ ॥

सरित्पतिः सएव शयनं तत्र निषेदुषोनिषण्णस्य समुद्रशायिन इत्यर्थः । भाषायां सदवसश्रुवइति लिटः क्वसुरादेशः । विभोः प्रभोः यस्य हरेः क्षणं निद्रायासम्बन्धिनः आगतं वा नैद्रं यत्सुखं तस्य विघ्नतां विधातुं कर्त्तुं गच्छतः स्म गतौ तादृशावपि महासुरौ मत्कुणाविव क्षणमात्रेण प्रनष्टाविति भगवतः प्रभावातिशयोक्तिः । एषां त्रयाणां पूर्व्वेणान्वयः ॥ ६८ ॥

श्रौतेति । श्रौतमार्गस्य सुखं सुखकरं यद्गानं तस्य कोविदो ऽभिज्ञः । कोविदोव्याख्यातः । स चासौ ब्रह्मा च स एव षट्चरणः स गर्भे यस्य तत् उज्ज्वलं निर्मलं । यस्य हरेर्नाभिरेव सरसी सरः कासारः । कासारः सरसी सरइत्यमरः । तस्यां सरोरुहं पद्मं श्रियोमुखमिवेन्दुस्तस्य सन्निधौ समीपेऽपि शोभतइति विरोधः । स च मुखस्येन्दुत्वरूपणायत्तइत्यनयोरङ्गाङ्गिभावेन सङ्करः ॥ ६८ ॥

स्तव्येति । यं हरिं सत्यवृत्तं अकपटचरितं अपि मायिनं मायाविनं कपटवन्तमिति विरोधः । माया नाम शक्तिः तद्वन्तमित्यविरोधः । व्रीह्यादित्वादिनिप्रत्ययः । जगद्वृद्धं सर्व्वलोकपिता महत्वात् स्थविरमपि । प्रवयाः स्थविरोवृद्धइत्यमरः । उचितनिद्रत्परिचितयोगनिद्रं अर्भकं डिम्भं । वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामीत्यागमवचनादिति भावः । पोतः

सत्यवृत्तमपि मायिनञ्जग
द्वृद्धमप्युचितनिद्रमर्भकम् ।
जन्म बिभ्रतमजन्नवम्बुधा
यम्पुराणपुरुषम्प्रचक्षते ॥ ७० ॥

स्कन्धधूननविसारिकेशर
क्षिप्तसागरमहाप्लवामयम् ।
उद्धृतामिव मुहूर्त्तमैक्षत
स्थूलनासिकवपुर्वसुन्धराम् ॥ ७१ ॥

पाकोऽर्भकोडिम्भ इत्यमरः । न जायत इत्यजो जन्मरहितः । अन्येभ्योऽपि दृश्यन्ते इति जनेर्डप्रत्ययः । तमपि जन्म बिभ्रतं कामवशात् कृष्णादिजन्मभाजमित्यर्थः । नवं रमणीयत्वादभिनवं तथापि पुराणं प्राचीनमनादिं च पुरुषं प्रचक्षते बुधाः । इति वाक्यं सर्व्वत्र सम्बध्यते । सर्वेऽपि विरोधा हरेरचिन्त्यमहिमत्वेनाभास्या इति विरोधाभासचतुष्टयमसृष्टिः ॥ ७० ॥

अथ षोडशभिरवतारान् वर्णयिष्यन् वराहावतारं तावदेकेनाह । स्कन्धेति । स्थूलनासिकवपुर्व्वराहमूर्त्तिरयं हरिः स्कन्धस्य कन्धरायाः धूननेन कम्पनेन विसारिभिरुत्सर्पिभिः केशरैः सटाभिः क्षिप्तोऽवकीर्णः सागरस्य महाप्लवो महापूरः यस्यास्तां जलापसारेण प्रकाशितामित्यर्थः । वसुन्धरां भुवं मुहूर्त्तं क्षणमात्रं । मुहूर्त्तमल्पकालेऽपीति शब्दार्णवे । उद्धृतां अनाद्युतलात्सागरादुत्क्षिप्तामिव ऐक्षत प्रेक्षितवान् इत्युत्प्रेक्षा । ईक्षतेर्लङ्याडजादीनामाटश्चेति वृद्धिः ॥ ७१ ॥

दिव्यकेशरिवपुः सुरद्विषो
नैव लब्धशममायुधैरपि ।
दुर्निवाररणकण्डु कोमलै-
र्वक्ष एष निरदारयन्नखैः ॥ ७२ ॥
वारिधेरिव कराग्रवीचिभि-
र्दिङ्मतङ्गजमुखान्यभिघ्नतः ।
यस्य चारुनखशुक्तयः स्फुर-
न्मौक्तिकप्रकरगर्भतान्दधुः ॥ ७३ ॥

॥ युग्मकम् ॥

द्वाभ्यां नृसिंहावतारमाह । दिव्येति । दिव्यकेशरिवपुर्दिव्यसिंहमूर्त्तिः । हरेरायुधैर्वज्रादिभिरपि नैव लब्धशममप्राप्तशान्ति दुर्निवारा दुर्जया रणकण्डूर्यस्य तत् रणव्यसनीत्यर्थः। गोस्त्रियोरुपसर्जनस्येति ह्रस्वः । सुरद्विषो हिरण्यकशिपोर्वक्षः कोमलैर्नखैः निरदारयत् अभिनत् । वज्राद्यभेद्यस्य कोमलनखविदार्यत्वं भगवत्प्रभावादिति विरोधाभासोऽलङ्कारः ॥ ७२ ॥

वारिधेरिति । कराग्राणि वीचय इवेत्युपमितसमासः । वारिधेरिवेति लिङ्गात् । ताभिः कराग्रवीचिभिर्दिगन्तविततनाभिरिति भावः । अत एव दिङ्मतङ्गजानां मुखान्यभिघ्नतो रोषातिरेकात्प्रहरतो यस्य सिंहमूर्त्तेर्हरेर्वारिधेरिव चारुनखाः शुक्तय इव । पूर्ववदुपमितसमासः । स्फुरन्मौक्तिकप्रकरो दिग्गजकुम्भसम्भूतमुक्तासमूहो गर्भेऽन्तर्गतो यासां तासां भावस्तत्ता तां दधुः एष निरदारयदिति पूर्वेणान्वयः । एतेन नरहरिक्रोधस्य महासुरेऽपि न

दीप्तिनिर्जितविरोचनादयं
क्ष्मांविरोचनसुतादभीप्सतः ।
आत्मभूरवरजाखिलप्रजः
स्वर्पतेरवरजत्वमाययौ ॥ ७४ ॥

किं क्रमिष्यति किलैष वामनो
यावदित्थमहसन्न दानवाः ।
तावदस्य न ममौ नभस्तले
लङ्घितार्कशशिमण्डलः क्रमः ॥ ७५ ॥

पर्य्याप्तमिति व्यज्यतइति वस्तुना वस्तुध्वनिः उपमालङ्कारः ॥ ७३ ॥

अथ चतुर्भिर्वामनावतारमाह । दीप्तीत्यादि । आत्मना भवतीति आत्मभूः स्वयम्भूरपि । अवरजास्वरमजा अखिलाः प्रजा जना यस्य सोऽपि सर्वज्येष्ठोऽपीत्यर्थः । अयं हरिः दीप्तिनिर्जितविरोचनात् ज्योतिर्विजितमार्त्तण्डात् । विरोचनः प्रह्लादपुत्रः । विरोचनोऽर्के दहने चन्द्रे प्रह्लादनन्दने इत्युभयत्रापि विश्वः । तस्य सुताद्बलेर्गाम्भुवं अभीप्सतः प्राप्तुमिच्छतोऽभ्याहर्त्तुमिच्छतः । सन्नन्तादाप्नोतेर्लटः शत्रादेशः । स्वर्पतेरवरजत्वमिन्द्रानुजत्वं ययौ । बलिध्वंसनार्थमिति शेषः । लोकानुग्रहार्थिनः किन्न कुर्वन्तीति भावः । अत्राजत्वावरजसामानाधिकरण्यविरोधो भगवत्प्रभावादाभासीकृतइति विरोधाभासोऽलङ्कारः ॥ ७४ ॥

किमिति । एष वामनः खर्व्वः । खर्व्वो ह्रस्वश्च वामनइत्यमरः । किं क्रमिष्यति । इत्थं अनेन प्रकारेण दानवा यावन्नाहसन् ।

गच्छतापि गगनाग्रमुच्चकै
र्यस्य भूधरगरीयसाङ्घ्रिणा ।
क्रान्तकन्धरतयाबलो बलिः
स्वर्गभर्त्तुरगमत्सुबन्धताम् ॥ ७६ ॥
क्रामतोऽस्य ददृशुर्दिवौकसो
दूरमूरुमलिनोरुमायतम् ।
व्योम्नि दिव्यसरिदम्बुपद्धति
स्पर्द्धयेव यमुनौघमुत्थितम् ॥ ७७ ॥

तावत् ततः प्रागेव लङ्घिते अतिक्रान्ते अर्कशशिमण्डले येन सोऽस्य हरेः क्रमः पादविक्षेपो नभस्तले न ममौ न परिमाणं गतवान् यथा नतिस्तथा ववृधे इत्यर्थः । अत्राधारान्नभस्तलादाधेयस्य क्रमस्याधिक्यकथनादधिकालङ्कारभेदः । आश्रयाश्रयिणोराधिक्यमधिकमिति लक्षणात् ॥ ७५ ॥

गच्छतेति । गगनाग्रं गगनोपरिभागं गच्छतापीति विरोधः । भूधरवद्गरीयसेत्युपमा । यस्य वामनस्योच्चकैरुन्नतेनाङ्घ्रिणा क्रान्तकन्धरोऽवष्टब्धकण्ठतयाबलो दुर्बलो बलिर्वैरोचनिः स्वर्गभर्त्तुरिन्द्रस्य सुखेन बध्यते इति सुबन्धः । ईषद्दुःसुष्वित्यादिना खल्प्रत्ययः । तत्तामगमत् । गुरुद्रव्यावष्टब्धकण्ठो हि सुखेन बध्यते इति भावः । न लोकेत्यादिना कृद्योगलक्षणाया एव षष्ठ्या निषेधात्स्वर्गभर्त्तुरिति शेषे षष्ठी । अत्र क्रान्तकन्धरत्वेत्युत्प्रेक्षाया भूधरगरीयसेत्युपमासापेक्षत्वात्सङ्करः । विरोधेन त्वनपेक्षिता संसृष्टिः ॥७६॥

यस्य किञ्चिदपकर्त्तुमक्षमः
कायनिग्रहगृहीतविग्रहः ।
कान्तवक्त्रसदृशाकृतिं कृती
राहुरिन्दुमधुनापि बाधते ॥ ७८ ॥
सम्प्रदायविगमादुपेयुषो
रेष नाशमविनाशिविग्रहः ।
स्मर्त्तुमप्रतिहतस्मृतिः श्रुती
र्दत्त इत्यभवदत्रिगोत्रजः ॥ ७९ ॥

कामतइति । कामतः पादं विक्षिपतोऽस्य सम्बन्धिनं दूरमायतं अलिनीलं मेचकश्यामं ऊरुं सक्थि दिवौकसोदेवाश्वोऽपि दिव्य सरितोमन्दाकिन्या अम्बुपङ्क्त्या जलप्रवाहेण स्पर्द्धया उत्थित मद्भुतः प्रहृष्टं यमुनौघं यमुनाप्रवाहमिव ददृशुरित्युत्प्रेक्षेयमुपमा सङ्कीर्णा ॥ ७७ ॥

अवतारान्तरमाह । यस्येति । कायनिग्रहेणामृतविभागकाले देहच्छेदेन गृहीतविग्रहोबद्धवैरः कृती कुशलोराहुर्यस्य हरेः किञ्चि दपकर्त्तुमक्षमः सन् कान्तं रम्यं यद्वक्त्रं हरिमुखं तेन सदृशी आकृतिर्यस्य तं तत्तुल्यमिन्दुमित्यर्थः । इन्दुं अधुनापि बाधते पीडयति उपरागमिषेणेति भावः । अत्र साक्षात्प्रतिपक्षहरिनिग्रहाशक्त्या राहोस्तदीयेन्दुनिग्रहोक्त्या प्रत्यनीकालङ्कारः । तथा च सूत्रं । प्रतिपक्षप्रतीकाराशक्तौ तदीयतिरस्कारः प्रत्यनीकमिति ॥ ७८ ॥

दत्तात्रेयावतारमाह । सम्प्रदायेति । अविनाशिविग्रहोऽनपाय स्वरूपः अतएव अप्रतिहता स्मृतिः स्मरणशक्तिर्यस्य स एष हरिः

रेणुकातनयतामुपागतः
शातितप्रचुरपत्रसंहतिः ।
लूनभूरिभुजशाखमुज्झित
च्छायमर्ज्जुनवनं व्यधादयम् ॥ ८० ॥

सम्प्रदायः उपदेशपरम्परा तस्य विगमादपायाच्छाश्वकालदोषाद
ध्ययनविच्छेदमुपेयुषीः प्राप्ताः । उगितश्चेति ङीप् । श्रुतीर्वेदान् ।
श्रुतिः स्त्री वेद आम्नायइत्यमरः । समर्त्तुं श्रुतिसम्प्रदायं प्रवर्त्तयितु
मित्यर्थः दत्तइति विख्यातइति शेषः अत्रिगोत्रे जातोऽत्रिगोत्रजो
ऽभवत् । दत्तात्रेयोऽभूदित्यर्थः । अत्रानपायित्वस्मृत्यप्रतिघातयो
र्विशेषणगत्या श्रुतिस्मृतिहेतुत्वोक्त्या काव्यलिङ्गम् ॥ ७९ ॥

परशुरामावतारमाह । रेणुकेति । अयं हरिः रेणुकातनयतां
परशुरामत्वमुपागतः सन् । अर्ज्जुनः कार्त्तवीर्य्यार्ज्जुनः । अर्ज्जुनः
ककुभे पार्थे कार्त्तवीर्य्यमयूरयोरित्यनेकार्थेऽपि रेणुकेयविरोधि
त्वान्निश्चयः । तदुक्तं हरिणा संयोगो विप्रयोगश्च साहचर्य्यं विरो
धिता । अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः । सामर्थ्यमौचिती
देशः कालो व्यक्तिः स्वरादयः । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव
इति । सएव वनं तत् शातिता छिन्ना प्रचुरा प्रभूता पत्रसंहति
र्वाहनसमूहः पर्णसङ्घातश्च यस्य तत् । पत्रं स्याद्वाहने पर्णइति
विश्वः । लूनाश्छिन्ना भूरयः प्रचुराभुजाएव शाखायस्य तत् ।
उज्झिता छाया कान्तिरनातपश्च यस्य तत्तथा व्यधात् विहित
वान् । दधातेर्लुङि गातिस्थेत्यादिना सिचोलुक् । छाया सूर्य्य
प्रिया कान्तिः प्रतिबिम्बमनातपइत्यमरः । अत्र समस्तवस्तुविषयं

एष दाशरथिभूयमेत्य च
ध्वंसितोद्धतदशाननामपि ।
राक्षसीमकृत रक्षितप्रज
स्तेजसाधिकविभीषणाम्पुरीम् ॥ ८१ ॥

निष्प्रहन्तुममरेशविद्विषा
मर्थितः स्वयमथ स्वयम्भुवा ।
सम्प्रति श्रयति सूनुतामय
ङ्कश्यपस्य वसुदेवरूपिणः ॥ ८२ ॥

सावयवं रूपकं व्यक्तं तच्च छायेति पत्रेति च श्लेषप्रतिभोत्थापिताभेदातिशयोक्त्यानुप्राणितमिति सङ्करः ॥ ८० ॥

रामावतारमाह । एषइति । किञ्चेति चार्थः । रक्षितप्रजः एष हरिर्दशरथस्यापत्यं पुमान् दाशरथी रामः । अत इञ् । तस्य भावः दाशरथिभूयं रामत्वं । भुवोभावे इति क्यप् । एत्य प्राप्य । ध्वंसितोहतउद्धतोदृप्तोदशाननोरावणोयस्यां तामपि राक्षसीं रक्षःसम्बन्धिनीं पुरीं लङ्कां तेजसा स्ववीर्य्येण अधिकविभीषणां अत्यन्तभीषणां अकृतेति विरोधः । भयहेतोस्तस्य रावणस्य ध्वंसनात् अधिकोमहान् विभीषणोरावणानुजोयस्यां तामित्यविरोधः । अतएव विरोधाभासोऽलङ्कारः ॥ ८१ ॥

अथ पञ्चभिः प्रस्तुतं कृष्णावतारमाह । निष्प्रहन्तुमिति । अथ रामावतारानन्तरं अयं हरिः अमरेशविद्विषां निष्प्रहन्तुं चैद्यादीन् इन्द्रशत्रून् हन्तुमित्यर्थः । आशिषिमहरणेत्यादिना

तात नोदधिविलोडनमति
त्वद्विनाथ वयमुत्सहामहे।
यः सुरैरिति सुरौघवल्लभो
वल्लवैस्य जगदे जगत्पतिः॥ ८३॥

कर्मणि षष्ठी। स्वयम्भुवा ब्रह्मणा स्वयमात्मनैवार्थितः प्रार्थितः सन् सम्प्रतीदानीं वसुदेवरूपिणोवसुदेवमूर्त्तिधरस्य कश्यपस्य पुत्रतां श्रयति भजति कृष्णरूपेणेति भावः। अत्र स्वयम्भूप्रार्थनायाविशेषणगत्या वसुदेवपुत्रताप्राप्तिहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गम्॥ ८२॥

तातेति। सुरौघवल्लभः सुरगणप्रियः जगत्पतिर्यो हरिः सुरैर्देवैर्वल्लवैर्गोपैश्च हे तात जनक नेति छेदे उदधिविलोडनं समुद्रमथनम्प्रति नो इति छेदे दधिविलोडनं दधिमन्थनं च प्रति त्वद्विना त्वां विनायेत्यर्थः। पृथग्विनेत्यादिना विकल्पात्पञ्चमी। अथ वयं न नो वोत्सहामहे न क्षमामहे इति जगदे गदितं। अत्र हरिवर्णनाकुलेन सुराणां वल्लवानां च प्रकृतानामेव नोदधिशब्दश्लेषाभेदाध्यवसायलब्धदधुदधिविलोडनचमत्कारसाम्याद्रूपकेनौपम्यत्वात्तुल्ययोगिताभेदः तेन च हरेर्दधिमन्थनकलावदुदधिमन्थनमपीति वस्तु व्यज्यतइत्यलङ्कारेण वस्तुध्वनिः॥ ८३॥

नात्तगन्धमिति। किञ्चेति चार्थः। यो हरिः प्रभुभिरप्यभिभूय नात्तगन्धमनाघ्रातमौरभमनभिभूतश्च। आत्तगन्धोऽभिभूतः स्यादित्यमरः। नञर्थस्य नशब्दस्य सुप्सुपेति समासः।

नात्तगन्धमवधूय शत्रुभि-
श्छायया च शमितामरश्रमम्।
योऽभिमानमिव वृत्रविद्विषः
पारिजातमुदमूलयद्दिवः॥ ८४॥

यं समेत्य च ललाटलेखया
बिभ्रतः सपदि शम्भुविभ्रमम्।
चण्डमारुतमिव प्रदीपव-
च्चेदिपस्य निरवाद्विलोचनम्॥ ८५॥

छायया अनातपेन पालनेन च। छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः। पालनोत्कर्षयोः कान्तिसच्छोभापङ्क्तिषु स्त्रियामिति विश्वः। शमितामरश्रमं निवारितसुरखेदं पारिजातं वृत्रद्विषः शक्रस्याभिमानमहङ्कारमिव दिवः स्वर्गादुदमूलयत् उन्मूलितवानिति पारिजातहरणोक्तिः। श्लेषसविशेषणेयमुपमेति केचित्। श्लेषवचान्ये॥ ८४॥

यमिति। किञ्चेति चार्थः। ललाटमेव लेखा तया ललाटलेखया ललाटदेशेन शम्भोर्विभ्रमं सौन्दर्य्यं बिभ्रतः ललाटलोचनमित्यर्थः। चेदिपस्य शिशुपालस्य लोचनं तृतीयनेत्रं कर्त्तृ यं हरिमेव चण्डमारुतं चण्डमारुतमिव समेत्य प्रदीपवत् प्रदीपेन तुल्यं। तेन तुल्यमिति वतिप्रत्ययः। निरवात् निर्वाति स्म नष्टमित्यर्थः। निर्पूर्वाद्वाधातोर्लङ्। निरवापेति काचित्कपाठः स न सम्यक् वातेः प्रक्रियाविरोधादशान्तेरसङ्गतार्थत्वादिति। अनेकार्थेयमुपमा॥ ८५॥

यः कोलतां वल्लवताञ्च बिभ्र-
द्दंष्ट्रामुदस्याशु भुजाञ्च गुर्वीम्।
मग्नस्य तोयापदि दुस्तरायां
गोमण्डलस्योद्धरणञ्चकार ॥ ८६ ॥

धन्योऽसि यस्य हरिरेष समक्ष एव
दूरादपि क्रतुषु यज्वभिरिज्यते यः।
दत्त्वार्घमत्रभवते भुवनेषु याव-
त्संसारमण्डलमवाप्नुहि साधुवादम् ॥ ८७॥

यइति। योहरिः कोलतां वराहत्वं। वराहः शूकरो घृष्टिः कोलः पोत्री किरिः किटिरित्यमरः। वल्लवतां गोपालत्वं च बिभ्रत्। आशु गुर्वीं दंष्ट्रां भुजां च यथासङ्ख्यमिति भावः। उद-स्योद्यम्य दुस्तरायां तोयापदि जलसङ्कटे एकत्र समुद्रकृतायाम् अन्यत्र वर्षकृतायां च मग्नस्य गोमण्डलस्य भूगोलस्य धेनुवृन्दस्य चोद्धरणं चकार। अत्र कोलत्ववल्लवत्वयोः प्रकृतयोरेव श्लेषमूला-भेदाध्यवसायेन गोमण्डलोद्धरणस्य दंष्ट्राभुजोद्यमनस्य च साम्या-दौपम्यगम्यतायां तुल्ययोगिता सतो यथासङ्ख्येन सङ्कीर्यते। इन्द्र-वज्रा वृत्तम्। स्यादिन्द्रवज्रा यदि तौ जगौ गः इति लक्षणात् ॥ ८६ ॥

एवं देवं स्तुत्वानन्तरं कर्त्तव्यमुपदिशति। धन्योऽसीति। धनं लब्धो धन्यः पुण्यवानसि। सुकृती पुण्यवान् धन्य इत्यमरः। धनगणाल्लब्धेति यत्प्रत्ययः। यस्य ते एषः हरिः समक्ष एव अक्ष्णोः समीपे एव पुरत एवेत्यर्थः स्थितइति शेषः। सामीप्ये ऽव्ययीभावः अव्ययीभावे शरत्प्रभृतिभ्यइति समासान्तः ष्ण

भीष्मोक्तन्तदिति वचो निशम्य सम्यक्
साम्राज्यश्रियमधिगच्छता नृपेण ।
दत्तेऽर्घे महति महीभृतां पुरोऽपि
त्रैलोक्ये मधुभिदभूदनर्घ एव ॥ ८८ ॥

एव तृतीयासप्तम्योर्बहुलमिति सप्तम्या अमभावः । अन्यत्र कोविशेषः तथाह । योहरिर्दूरादपि परोक्षेऽपि क्रतुषु यागेषु यज्वभिर्विधिवदिष्टवद्भिः । यज्वा तु विधिनेष्टवानित्यमरः । सुयजोर्ङ्वनिबिति ङ्वनिप्प्रत्ययः । इज्यते पूज्यते स ते प्रत्यक्ष इति धन्यस्त्वमित्यर्थः । फलितमाह । अत्रभवते पूज्यायेत्यर्थः । पूज्यस्तत्रभवानिति सज्जनः । इतरेभ्योऽपि दृश्यन्ते इति सार्वविभक्तिके त्रल्प्रत्यये सुप्सुपेति समासः । अर्घम्पूजां दत्त्वा यावत्समारमण्डलं वर्त्तते तावदिति शेषः । भुवनेषु साधुवादः शब्दस्तं साधुवादं साधुसमाख्यां अवाप्नुहि लभस्वेत्यर्थः । अत्र राज्ञो धन्योऽसीति विशेषणगत्या यस्येत्यादिवाक्यार्थहेतुत्वात्पदार्थहेतुककाव्यलिङ्गमलङ्कारः । वसन्ततिलका वृत्तम् ॥ ८७ ॥

भीष्मेति । येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः । शास्ति यश्चाज्ञया राज्ञः स सम्राडित्यमरः । सम्राजोभावः साम्राज्यं तदेव श्रीस्तां श्रियं अधिगच्छता भजता नृपेण युधिष्ठिरेण इतीत्थं भीष्मोक्तं तद्वचः सम्यङ्निशम्य श्रुत्वा । महीभृतां राज्ञां पुरोऽग्रे महति अर्घे पूजायां दत्तेऽपि मधुभिद्धरिः त्रयो लोकास्त्रैलोक्यं । चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्प्रत्ययः । तत्र त्रैलोक्ये कश्चोऽनर्घः पूजारहित एव अभूदिति विरोधः । अमूल्य एवाभूदि

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
कृष्णार्घदानोनाम चतुर्दशः सर्गः ॥ १४ ॥

त्यविरोधः। मूल्ये पूजाविधावर्घ इत्यमरः। अर्चार्घयोरभेदाध्यवसायाद्विरोधः तद्भ्यवसायादविरोधः इति विरोधाभासोऽलङ्कारः। प्रहर्षिणी वृत्तम्॥ ८८॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघकाव्यव्याख्याने सर्वङ्कषाख्ये चतुर्दशः सर्गः॥ १४ ॥

अथ तत्र पाण्डुतनयेन
सदसि विहितमधुद्विषः ।
मानमसहत न चेदिपतिः
परवृद्धिमत्सरि मनो हि मानिनाम् ॥ १ ॥
पुर एव शार्ङ्गिणि सवैर
मथ पुनरमुन्तदर्चया ।
मन्युरभजदवगाढतरः
समदोषकालइव देहिनं ज्वरः ॥ २ ॥

अथेति । अथ हरिपूजानन्तरं चेदिपतिः शिशुपालः तत्र सदसि सभायां पाण्डुसुतेन युधिष्ठिरेण विहितमधुद्विषो हरेर्मानं पूजां नासहत ईर्ष्यां चकारेत्यर्थः । परोत्कर्षाक्षमेर्ष्या स्यादौज्ज्न्यान्मन्युतोऽपि चेति लक्षणात् । तथा हि । मानिनामहङ्कारिणां मनः परवृद्धौ मत्सरि हि परशुभद्वेषि खल्वित्यर्थः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । अस्मिन् सर्गे उद्गता वृत्तम् । सजसादिमे सलघुके च नसजगुरुकेष्वथोद्गता । अङ्घ्रिगतभनज लागयुताः सजसाजगौ चरणमेकतः पठेदिति लक्षणात् ॥ १ ॥

पुरइति । पुरः पूर्व्वमेव शार्ङ्गिणि सवैरं सक्रोधममुं चैद्यं अथ पुनः अतः परं तदर्चया हरिपूजया अवगाढतरोऽतिविरूढतरो मन्युः क्रोधो रौद्ररसस्य स्थायी भावइति भावः । देहिनं शरीरिणं समौ तुलितौ दोषोऽपथ्यसेवा कालः कर्म्मविपाकश्च यस्य स ज्वरइवाभजत् । उपमालङ्कारः ॥ २ ॥

अभितर्ज्जयन्निव समस्त
नृपगणमसावकम्पयत् ।
लोलमुकुटमणिरश्मि शनै
रशनैः प्रकम्पितजगत्त्रयं शिरः ॥ ३ ॥
स वमन् रुषाश्रु घनघर्म्म
विगलदुरुगण्डमण्डलः ।
स्वेदजलकणकरालकरो
व्यरुचत्प्रभिन्न इव कुञ्जरस्त्रिधा ॥ ४ ॥

अथाष्टभिरस्य गात्रारम्भक्रोधचेष्टां प्रपञ्चयति । अभीत्यादि । असौ चैद्यः । समस्तनृपगणमभितर्जयन्निवेत्युत्प्रेक्षा । तर्ज भर्त्सने चौरादिकस्यानुदात्तत्वेन प्राप्तस्य आत्मनेपदस्य चक्षिङो देशस्य ख्याञः स्थानिवद्भावानादरेण पुनर्ङित्करणसामर्थ्यादनित्यत्वज्ञापनात्परस्मैपदम् अतएव तर्जयतीत्यपि दृश्यते क्वचिदिति भट्टमल्लः । अशनैरतिमात्रं प्रकम्पितं जगत्त्रयं येन तत् त्रैलोक्यभीषणं शिरः शनैर्लोलाश्चपला मुकुटमणिरश्मयो यस्मिन् कर्मणि तद्यथा तथा अकम्पयत् क्रोधातिरेकादिति भावः ॥ ३ ॥

स इति । रुषा रोषेणास्रु वमन् मुञ्चन् । घनेन सान्द्रेण घर्म्मेण क्रोधोष्मणा विगलत् स्रवदुरु महत् गण्डमण्डलं यस्य सः स्विद्यत्कपोल इत्यर्थः । स्वेदजलकणैः स्वेदबिन्दुभिः करालकरो दन्तुरहस्तः स चैद्यः त्रिधा नेत्रकपोलहस्तदेशैः प्रभिन्नो मदस्रावी मत्तः । प्रभिन्नो मत्तः स्यादिति वैजयन्ती । कुञ्जर इव

सनिकाममघर्मितमभीक्ष्ण
मधुवद्वधूतराजकः ।
क्षिप्तवक्कलजलविन्दुवपुः
प्रलयार्णवोत्थित इवादिशूकरः ॥ ५ ॥
क्षणमाश्लिषद्घटितशैल
शिखरकठिनांसमण्डलः ।
स्तम्भमुपहितविधूतिमसा
वधिकावधूनितसमस्तसंसदम् ॥ ६ ॥

व्यरुषत् । रुषेर्युद्भ्यो लुङीति विकल्पात् परस्मैपदम् । एतेन स्वेदाख्यः सात्त्विकभाव उक्तः । उपमालङ्कारः ॥ ४ ॥

स इति । राज्ञां समूहो राजकं । गोत्रोक्षेत्यादिना वुञ् प्रत्ययः । तदवधूतमभिभूतं येन स तथोक्तः स चैद्योनिकामं घर्मितं सञ्जातघर्मम् अद्भवत्स्वेदमित्यर्थः । घर्मः स्यादातपे ग्रीष्मउष्णस्वेदाम्भसोरपीति विश्वः । तारकादित्वादितच्प्रत्ययः । वपुः प्रलये अर्णवस्तस्मादुत्थितः आदिशूकर इव क्षिप्ताः प्रेरिताः वक्कलाः सान्द्र जलविन्दवो यस्मिन् कर्म्मणि तद्यथा तथा अभीक्ष्णमधुवत् क्रोधाद्भवति स्म । धूञ् विधूनन इति धातोस्तौदादिकाल्लङ् । अत्रापि स्वेदः सात्त्विक एवोक्तः । उपमालङ्कारः ॥ ५ ॥

क्षणमिति । घटितं सुसंहितं यच्छैलशिखरन्तद्वत्कठिनमंसमण्डलं यस्य सोऽसौ चैद्यः उपहिताऽवगाहिता आरोपितेत्यर्थः विधूतिः कम्पो यस्मिंस्तं अधिकमत्यन्तमवधूनिता कम्पिता समस्ता सकला संसत् सभा येन तं स्तम्भं क्षणं आश्लिषत् श्लिष्टवान् तेनांस

कनकाङ्गदद्युतिभिरस्य
गमितमरुचत्पिशङ्गताम्।
क्रोधमयशिखिशिखापटलैः
परितः परीतमिव बाहुमण्डलम् ॥ ७ ॥
कृतसन्निधानमिव तस्य
पुनरपि तृतीयचक्षुषा।
क्रूरमजनि कुटिलभ्रु गुरु
भ्रुकुटीकठोरितललाटमाननम् ॥ ८ ॥

मण्डलेनाहतवानित्यर्थः अतएव कठिनांसमण्डलइति विशेषणं च। पुषादित्वात् च्लेरङादेशः। आलिङ्गनार्थत्वे तु श्लिषआलिङ्गनइति क्सादेशः स्यात्। क्रोधान्धाः किमु न कुर्वन्तीति भावः। अत्रांस काठिन्यस्य विशेषणगत्या स्तम्भाश्लेषहेतुत्वात् काव्यलिङ्गं शैलशिखरोपमया सङ्कीर्य्यते ॥ ६ ॥

कनकेति। कनकस्याङ्गदयोः केयूरयोः द्युतिभिः पिशङ्गतां पिङ्गलवर्णताङ्गमितं प्रापितमिति तद्गुणालङ्कारः। अस्य चैद्यस्य बाहुमण्डलं क्रोधमयशिखिशिखापटलैः क्रोधाग्निज्वालाजालैः परितः परीतं परिवृतमिवारुचत् इत्युत्प्रेक्षा। द्युताद्युत्कीति परस्मैपदम् ॥ ७ ॥

कृतेति। कुटिले भ्रुवौ यस्य तत्कुटिलभ्रु। उपसर्जनस्य ह्रस्वः। गुर्व्या भ्रुकुट्या भ्रूभङ्गेन कठोरितं भीषणीकृतं ललाटं यस्य तत् तस्य चैद्यस्याननं पुनरपि तृतीयचक्षुषा कृतसन्निधानं

अतिरक्तभावमुपगम्य
कृतमतिरमुष्य साहसे।
दृष्टिरगणितभयासिलता
मवलम्बते स्म समया सखीमिव॥ ९॥
करकुड्मलेन निजमूरु
मुरुतरनगाश्मकर्कशम्।
त्रस्तचपलचलमानजन
श्रुतभीमनादमयमाहतोच्चकैः॥ १०॥

कृतसंसर्गामिवेत्युत्प्रेक्षा। क्रूरमजनि भयङ्करमभूत्। जनेः कर्त्तरि लुङ् दीपजनेत्यादिना विकल्पाच्चिण्प्रत्ययः॥ ८॥

अतिरक्तेति। अमुष्य चैद्यस्य दृष्टिः। अतिरक्तस्य भावस्त मतिरक्तभावं रोषातिरेकादत्यरुणतामन्यत्र कर्म्मातिरेकादत्यनु रागितामुपगम्य प्राप्य साहसे क्रृष्णादिधूननरूपे अन्यत्र युद्धे कृत मतिः। सर्व्वथा गमिष्यामि हनिष्यामि इति च कृतनिश्चया अर्थ निर्द्धारणं मतिरिति। अगणितमविचारितं भयं यत्रोर्गुरुजनाच्च यया सा सती समया समीपे असिलतां सखीमिवावलम्बते स्म साधनत्वेन स्वोपकारं क्रोधाश्लिष्टांमया स्वाङ्गमद्राक्षीदित्यर्थः। अत्र प्रस्तुतदृष्टिविशेषणसाम्यादप्रस्तुतनायिकाप्रतीतेः समासोक्ति रुपमासङ्कीर्णा॥ ९॥

करेति। अयं चैद्यः उरुतरोमहत्तरोनगाश्मवत् शैलशिलेव कर्कश इत्युपमा। तं निजमात्मीयमूरुं सक्थि। सक्थि क्लीवे पुमानूरुरि त्यमरः। करः कुड्मलइवेत्युपमितसमासः। तेन संहतप्रसारिताङ्गु

इति चुक्रुधे भृशमनेन
ननु महदवाप्य विप्रियम्।
याति विकृतिमपि संवृतिम
त्किमु यन्निसर्गनिरवग्रहम्मनः ॥ ११ ॥

लिना पाणितलेनेत्यर्थः । चलोभीतः अतएव चपलं चञ्चलं चलमानेन जनेन अतोभीमनादोभयङ्करध्वनिर्यस्मिन् कर्म्मणि तद्यथा तथा उच्चकराहत आहतवान् । अलब्धलक्ष्याः क्रोधान्धाः स्वात्मानमेव घ्नन्तीति भावः । आङ्पूर्व्वाद्धन्तेर्लङ् आङोयमहन इति अकर्म्मकाधिकारेऽपि स्वाङ्गात् सकर्म्मकाच्चेति वक्तव्यमस्मा दात्मनेपदे अनुदात्तापदेशेत्यादिनाऽनुनासिकलोपः ॥ १० ॥

इतीति । इतीत्थमनेन प्रकारेण अनेन चैद्येन भृशं चुक्रुधे क्रुद्धं । भावे लिट् । संवृतिमदपि संवृतिर्विकारगुप्तिः तद्वदपि धीर मपीत्यर्थः । मनोमहद्विप्रियं अप्रियमवाप्य विकृतिं विकारं याति ननु प्राप्नोति खलु । यन्मनोनिसर्गात्स्वभावान्निरवग्रहं चप लमित्यर्थः । ग्रहेः खल्प्रत्ययः । तदिति शेषः किमु विकृतं यातीति किमु वक्तव्यमित्यर्थः । चपलचित्तश्चायं चैद्य इति भावः । अत्र चैद्यक्रोधस्य नन्वित्यादिवाक्यार्थहेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गम् ॥ ११ ॥

एवं गात्रारम्भविकारानुक्त्वा वागारम्भान् वक्तुमुपोद्घातयति। प्रथममिति। न व्यथते बिभेतीति अव्यथो निर्भयः। दिहृषीत्या दिना नञ्पूर्व्वाद्व्यथतेरिनिः । असौ चैद्यः प्रथमं शरीरजैर्विकारैः पूर्व्वोक्तैः शिरःकम्पनादिभिः कृतोमुकुलबन्धोमुकुलप्रादुर्भावोयस्य

प्रथमं शरीरजविकार
कृतमुकुलबन्धमव्यथी।
भाविकलहफलयोगमसौ
वचनेन कोपकुसुमं व्यचीकसत् ॥ १२ ॥
ध्वनयन्सभामथ सनीर
घनरवगभीरवागभीः।
वाचमवददिति रोषवशा
दतिनिष्ठुरस्फुटतराक्षरामसौ ॥ १३ ॥

मत्। भाविकलहस्य रणस्यैव फलस्य योगो यस्य तत्। अस्त्रियां समराजीकरणाः कलहविग्रहावित्यमरः। कोप एव कुसुमं तत् वचनेन यद्पूजदित्यादिवक्ष्यमाणवाक्येन व्यचीकसत् विकासयति स्म। कमेर्णौ चङ्युपधाया ह्रस्वः दीर्घो लघोरित्यभ्यासदीर्घः। अत्र विकारकलहवचनकोपेषु मुकुलफलविकासकुसुमलरूपणात्समस्तवस्तुवर्त्ति सावयवरूपकम् ॥ १२ ॥

ध्वनयन्निति। अथ सनीरघनरवगभीरवाक् सजलमेघगर्जितगभीरस्वर इत्यर्थः अभीः निर्भीकः असौ चैद्यः सभां सामाजं ध्वनयन् अतिरोषवशात् अतिनिष्ठुराणि अतिपरुषाणि स्फुटतराणि अक्षराणि यस्यास्तां वाचमवदत्। घनरवगभीरेत्युपमालङ्कारः ॥ १३ ॥

वाचमवददित्युक्तं अथ तामेव प्रपञ्चयन् पञ्चभिः पाण्डवोपालम्भमाह। यदित्यादि। हे पार्थ पृथापुत्रेति मातृप्राधान्येनामन्त्रणं मर्मोद्घाटनार्थं। सतामपूजितं सद्भिरपूज्यमानमित्यर्थः। मनि

यदपूपुजस्त्वमिह पार्थ
मुरजितमपूजितं सताम् ।
प्रेम विलसति महत्तदहो
दयितञ्जनः खलु गुणीति मन्यते ॥ १४ ॥
यदराज्ञि राजवदिहार्घ्य
मुपहितमिदम्मुरद्विषि ।
ग्राम्यमृगइव हविस्तदयं
म्भजते ज्वलत्सु न महीशवह्निषु ॥ १५ ॥

बुद्धिपूजार्थेभ्यश्चेति वर्त्तमाने क्तः क्तस्य च वर्त्तमानइति षष्ठी । मुरजितं कृष्णं इह सदसि यद्यस्मादपूपुजः पूजयसि स्म । णौ चङ्युपधाया ह्रस्वः । तत्तस्मात् महत्प्रेम विलसति स्फुरति । अन्यथा कथमपूज्ये पूज्यत्वाभिमानइत्यभिप्रेत्याह । अतो लोकः दयितं प्रियं जनं गुणीति मन्यते खलु अगुणिनमपीत्यर्थः अहो आश्चर्यं कृष्णः प्रेम्णा पूजितो न गुणादिति भावः । अत्र प्रेमविलसित स्योत्तरवाक्यार्थहेतुकत्वात्काव्यलिङ्गम् ॥ १४ ॥

य इति । अराज्ञि अभिषेकादिराजगुणविरहिणीत्यर्थः । नञ स्तत्पुरुषादिति समासान्तप्रतिषेधः । इहास्मिन् मुरद्विषि कृष्णे । अपाचहोतनार्थसम्प्रदानविभक्तिनिर्देशः । राजानमर्हतीति राजवत् राजार्हं । तदर्हमिति वतिप्रत्ययः । तद्धितश्चासर्वविभक्तिरित्यव्य यत्वम् । यदिदमर्घ्यमर्घार्थं द्रव्यं अर्हणमित्यर्थः । उपहितमर्पितं तदर्घ्यमयं कृष्णः महीशाश्वनीपावकमयइव इत्युपमितसमासः । तेषु महीशवह्निषु ज्वलत्सु सत्सु अन्यत्र महीशाइव वह्नयः

अनृताङ्गिरन्नगदसीति
जगति पटहैर्विघुष्यसे ।
निन्द्यमथ च हरिमर्चयत
स्तव कर्मणैव विकसत्यसत्यता ॥१६॥
तव धर्मराज इति नाम
कथमिदमपष्ठु पठ्यते ।
भौमदिनमभिदधत्यथवा
भृशमप्रशस्तमपि मङ्गलञ्जनाः ॥ १७ ॥

तेषु ज्वलत्सु सत्स्वित्यर्थः । ग्राम्यमृगः शुनको हविरिव न भजते । न प्राप्नोति । उपमालङ्कारः ॥ १५ ॥

अनृतामिति । हे पार्थ अनृतामसत्याङ्गिरं न गदसि न वदसीति जगति लोके पटहैर्वाद्यविशेषैः कर्त्तृभिर्विघुष्यसे उद्घोष्यसे अथ च तथापि । निन्द्यं हरिमर्चयतस्तव कर्मणा अपूज्यपूजाकरणेनैवासत्यता सत्यहीनता विकसति प्रकाशते । अत्रासत्यप्रसिद्धसत्याचरणयोर्विरूपयोर्घटनाद्विरूपघटनारूपो विषमालङ्कारः ॥ १६ ॥

तवेति । हे पार्थ तवेदं धर्मराज इति नाम कथमपष्ठु असत्यमेव पठ्यते । अपदुःसुभ्यः स्थ इत्यौणादिकः कुप्रत्ययः । अम्बाम्बगोभूमीत्यादिना षत्वम् । यद्वा युक्तमेव तदित्याह । अथ वा जनाः भृशमप्रशस्तमपि भौमदिनमङ्गारकवारं मङ्गलं अभिदधति व्यपदिशन्ति तद्वदिदमपीत्यर्थः । लोकैरप्रशस्तं प्रशस्तशब्देन विरुद्धार्थेनापि व्यपदिश्यते तद्वधारणदोषात् । तद्वद्धर्मराजस्यापि

यदि वार्च्चनीयतमएष
किमपि भवताम्पृथासुताः ।
शौरिरवनिपतिभिर्न्निखिलै
रवमाननार्थमिह किन्निमन्त्रितैः ॥ १८ ॥
अथ वा न धर्म्ममसुबोध
समयमवयात बालिशाः ।
काममयमिह वृथापलितो
हतबुद्धिरप्रणिहितः सरित्सुतः ॥ १९ ॥

ते धर्म्मराजव्यपदेशइति भावः । अत्र धर्म्मराजभीमदिनयोर्निर पेक्षवाक्यद्वये प्रतिबिम्बकरणात् दृष्टान्तालङ्कारः ॥ १७ ॥

यदि वेति । हे पृथासुताः कौन्तेयाः एष शौरिर्वा शौरिरे वेत्यर्थः । वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चयइति विश्वः । किमपि कथमपि भवतामर्च्चनीयतमोयदि पूज्यश्चेत् तर्हीति शेषः अवमानस्तिरस्कारः तस्मै तदर्थमेव । अर्थेन सह नित्य समासः सर्व्वलिङ्गता च वक्तव्या । क्रियाविशेषणम् । निमन्त्रितै राहूतैर्निखिलैरवनिपतिभिरिह किं कोऽर्थः साध्यइत्यर्थः । अत एव साधनक्रियापेक्षया करणे तृतीया । अत्र गम्यमानक्रियापेक्षयापि कारकशक्तिरिति न्यायद्योते । अत्र सकलराजनिषेधस्य पूर्व्ववाक्यार्थहेतुकत्वात्काव्यलिङ्गभेदः ॥ १८ ॥

अथ त्रिभिर्भीष्मोपालम्भमाह । अथेत्यादि । अथ वा बालिशाः मूर्खाः यूयमिति शेषः । सुबोधोन भवतीत्यसुबोधोदुर्बोधः समय

स्वयमेव शन्तनुतनूज
यमपि गणमर्घ्यमभ्यधाः ।
तत्र मुररिपुरयं कतमो
यमनिन्द्यवन्दिवदभिष्टुषे वृथा ॥ २० ॥

आचारो यस्य तं धर्म्मं नावयात न जानीत । अवपूर्व्वाद्याधातोर्लोट् लोटस्तस्थमित्यादिना थस्य तादेशः । किन्तु वृथा निष्फलं पलितं यस्य स वृथापलितः वृथापरिणतइत्यर्थः । पलितं जरसा शौक्ल्य मित्यमरः । वृथात्वे हेतुः हतबुद्धिर्नष्टमतिरयं सरित्सुतोभीष्मोऽपि काममप्रणिहितोऽनवहितः प्रमत्तः बालाः पार्थान जानन्तु हन्त वृद्धोऽपि न जानातीति चित्रमित्यर्थः । अतएव सत्यपि कारणे कार्य्यानुदयाद्विशेषोक्तिरलङ्कारः तथा बालिशत्वधर्म्मदुर्बोधित्वयो र्विशेषणगत्या धर्म्मज्ञानाहेतुत्वात्काव्यलिङ्गञ्चेत्यनयोः सापेक्षत्वात्सङ्करः ॥ १८ ॥

स्वयमेवेति । हे शन्तनुतनूज भीष्म स्वयमेव त्वमेवेत्यर्थः । यमपि गणं वर्गमर्घ्यमर्घार्हं पूज्यं । दण्डादिभ्योयदिति यत्प्रत्ययः । अभ्यधाः अवोचः स्नातकं गुरुमित्यादिश्लोकइति भावः । धाधातो र्लुङि गातिस्थेत्यादिना सिचोलुक् । तत्र स्नातकादिगणे अयं मुर रिपुः कतमः न कोऽपीत्यर्थः। मास्तु अस्तुवा अस्मदुपालम्भे कोहेतुरत आह यमिति । यं मुररिपुमनिन्द्यवन्दिवत्प्रगल्भवैतालिकवदित्युपमा अभिष्टुषे मिथ्यास्तौषि । अतस्त्वमेवोपलभ्यइति भावः । उप सर्गात्सुनोतीत्यादिना षत्वम् ॥ २० ॥

अवनीभृतांत्वमपहाय
गणमतिजडस्समुन्नतम्।
नीचि नियतमिह यच्चपलो
निरतः स्फुटं भवसि निम्नगासुतः ॥२१॥
प्रतिपत्तुमङ्ग घटते च
न तव नृपयोग्यमर्हणम्।
कृष्ण कलय ननु कोऽहमिति
स्फुटमापदाम्पदमनात्मवेदिता ॥२२॥

अवनीति । अतिजडोऽतिमूढोऽतिशीतश्च चपलोऽस्थिरः सलरश्च त्वं । समुन्नतं उन्नतमवनीभृतां राज्ञां भूधराणां च गणमपहाय । न्यञ्चतीति न्यङ् तस्मिन् नीचि नीचहृत्ते निम्ने च । अन इत्यकारलोपे चाविति दीर्घः । इहास्मिन् कृष्णे यद्यस्मान्नियतं नित्यं निरतोऽनुरक्तः प्रवणश्च स इति शेषः । निम्नं नीचं गच्छतीति निम्नगा नदी । डोऽन्यत्रापि दृश्यत इति डप्रत्ययः । तस्याः सुतो भवसि स्फुटं व्यक्तं नीचनिरतत्वादिधर्मसम्बन्धादिति भावः । उक्तं च । न पित्र्यमनुवर्त्तन्ते मातृकं द्विपदा इति अत्र चतुर्थपादार्थस्य पूर्ववाक्यार्थहेतुकत्वात्काव्यलिङ्गभेदः ॥ २१ ॥

अथ सप्तदशभिः कृष्णोपालम्भं करोति । प्रतिपत्तुमिति । हे अङ्ग तव नृपयोग्यं राजार्हमर्हणं पूजनं प्रतिपत्तुं स्वीकर्तुं न च घटते न युज्यते । नन्वहमपि राजैव कथमर्हणं मे न युक्तं तत्राह कृष्णेति । हे कृष्ण अहं कइति कलय अहं राजा न वेति निजस्वरूपमालोचयेत्यर्थः । अनालोचनेऽनर्थमाह । अनात्म

अनुरस्त्वया न्यवधि कोऽपि
मधुरिति कथम्प्रतीयते ।
दण्डदलितसरघः प्रथसे
मधुसूदनस्त्वमिति सूदयन्मधु ॥ २३ ॥

वेदिता अनात्मज्ञत्वं आपदां पदं स्थानं स्फुटं खलु सत्यमित्यर्थः । आत्मा च कंसकिङ्करस्तस्य पशुपालकत्वादिति भावः । अतो निजस्वरूपं चिन्त्यमिति हेतुमङ्गावात्काव्यलिङ्गमिति ॥ २२ ॥

असुरइति । मधुरिति कोऽप्यसुरस्त्वया न्यवधि हतः। आत्मनेपदेष्वन्यतरस्यामिति हन्तेर्लुङि विकल्पाद्वधादेशः। इति कथं प्रतीयते विश्वस्यते न कथञ्चिदित्यर्थः। प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुष्वित्यमरः । किन्तु दण्डेन दलिताध्वस्ता सरघा मधुमक्षिका येनेदृशस्त्वं । सरघा मधुमक्षिकेत्यमरः । अतएव मधु क्षौद्रं सूदयन् पीडयन् मधुसूदनइति प्रथसे प्रथितोऽसि । मक्षिकासूदनमेव मधुसूदनसंज्ञाप्रवृत्तिनिमित्तं न तु मधुनाम्नोदैत्यस्य सूदनमित्यर्थः । अत्र मधुसूदनसंज्ञायां प्रसिद्धार्थनिषेधस्योत्तरवाक्यस्यान्यथा व्युत्पादनहेतुत्वाद्वाक्यार्थहेतुकङ्काव्यलिङ्गम् ॥ २३ ॥

मुचुकुन्देति । हे अबल बलहीन कुतः मुचुकुन्दोनाम कश्चिद्राजा । यस्यासुरविजयश्रान्त्या निद्रायमाणस्य देवतावरप्रसादात् निद्राविघातकारी दृष्टिपाताद्भस्मीभवति । तस्य तत्पं शय्या तदेव शरणं रक्षकं यस्य तस्य कालयवनविद्रावितस्येति भावः । तथा मगधपतिना जरासन्धेन जातितोऽसः अष्टादशकृत्वोमहावीर्यस्य तव

मुचकुन्दतल्पशरणस्य
मगधपतिशातितौजसः ।
सिद्धमबल सबलत्वमहो
तव रौहिणीतनयसाहचर्य्यतः ॥ २४ ॥

छलयन्प्रजास्त्वमनृतेन
कपटपटुरैन्द्रजालिकः ।
प्रीतिमनुभवसि नग्नजितः
सुतयेष्टसत्यइति सम्प्रतीयसे ॥ २५ ॥

रौहिणीतनयस्य बलापरनाम्नोबलभद्रस्य साहचर्य्यतः साहचर्य्यात् सबलत्वं सिद्धं । न तु स्वबलसम्पत्त्येत्यर्थः । अहो कारणं विना कार्य्योदयादाश्चर्य्यं अतएव विभावनालङ्कारः । पुष्पैर्व्वालभ्यते इति भावः ॥ २४ ॥

छलयन्निति । इन्द्रजालं वेत्तीति ऐन्द्रजालिकः । अतएव कपटपटुर्व्वञ्चनाकुशलस्त्वं अनृतेनासत्येन प्रजाश्छलयन् वञ्चयन् इष्टं सत्यं यस्य स इष्टसत्यः प्रियसत्य इति सम्प्रतीयसे सम्यक् ख्यायसे । प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताइत्यमरः । नग्नजितोनग्नजिन्नाम्नोराज्ञः सुतया सत्यभामया सत्यापराख्यया प्रीतिमानन्दं अनुभवसि सत्यायोगादिष्टसत्योन तु सत्ययोगादिति भावः । अत्र हरेः सत्यसम्बन्धेऽपि तदसम्बन्धोक्तेः सम्बन्धे असम्बन्धरूपातिशयोक्तिः ॥ २५ ॥

धृतवानिति । आहवे युद्धे अरिचक्रादरिसैन्याद्भयेन चकितं सम्भ्रान्तं । चकितं भयसंभ्रम इति सज्जनः । निजमात्मीयं

धृतवान्न चक्रमरिचक्र
भयचकितमाहवे निजम् ।
चक्रधर इति रथाङ्गमदः
सततम्बिभर्षि भुवनेषु रूढये ॥ २६ ॥
जगति श्रिया विरहितोऽपि
यदुदधिसुतामुपायथाः ।
ज्ञातिजनजनितनामपदा
न्त्वमतः श्रियः पतिरिति प्रथामगाः ॥२७॥

चक्रं सैन्यं न धृतवान् नावलम्बितवान् न रचितवानित्यर्थः । किं तु चक्रधर इति भुवनेषु रूढये प्रसिद्धये । अदः इदं रथाङ्गं चक्रापराख्यं सततं बिभर्षि दधासि वृथाभारमिति भावः । चक्रं सैन्यरथाङ्गयोरिति हेमचन्द्रः । अयोविकारधरः चक्रधरो भवान्न रिभीतचक्राधरत्वादित्यर्थः । अत्र हरौ भगवति चक्रधारण सम्बन्धाकारतिशयोक्तिः ॥ २६ ॥

जगतीति । श्रिया राजलक्ष्म्या विरहितोऽपि । यदूनां ययाति शापाद्राज्यानधिकारित्वादिति भावः । ज्ञातिजनेन बन्धुजनेन जनितं प्रवर्तितं नामपदं श्रीपतिरिति पारिभाषिकसंज्ञाशब्दो यस्यास्तां उदधिसुतां अब्धिकन्यां यद्यस्मादुपायथाः उदूढवानित्यर्थः । विवाहोपयमौ समावित्यमरः । उपायमः स्वीकरणे इत्यात्मने पदम् । तनादिभ्यस्तथासोरिति सिचोलुक् अनुदात्तोपदेश इत्यादिना अनुनासिकलोपः । अतोजगति श्रियः पतिरिति प्रथां ख्यातिमगाः प्राप्तवानसि । इणोगा लुङीति गादेशः ।

अभिशत्रु संयति कदाचि
दविहितपराक्रमोऽपि यत्।
व्योम्नि कथमपि चकर्थ पदं
व्यपदिश्यसे जगति विक्रमीत्यतः ॥ २८ ॥
पृथिवीम्बिभर्थ यदि पूर्व्व
मिदमपिगुणाय वर्त्तते।
भूमिभृदिति परत्वारितभू
स्त्वमुदाह्रियस्व कथमन्यथा जनैः ॥ २९ ॥

न राजान्तरवद्राज्यलक्ष्मीयोगात्तव श्रीपतित्वं । किं तु श्रीसंज्ञिकायाः कस्याश्चिद्दराङ्ग्याः परिग्रहादिति भावः । अत्रोपसेन स्याभिषेकसंस्कारेऽपि त्रैलोक्यप्रतिष्ठापकस्य हरेरेव सकलराज्यश्रीधुरन्धरत्वसम्बन्धेऽप्यसम्बन्धोक्तेरतिशयोक्तिः ॥ २७ ॥

अभीति । संयति युद्धे कदाचित् कदापि अभिशत्रु शत्रुमभिव्याप्य । आभिमुख्येऽव्ययीभावः । अविहितपराक्रमोऽकृतपौरुषोऽपि यद्यस्मात्कथमपि महता प्रयत्नेन व्योम्नि पदं पादक्षेपं चकर्थ कृतवानसि । कृतोभारद्वाजस्येति इट्प्रतिषेधः पित्त्वाद्गुणः । अतोजगति विक्रमी विक्रमवानिति व्यपदिश्यसे व्यवह्रियसे न तु पराक्रमयोगादित्यर्थः । अत्रापि पराक्रमसम्बन्धेऽपि असम्बन्धोक्तेरतिशयोक्तिः ॥ २८ ॥

पृथिवीमिति । पूर्व्वं प्रागपि सम्पत्स्यभवेऽपीति भावः । पृथिवीं बिभर्थ यदि भृतवांश्चेत् । भृञोलिटि भारद्वाजीयेट्प्रतिषेधः पित्त्वाद्गुणः । इदं भूधारणमपि गुणायोत्कर्षाय वर्त्तते । भूतपूर्व्वगत्यापि व्यपदेशस्तत्तदपि नास्तीति भावः प्रत्युत परैः शत्रुभिः

तव धन्यतेयमपि सर्व्व
नृपतितुलितोऽपि यत्क्षणम् ।
क्लान्तकरतलधृताचलकः
पृथिवीतले तुलितभूभृदुच्यसे ॥ ३० ॥

हारितभूः परहारितभूमिकः जरासन्धेन मथुरानगरान्निः
ष्कासितत्वादिति भावः । अत्र हर्तुरिव हरणचमत्वमेव हारयि
तृत्वमिति णिजर्थोपपत्तिः । जन्मैः कथमन्यथा अर्थवैपरीत्येन
भूमिभृदिति उदाह्रियस्व उदाह्रियेथाः । संभावनायां लोट् ।
असंभावितमेवेत्यर्थः । अत्रापि भूधरणसम्बन्धेऽप्यसम्बन्धोक्तेरति
शयोक्तिः ॥ २८ ॥

तवेति । तवेयं धन्यता पुण्यवत्ता कथं सर्वैर्नृपतिभिस्तुलितो
ऽवधूतोऽपि तिरस्कृतोऽपीत्यर्थः क्षणं क्लान्ते भारवत्तयैव श्रान्ते कर
तले धृतः अचलकोऽल्पाचलो येन सः सन् पृथिवीतले तुलितभूभृद्
धृतराजकश्च उच्यसे इति यत् इयमप्यपरा ते धन्यतेत्यर्थः ।
गोवर्द्धनाख्यक्षुद्रभूधरतोलनात्तुलितभूभृत्त्वं भवति न माहात्म्यमिव
महावीरातितुलनादिति भावः । अत्र सर्व्वनृपतितुलितोऽपि तत्तो
लकइति विरोधोभूभृदिति श्लेषमूलाभेदाध्यवसायोत्थापितइति
विरोधातिशयोक्त्योः सङ्करः तेन गोवर्द्धनोद्धरणमपि नातीवाद्भुतं
बाहुबलशालिनामिति वस्तु व्यज्यते ॥ ३० ॥

त्वमिति । हे अशुभकर्म्मनिरत पापाचारपर अतएवा
कुशलमतिर्दुर्बुद्धिस्त्वं परिपाके फलकाले दारुणं विचित्रपाप
यातनामयत्वाद्भयङ्करमित्यर्थः नरकं निरयं । स्यान्नारकस्तु नरको
निरयोदुर्गतिः स्त्रियामित्यमरः । जेतुमशक्नुवन् पापिष्ठैर्दुर्जयत्वा

त्वमशक्नुवन् शुभकर्म्म
निचितपरिपाकदारुणम् ।
जेतुमकुशलमतिर्नरकं
यशसेऽधिलोकमजरः स्तुतमावः ॥ ३१ ॥

सकलैर्वपुः सकलदोष
समुदितमिदङ्गुणैस्तव ।
त्यक्तमपगुण गुणत्रितय
त्यजनप्रयासमुपयासि किम्मुधा ॥ ३२ ॥

दिति भावः । अधिलोकं लोके । विभक्त्यर्थेऽव्ययीभावः । यशसे नरकविजयीति प्रसिद्धये भुवः सुतन्नरकाख्यं अजयः जितवानसि परलोकप्रतारणमात्रपरो न परलोकबाधोपीति भावः । अत्र निरयापराख्यनरकविजयात्मकोर्विशेषणगत्या तज्जयस्यार्थिनः स्वरे र्नरकासुरविजयप्रकृतिहेतुकत्वात्पदार्थहेतुकः काव्यलिङ्गम् । तच्च नरकयोः श्लेषमूलाभेदाध्यवसायादुत्थापितमिति सङ्करः ॥ ३१ ॥

सकलैरिति । हे अपगुण निर्गुण सकलैः सर्वैर्दोषैः समुदितं युक्तं तवेदं वपुः सकलैर्गुणैः शौर्यादिभिस्त्यक्तं सर्वगुणानिवर्तितमेवेत्यर्थः । एवं च सति गुणत्रयस्य त्यजने त्यागे यः प्रयासः तं मुधा वृथा किं किमर्थमुपयासि मुमुक्षयेति भावः । यत्र सकलगुणस्य त्यागस्तत्र गुणत्रयस्य त्यागोऽर्थगत्या सिद्ध एव अन्यथा साकल्यव्याघाता दित्यर्थः । स्वभावतो निर्गुणस्य परत्र स्तुतः कुतो गुणत्रयचिन्तेति ध्वनिः । गुणत्रयत्यागनिषेधस्य सकलैरित्यादिवाक्यार्थहेतुकत्वात्काव्यलिङ्गभेदः ॥ ३२ ॥

त्वयीति । हे आत्म असमीक्ष्यकारिन् । जाल्मोऽसमीक्ष्यकारी स्यादित्यमरः । गणैरपाकृते निरस्ते गुणैर्हीने त्वयि पूजनं

त्वयि पूजनञ्जगति जाल्म
कृतमिदमपाकृते गुणैः ।
हासकरमघटते नितरां
शिरसीव कङ्कतमपेतमूर्द्धजे ॥ २३ ॥
मृगविद्विषामिव यदित्थ
मजनि मिषताम्पृथासुतैः ।
अस्य वनशुन इवापचितिः
परिभावएष भवताम्भुवोऽधिपाः ॥ २४ ॥

कृतं जगति हासकरं परिहासजनकं इदं पूजनं । अपेतमूर्द्धजे अपगतकेशे शिरसि कङ्कतं दारुदन्तादिमयः केशप्रसाधनविशेषः । प्रसाधनं कङ्कतिकेति विश्वामरौ । कङ्कतमेव कङ्कतिका । कङ्कणमिति पाठे शेखरमित्यर्थः । कङ्कणं शेखरे हस्तसूत्रमण्डनयोरपीति विश्वः । तदिव नितरामघटते न सङ्गच्छते इत्यर्थः । नञोनलोपस्तिङि क्षेपे इत्युपसङ्ख्यानमिति निन्दार्थातिङ्योगेऽपि नलोपः । उपमालङ्कारः ॥ २३ ॥

सम्प्रति राज्ञां रोषमुत्पादयन्नाह । मृगेति । हे भुवोऽधिपाः राजानः मृगविद्विषां सिंहानामिव भवतां मिषतां पश्यतां भवत्सु मिषत्सु मिषतोयुष्मान् अनादृत्येत्यर्थः । षष्ठी चानादरे इति विकल्पाद्भावलक्षणे षष्ठी । इत्थम्पृथासुतैः कौन्तेयैः पितरमेतेषां न वेद्मीति भावः । अस्य कृष्णस्य वनशुनोवनशुनकस्येव अम्बुकस्येवेति यावत् अपचितिः पूजा अजनि जनिता कृतेति यत् । अनेर्ण्यन्तात्कर्मणि लुङ् । एष भवतां परिभावः परिभवः । परौ भुवोऽवज्ञाने इति विभाषया घञ्प्रत्ययः ॥ २४ ॥

अवधीज्जनङ्गमइवैष
यदि हतवृषो वृषन्ननु ।
स्पर्शमशुचिवपुरर्हति न
प्रतिमाननान्तु नितरान्नृपोचिताम् ॥ २५ ॥
यदि नाङ्गनेति मतिरस्य
मृदुरजनि पूतनाम्प्रति ।
स्तन्यमघृणमनसः पिबतः
किल धर्म्मतोभवति सा जनन्यपि ॥ २६ ॥

अवधीदिति । हतवृषो हतसुकृतः । सुकृतं वृषभे वृषे इति विश्वः । एष कृष्णो जनङ्गमश्चाण्डाल इव । चाण्डालप्लवमातङ्गदिवाकीर्त्तिजनङ्गमा इत्यमरः । गमश्चेति संज्ञायां जनपूर्वाद्गम धातोः खच्प्रत्ययः अरुर्द्विषदित्यादिना मुमागमः । वृषं वृषभरूपिणं अरिष्टाख्यमसुरमवधीद्यदि हतवांश्चेत् । लुङि चेति हनो वधादेशः । अत एव अशुचिवपुरशुद्धात्मा स्पर्शमर्हति । नृपोचितां राजार्हां प्रतिमाननां पूजां तु नितरां नार्हति स्पर्शायोग्योऽयं कथं पूज्य इत्यर्थः । उपमा ॥ २५ ॥

यदीति । अस्य कृष्णस्य मतिः पूतनानाम बालग्रहविशेषः तां प्रति अङ्गनाइति हेतोर्मृदुः कृपा दया नाजनि यदि न जाता चेत् माऽस्त्विति शेषः । जनेः कर्त्तरि लुङ् दीपजनेत्यादिना चिण्प्रत्ययः । अघृणमनसो निर्घृणचित्तस्य । स्तनेभवं स्तन्यं पयः । शरीरावयवाच्चेति यत्प्रत्ययः । पिबतोऽस्य सा पूतना धर्म्मतः शास्त्रतो जनन्यपि माता च भवति खलु स्त्रीति कृपाऽभावेऽपि मातेति जुगुप्साप्यस्य नासीत्यहो न केवलं स्त्रीहन्ता किं तु मातृहन्ता चायं स्तनप्रदायाः

शकटव्युदासतरुभङ्ग
धरणिधरधारणादिकम् ।
कर्म्म यदयमकरोत्तरलः
स्थिरचेतसां क इव तेन विस्मयः ॥ ३७ ॥

अयमुग्रसेनतनयस्य
नृपशुरपरः पशूनवन् ।
स्वामिवधमसुकरं पुरुषैः
कुरुते स्म यत्परममेतदद्भुतम् ॥ ३८ ॥

उपमाहत्वादिति भावः । अत्र स्तनपानस्य विशेषणगत्या जननीत्व हेतुत्वात्काव्यलिङ्गम् ॥ ३६ ॥

शकटेति । तरलश्चपलोऽयं कृष्णः शकटव्युदासः शकटासुरमर्द्दनं तरुभङ्गो यमलार्जुनभञ्जनं धरणिधरधारणं गोवर्द्धनोद्धरणमान्यादिर्यस्य तत्तथोक्तं यत्कर्म्म अकरोत् । तेन कर्म्मणा स्थिरचेतसां धीरचित्तानां क इव विस्मयो न कोऽपीत्यर्थः । अत्र स्थिरचेतस्कतायाः विशेषणगत्या विस्मयनिषेधहेतुत्वात्काव्यलिङ्गं वृत्त्यनुप्रासेन संसृज्यते ॥ ३७ ॥

अयमिति । अपरोऽन्यः ना पशुरिवेति नृपशुरित्युपमित समासः । कार्य्याकार्य्यविवेकशून्यत्वादेवेत्यर्थः । अयं कृष्णः । उग्रसेनतनयस्य कंसस्य पशून् अवन् गाः पालयन् पुरुषैरसुकरं लोकवेदविगीतत्वात् दुष्करं स्वामिवधं यत् कुरुते स्म चकारेति यावत् । एतत्परममद्भुतं अभूतपूर्व्वादिति भावः । अत्र पश्ववनस्य विशेषणगत्या कंसकृष्णयोः स्वामिभृत्यभावहेतुत्वात्काव्यलिङ्गम् ॥ ३८ ॥

॥ एते प्रक्षिप्ताः ॥

ननु सर्व्व एव समवेक्ष्य कमपि गुणमेति पूज्यताम्।
सर्व्वगुणविरहितस्य हरेः परिपूजया कुरुनरेन्द्र कोगुणः ॥ १ ॥
न महानयन्न च बिभर्त्ति गुणवसमतथाप्रधानताम्।
स्वस्य कथयति चिराय पृथग्जनता जगत्यनभिमानतान्धवत् ॥२॥
रहितस्तुलाभिरखिलाभिरहतरसभावसंविदम्।
क्षेत्रविदमुपदिशन्ति जनाः पुरजाग्रमेनमगतं विदग्धताम् ॥ ३ ॥
अतिभूयसापि सुकृतेन दुरुपचरएष गृह्यते।
भक्तिशुचिभिरुपचारपरैरपि न गृहीतुमभियोगिभिर्नृभिः ॥४॥
व्रजति स्वतामनुचितोऽपि सविनयमुपाचितोजनैः।
नित्यमपरिचितश्चित्ततयापरएव सर्व्वजगतस्तथाप्ययम् ॥ ५ ॥
उपकारिणन्निरुपकारमनरिमरिमप्रियम्प्रियम्।
साधुमितरमबुधम्बुधमित्यविशेषतः सततमेष पश्यति ॥ ६ ॥
उपकारकस्य दधतोऽपि बहुगुणतया प्रधानताम्।
दुःखमनिशमयमाश्रवतोन परस्य किञ्चिदुपकर्त्तुमिच्छति ॥ ७ ॥
स्वयमक्रियः कुटिलमेष क्षणमपि विधातुमक्षमः।
भोक्तुमविरतमलज्जतया फलमीहते परकृतस्य कर्म्मणः ॥ ८ ॥
यदमं समाश्रयति कश्चिदुदयविपदोर्निराकुलम्।
तस्य भवति जगतीह कुतः पुनरद्भवोविकरणत्वमीयुषः ॥ ९ ॥
गुणवन्तमप्ययमपास्य जनमखिलमव्यवस्थितैः।
याति सुचिरमतिशायतया धृतिमेकएव परिवारितोजनैः ॥१०॥
सुकृतोऽपि सेवकजनस्य बहुदिवसखिन्नचेतसः।
सर्व्वजनविहितनिर्विदयं सकृदेव दर्शनमुपैति कस्यचित् ॥ ११ ॥
स्वजने च खिन्नमनुगतेषु नियतमनुरागवत्स्वपि।
खेदमक्षदुरुदयः सपदि निरपेक्षएष समुपैति निर्वृतिम् ॥ १२ ॥

क्षणमेष राजसतयैव जगदुदयदर्शितात्मकः।
सर्वहितकृतमतिः सहसा तमसा विनाशयति सर्वमावृतः ॥१३॥
अभिहन्यते यदभिहन्ति परितपति यश्च तप्यते।
नास्य भवति वचनीयमिदं स्वपलात्मिका प्रकृतिरेव हीदृशी ॥१४॥
अतिसत्त्वयुक् इति पुम्भिरयमतिशयेन वर्ण्यते।
सूक्ष्ममतिभिरथ चापगते समुपैति नाल्पमपि सत्त्वसङ्करम् ॥१५॥
प्रलयप्यस्य महतोऽपि नियतमिह निःसुखे गुणाः।
यान्ति जगदपि सदोषमदः स्वचैव पश्यति गुणान् द्विषन्नयम्
॥ १६ ॥
क्षितिपीठमम्भसि निमग्नमुदहरत यः परः पुमान्।
एष किल स इति कैरबुधैरभिधीयमानमपि तत्प्रतीयते ॥ १७ ॥
नरसिंहमूर्त्तिरयमेव दितिसुतमदारयन्नखैः।
आप्तजनवचनमेतदपि प्रतिपत्तुमोमिति जनोऽयमर्हति ॥ १८ ॥
अपहाय तुङ्गमपि मानमुचितमवलम्ब्य नीचताम्।
स्वार्थकरणपटुरेष पुरा बलिना परेण सह संप्रयुज्यते ॥ १९ ॥
भ्रमते नभोऽरभसयैव विरचयति विश्वरूपताम्।
सर्वमतिशयगतङ्कुरुते स्फुटमिन्द्रजालमिदमेष मायया ॥ २० ॥
किल रावणादिरयमेव किमिदमियदेव मिथ्यते।
बलमधिबलमधिद्युति यत्तदमेवमेव इति धृष्टमुच्यताम् ॥२१॥
चलतैष पादयुगलेन गुरुशकटमोपदत्पुरा।
दैवकलितमयवोदलसहलितोरुभाण्डचयमात्मनैव तत् ॥२२॥
श्रुणवतामुना स्तनयुगेन जनितजननीजनादरा।
स्त्रीति सदयमविधाय मनसादकारि साधु यदघाति पूतना ॥२३॥
अभिनत्तदूकथमिवैष शतधरशिरिकूणः बलात्।
वाढमिदमपि न बालहनु देवताविधिरयं विजृम्भते ॥ २४ ॥

विहरन्वने विजनएव महति दधदेष गोपताम् ।
नाम जगति मधुसूदनइत्यनमस्कृतेन मधुना महीयसा ॥ २५ ॥
अनडुह्य गोवधसमुत्थमघमयममीमरद्दृषा ।
रिष्टमुपगु समुपोढमदं यदसौ किलासुरइति प्रमार्ष्टि तत् ॥२६॥
मुखकन्दरान्तरगतोऽपि विकटदशनेन केशिना ।
नास्य सपदि यदखादि भुजस्तदहो तिरश्चि सहजैव मूढता ॥२७॥
किमिवात्र चित्रमयमश्ममयमचलमप्रकल्पितं यदि ।
प्राप निखिलमखिलेऽपि जगत्युदरस्थिते वकभुजोऽस्य न व्यथा
॥ २८ ॥
यदुदस्य वाङ्मयमेकमधृत गिरिमद्भुतश्च तत् ।
भूरिसलिलमविषह्यमियच्छलदे विमुञ्चति गवां सभाग्यता ॥२८॥
अमुना करेण पृथुदन्तमुसलमुदखानि दन्तिनः ।
तेन यदवधि स एव पुनर्बलशालिनाद्भुत इव तत्र विस्मयः ॥ ३० ॥
शिशुरेव शिथिलनियुद्धकरणमकृतक्रियः स्वयम् ।
मल्लमलघुकठिनांसतटं न्यवधीद्यदेष तदहृद्यकारितम् ॥ ३१ ॥
यद्युध्यमानमपि सन्तमुपहितसुरौघबाधनम् ।
कंसमभयमयमभ्यभवत्समुदा जनेन तदपि प्रशस्यते ॥ ३२ ॥
इति निह्नुतश्रुतधियापि वचनममनायदादरे ।
श्रोतुमनिशमुषितस्य परैः स्तुतिरेव सा मधुनिघातिनोऽभवत्
॥ ३३ ॥
अश्रुवाच दुष्टमतिरेव परिविवदिषुर्मुरद्विषम् ।
श्रुतमपि सदसि चेदिपतेस्तदनोऽपराधगणनामगाद्वचः ॥३४॥

इति वाचमुद्धतमुदीर्य
सपदि सह वेणुदारिणा ।
सोढरिपुबलभरोऽसहनः
स जहास दत्तकरतालमुच्चकैः ॥ ३९ ॥

कटुनापि चैद्यवचनेन
विकृतिमगमन्न माधवः ।
सत्यनियतवचसं वचसा
सुजनं जनाश्चलयितुं क ईशते ॥ ४० ॥

इतीति । सोढः क्षान्तो रिपूणां बलभरो वीर्यातिशयो येन सः न सहत इति असहनः असहिष्णुः स चैद्यः इतीत्थं उद्धतं निष्ठुरं यथा तथा वाचं उदीर्य सपदि वेणुदारिणा नरकात्मजेन सह दत्तः करतालः परस्परपाणिताडनं यस्मिन् कर्मणि तद्यथा तथा उच्चकैस्तारं जहास । कृष्णदोषोद्घाटनहर्षाद्धासं चकारे त्यर्थः । स्वभावोक्तिः ॥ ३९ ॥

कटुनेति । माधवः कटुनापि चैद्यवचनेन विकृतिं नागमत् । गमेर्लुङि पुषादित्वाच्च्लेरङादेशः । तथा हि सत्ये नियतवचसं अस्खलितवचसं सत्यसन्धं सुजनं के जनाः वचसा तीव्रेणापीति भावः । चलयितुमीशते प्रभवन्ति न केऽपीत्यर्थः । यद्धिष्ये शतमागांसीति प्रतिज्ञाभङ्गभयादसहतेति भावः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ४० ॥

न चेति । क्षिपेति चार्थः । तदा तत्काले इतीत्थं शपमान माक्रोशन्तमपि । शपतेराक्रोश इति भट्टमल्लः । तं चैद्यं ।

न च तं तदेति शपमान
मपि यदुनृपाः प्रचुक्रुधुः ।
शौरिसमयनिगृहीतधियः
प्रभुचित्तमेव हि जनोऽनुवर्त्तते ॥ ४१ ॥
विहितागसो मुहुरलङ्घ्य
निजवचनदामसंयतः ।
तस्य कतिथ इति तत्प्रथमं
मनसा समाख्यदपराधमच्युतः ॥ ४२ ॥

यदुनृपाः यादवाः शौरेः कृष्णस्य समयेन सङ्केतेन निगृहीत धियो निरुद्धबुद्धयः सन्तो न प्रचुक्रुधुः । क्रुधद्रुहोरुपसृष्टयोः कर्मेति कर्मत्वं । तथाहि जनो लोकः प्रभुचित्तमेव अनुवर्त्तते । शौरिसङ्केतनिरुद्धबुद्धेर्यदुविशेषणगत्या क्रोधाभावहेतुत्वात् काव्यलिङ्गमर्थान्तरन्यासेन संकीर्य्यते ॥ ४१ ॥

विहितेति । अलङ्घ्येन निजवचनदाम्ना स्वप्रतिज्ञापाशेन संयतो बद्धोऽच्युतः मुहुर्विहितागसः पूर्व्वं बहुशः कृतापराधस्यापि तस्य चैद्यस्यापराधं स एव प्रथमो यस्मिन् कर्मणि तत्प्रथमं यथा तथा कतिथः । कतीनां पूरण इति तस्य पूरणे डडिति डट् प्रत्ययः षट्कतिकतिपयचतुरां थुगिति थुगागमः । मनसा समाख्यत् गणनां चकार । अस्यतिवक्तिख्यातिभ्योऽङिति च्लेरङादेशः । अत्र प्रतिज्ञापाशबन्धनस्य विशेषणगत्या प्राचीनापराधानन्त्येऽपि तात्कालिकापराधगणनाहेतुत्वात्काव्यलिङ्गभेदः ॥ ४२ ॥

स्मृतिवर्त्म तस्य न समस्त
मपकृतमियाय विद्विषः ।
स्मर्तुमधिगतगुणस्मरणाः
पटवो न दोषमखिलं खलूत्तमाः ॥ ४३ ॥
नृपतावधिक्षिपति शौरि
मथ सुरसरित्सुतो वचः ।
स्माह चलयति भुवं मरुति
क्षुभितस्य नादमनुकुर्वदम्बुधेः ॥ ४४ ॥

स्मृतीति । विद्विषश्चैद्यस्य सम्बन्धि समस्तमपकृतमपकारजातं । नपुंसके भावे क्तः । तस्य हरेः कृष्णस्य स्मृतिपथं नेयाय न प्राप । न तमपकारं सस्मारेत्यर्थः । अर्थान्तरं न्यस्यति । अधिगतगुणस्मरणाः परिचितोपकारस्मृतयः उत्तमाः सज्जनाः अखिलं दोषमपकारं स्मर्तुं न पटवः खलु नालमसमर्था इत्यर्थः । पर्याप्तिवचनेष्वलमर्थेष्विति तुमुन्प्रत्ययः । उपकारमेव स्मरन्ति साधवो नापकारमित्यर्थः ॥ ४३ ॥

नृपताविति । अथ नृपतौ चेदिपे शौरिं हरिं अधिक्षिपति सति सुरसरित्सुतो भीष्मः मरुति प्रलयमारुते भुवं चलयति कम्पयति सति क्षुभितस्योद्वेलस्याम्बुधेर्नादमनुकुर्वत्तद्वद्गम्भीरं वचः स्माह स्म उवाच । लटः स्मेति भूतार्थे लट् ब्रुवः पञ्चानामादित आहो ब्रुव इति ब्रुव आहादेशः । यद्यपि न पादादौ स्माद्यः स्युरिति वामनः तथापि कविप्रौढ्या स्मशब्दस्य पादादौ प्रयोगः । उपमालङ्कारः ॥ ४४ ॥

अथ गौरवेण परिवाद
मपरिगणय्य स्वमात्मनः ।
प्राह मुररिपुतिरस्कृति
क्षुभितः स्म वाचमिति आङ्गवीसुतः ॥४५॥
विहितम्मयाद्य सदसीद
मपमृषितमच्युतार्च्चनम् ।
यस्य नमयतु स चापमयं
चरणः कृतः शिरसि सर्व्वभूभृताम् ॥४६॥

उक्तमेवार्थं वक्तुराशयाविष्कारार्थमाह । अथेति । अथ शिशु पालप्रलापानन्तरं मुररिपुतिरस्कारणेन हरिनिन्दया क्षुभितः कलुषमनाः आङ्गवीसुतो गाङ्गेयः गौरवेण धैर्य्येण समात्मनः परिवादं कामममयं वृथापलितइत्यादि स्वनिन्दामपरि गणय्य इति वक्ष्यमाणप्रकारेण वाचं प्राह स्म प्रोक्तवान् गतमेतत् । धीराः स्वनिन्दामेव सहन्ते न गुरुदेवादिनिन्दामिति भावः । अत्र क्षोभस्य विशेषणगत्या वचनहेतुत्वात् काव्यलिङ्गभेदः ॥ ४५ ॥

विहितमिति । मया अद्य सदसि सभायां विहितं कृतं इदं अच्यु तार्च्चनं यस्यापमृषितमतितिक्षितमसोढमित्यर्थः । मृष तिति क्षायामिति धातोः कर्म्मणि क्तः उपसर्गवशाद्विपरीतार्थता । अतएव मृष तितिक्षायामेव किन्नियेधादतितिक्षार्थत्वाच्च गुणः मतिबुद्धिपूजार्थेभ्यश्चेति चकाराद्वर्त्तमानार्थता अस्य च वर्त्तमाने इति षष्ठी । सोऽपमृष्टा पुरुषश्चापं नमयतु आरोपयतु अयं

इति भीष्मभाषितवचोऽर्थ
मधिगतवतामिव क्षणात् ।
क्षोभमगमदतिमात्रमथो
शिशुपालपक्षपृथिवीभृतां गणः ॥ ४७ ॥
शितितारकानुमितताम्र
नयनमरुणीकृतं क्रुधा ।
बाणवदनमुदद्दीपि भिये
जगतः सकीलमिव सूर्यमण्डलम् ॥ ४८ ॥

मूढतां शिथतामिति भावः। शिरःस्थपदचरणः कृतः न्यस्तः। अथ मिति भङ्गे पात्यमानस्य चरणस्य वचनेन निर्देशः। अयं कोपामर्ष इत्यनुसन्धेयम् ॥ ४६ ॥

इतीति । इतीत्थं भीष्मेण भाषितस्योक्तस्य वचसोऽर्थमभिधेयं शिरसि पादन्यासरूपं क्षणात् अधिगतवतां प्राप्तवतामिव स्थितानामित्यर्थः शिशुपालस्य पक्ष्ये पृथिवीभृतो राजानः तेषामसौ गणोऽतिमात्रं क्षोभं क्रोधं विकारमगमत् । एतेनैषां आत्मविनाशावमायो रौद्रस्थायी क्रोधः प्रादुरभूदित्युक्तम् । उत्प्रेक्षा ॥ ४७ ॥

अथैषां दशभिर्गात्रारम्भान् क्रोधानुभावानाह । शितीत्यादि । क्रुधा क्रोधेन अरुणीकृतमत एव शिती श्यामे ये तारके कनीनिके ताभ्यां अनुमिते अनुमापिते ताम्रे नयने यस्य तत् । तारका कृष्णः कनीनिकेत्यमरः । सर्वमुखस्य रक्तत्वादिति भावः । बाणो नृपस्तस्य वदनं । सकीलं कीलाकारच्छायासहितं परिधियुक्तमिति यावत् ।

प्रविदारितारुणतरोग्र
नयनकुसुमोज्ज्वलः स्फुरन्।
प्रातरहिमकरताम्रतनु
र्विषजद्रुमोऽपर इवाभवद्द्रुमः ॥ ४९ ॥
अनिशान्तवैरदहनेन
विरचितवनान्तरार्द्रताम्।
कोपमरुदभिहतेन भृशं
नरकात्मजेन तरुणेव जज्वले ॥ ५० ॥

सूर्यमण्डलमिव जगतामिव भयाय उददीपि प्रजज्वाल। दीप्यतेः कर्त्तरि लुङीति दीपजनेत्यादिना चिण्प्रत्यये तलुक्। अत्र नयनयोः स्वभावव्यत्यासेनारुणस्वीकारात्तद्रूपः तस्यापेक्षत्वा दौत्पातिकसूर्यमण्डलोपमासङ्करः ॥ ४८ ॥

प्रवीति। प्रविदारिते अतिविकासिते अरुणतरे क्रोधादतिरक्ततरे अतएवोग्रे भयङ्करे ये नयने ते एव कुसुमे ताभ्यामुज्ज्वलो दीप्तः स्फुरन् स्वतेजसा दीप्यमानः प्रातरहिमकरताम्रतनुः प्रभातार्कारुणविग्रहः अयं द्रुमो द्रुमाख्यो नृपः अपरो विषजद्रुम इवाभवत् इत्युत्प्रेक्षा रूपकसङ्कीर्णा ॥ ४९ ॥

अनिशान्तेति। अनिशान्तोऽनिर्वाणो वैरदहनो विरोधाग्निर्यस्य तेन अतएवान्तरभ्यन्तरे आर्द्रतां सारस्यं विरचितवता त्यजता। रचयतेः क्तवतुप्रत्ययः। कोपो मरुदिव तेनाभिहतः प्रज्वलितः तेन नरकात्मजेन वेणुदारिणा नाम्ना तरुणेव भृशं जज्वले ज्वलितम्। भावे लिट्। उपमालङ्कारः ॥ ५० ॥

अभिधित्सतः किमपि राजु
वदनविकृतं व्यभाव्यत ।
ग्रस्तशशधरमिवोपलस
च्छिन्नदन्तपङ्क्ति मुखमुत्तमौजसः ॥ ५१ ॥
कुपिताकृतिप्रथममेव
हसितमशनैरबूचयत् ।
क्रुद्धमशनिदलिताद्रितट
ध्वनि दन्तवक्त्रमरिचक्रभीषणम् ॥ ५२ ॥

अभीति । किमप्यभिधित्सतोऽभिधातुमिच्छतः । दधातेः सन्नन्तात्शतृ इत्यादेशः । उत्तमौजसो नाम राज्ञः सम्बन्धि राज्ञो वदनविकृतं व्यात्तत्वादाकृतविकृतवत् करालं उपलक्षन्तो लक्ष्यमाणा छिता दन्तपङ्क्तिर्यस्य तन्मुखं ग्रस्तशशधरमिव चन्द्रग्रस्तचन्द्रमिव व्यभाव्यतातर्क्यत । इत्युत्प्रेक्षा ॥ ५१ ॥

कुपितेति । प्रथमं प्रागेवाकुपितावस्थायामपीत्यर्थः । कुपितस्येवाकृतिर्मुखरागोयस्येत्युपमा । अरिचक्रभीषणं परबलभयङ्करं दन्तवक्त्रं दन्तवक्त्रनामानं राजानं । अशनिदलितस्य वज्राहतस्याद्रितटस्य ध्वनिरिव ध्वनिर्यस्य तदित्युपमा । न शनैरशनैः उच्चैर्हसितमट्टहासः क्रुद्धमसूचयत् । सर्वदा मुखरागस्य त्रिभिन्नरणादनुभावात्कोपतः क्रुद्धमित्यर्थः । अत्र कोपस्याजकस्याऽप्यसम्बन्धोक्तेरतिशयोक्तिरुपमासङ्कीर्णा ॥ ५२ ॥

प्रतिघ इति । प्रतिघः कोपः । कोपक्रोधामर्षरोषप्रतिघा इत्यमरः । कुतोऽपि समुपेत्यागतस्य मरपतिमर्षं रावमरूपं यथा

प्रतिघः कुतोऽपि समुपेत्य
नरपतिगणं समाश्रयत् ।
यामिहरणजनितोऽनुशयः
समुदाचचार निज एव रुक्मिणः ॥ ५३ ॥
चरणेन हन्ति सुबलः स्म
शिथिलितमहीध्रबन्धनाम् ।
नीरतरलजलराशिजला
मवभुग्नभोगिफणमण्डलाम्भुवम् ॥ ५४ ॥

श्रयत् समाविशत् । रुक्मिणस्तु यामिः स्वसा । यामिः स्वसृकुल स्त्रियोरित्यमरः । तस्या रुक्मिण्या हरणेन जनितोऽनुशयो द्वेष्टमा पत्नं कदा निर्यातयामीति अनुतापोऽयस्मिन्सः । अथानुशयो दीर्घद्वेषानुतापयोरित्यमरः । निजो नित्य एव प्रतिघः । निजमा त्मीयं नित्ययोरिति विश्वः । समुदाचचार समुद्दिदीपे । भीष्मवाक्य मन्येषां कोपोत्पादकमासीत् रुक्मिणस्तु प्रागेवावरुद्धकोपस्योद्दीप कमासीदित्यर्थः । अत्रानुशयस्य विशेषणगत्या कोपोद्दीपनहेतु त्वात्काव्यलिङ्गभेदः ॥ ५३ ॥

चरणेनेति । सुबलो नाम राजा महीं धारयन्तीति महीध्राः पर्वताः । कप्रकरणे मूलविभुजादिभ्य उपसंख्यानमिति कप्रत्ययः । शिथिलितानि विश्लेषितानि महीध्राणां बन्धनानि बन्धा यस्यास्तां । नीरेव तरलानि भूकम्पाच्चलितानि जलराशेरम्बुधे र्जलानि यस्यास्तां । अवभुग्नं कुटिलं अतिभारादित्यर्थः भोगिनां फणिनां फणमण्डलं फणसमूहो यस्यास्तां भुवं चरणेन हन्ति स्म

कुपितेषु राजसु तथापि
रथचरणपाणिपूजया।
चित्तकलितकलहागमनो
मुदमाहुकिः सुहृदिवाधिकान्दधौ ॥५५॥
गुरुकोपरुद्धपदमाप
दसितयवनस्य रौद्रताम्।
व्यात्तमशितुमिव सर्व्वजग
द्विकरालमास्यकुहरं विवक्षतः ॥ ५६ ॥

जघान । लट् स्मेति भूतार्थे लट्। अत्र पादाघाताद्भुवः कम्पासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः ॥ ५४ ॥

कुपितेष्विति । रथचरणपाणेश्चक्रपाणेः पूजया राजसु तथा कुपितेष्वपि चित्ते कलितं निश्चितं कलहागमनं युद्धलाभो येन सः आहुकिः आहुकिर्नाम राजा शोभनं हृदयं यस्य स सुहृत् मित्रमिव कृष्णपक्षपातीत्यर्थः । सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातः। अधिकां मुदं सन्तोषं धृतवान्। सुदुःसहोऽपि कृष्णोत्कर्षः कलहकण्डूलत्वादाहुकेर्मोदहेतुरासीदित्यर्थः । उपमालङ्कारः ॥ ५५ ॥

गुर्विति। विवक्षतः किमपि वक्तुमिच्छतः। वचेः सन्नन्ताल्लटः शत्रादेशः । असितयवनस्य कालयवनस्य राज्ञः सम्बन्धि सर्व्वजगदशितुमत्तुमिव व्यात्तं विवृतं अतएव विकरालं अतिविकृतं। करालो दन्तुरे तुङ्गे विशाले विकृतेऽपि चेति वैजयन्ती । गुरुणा कोपेन रुद्धपदं प्रतिबद्धवचनं आस्यकुहरं वक्त्रविवरं रौद्रता

विवृतोरुबाहुपरिघेण
सरभसपदन्निधित्सुना ।
हन्तुमखिलनृपतीन्वसुना
वसने विलम्बिनि निजे विचस्खले ॥ ५७ ॥
इति तत्तदा विकृतरूप
मभजत्तदभिन्नचेतसम् ।
मारबलमिव भयङ्करतां
हरिबोधिसत्त्वमभि राजमण्डलम् ॥ ५८ ॥

भयङ्करतामापत् । अचालिषुरिवेति फलांशेन व्यादानक्रिया निमित्ता ॥ ५६ ॥

विवृतेति । अखिलनृपतीन् हन्तुं विवृतः प्रसारित ऊरुबाहुरेव परिघमायुधविशेषो येन तेन । परिघः प्रतिघातेऽस्त्रीति हेमः । सरभसं सत्वरं यत्पदं तन्निधित्सुना निधातुमिच्छता । दधातेः सन्नन्तादुः प्रत्ययः । वसुना तन्नाम्ना राज्ञा विलम्बिनि उत्पातवेगात् विसंसिनि निजे वसने स्वाम्बरे विचस्खले स्खलितं तच्चास्य दुर्निमित्तमिति भावः । भावे लिट् । अत्र वसनस्खलनस्य विशेषणगत्या स्खलनहेतुत्वात्काव्यलिङ्गं तद्बाहुपरिघेति रूपकेण संसृज्यते ॥ ५७ ॥

इतीति । इतीत्थं तदा तस्मिन् काले विकृतरूपं रोषभीषणाकारं तद्राजमण्डलं मारबलमिव मदनसैन्यमिव । मदनो मन्मथो मार इत्यमरः । अभिन्नचेतसमविकृतचित्तं बोधिसत्त्वो बुद्धः । बुद्धस्तु श्रमणः शाक्यो बोधिसत्त्वो विनायक इति वैजयन्ती । स हरि

रभसादुदस्थुरथ रङ्ग
मनुचितभियोऽभिलाषुकाः।
सान्द्रमुकुटकिरणोच्छलित
स्फटिकांशवः सदसि मेदिनीभृतः ॥५८॥

रिवेत्युपमितसमासः। तं हरिबोधिसत्त्वमभि तत्समचमित्यर्थः। अभिरभागे इत्यभेः कर्म्मप्रवचनीयत्वात्तद्योगे द्वितीया। भय ङ्करोतीति भयङ्करः। मेघर्त्तिभयेषु कृञः इति खच्प्रत्यये मुमागमः। तस्य भावस्तत्तामभजत्। उपमालङ्कारः। तेन भगवतोबुद्धस्य समाधिभङ्गाय प्रवृत्तं मारबलं यथा तेन भग्नं तथा राजमण्डल मपि हरिणा भज्यतइति वस्तु व्यज्यते ॥ ५८ ॥

रभसादिति। अथानन्तरं अनुचितभियोऽनभ्यस्तसाध्वसाः। अभ्यस्तेऽप्युचितमिति यादवः। अतएव युद्धमभिलाषुकाः युद्धार्थिनः। लषपतेत्यादिना उकञ् प्रत्यये न लोकेत्यादिना षष्ठी प्रतिषेधः। सदसि मेदिनीभृतः सदसि स्थिताः चैद्यपक्षीयाराजानः। सान्द्रैर्मुकुटकिरणैरुच्छलिताः स्फटिकांशवः सभाभित्तिस्फटिकमणि मयूखाः यैस्ते तथोक्ताः सन्तोरभसाद्वेगात् उदस्थुरुत्थिताः। उदोऽनूर्द्धकर्म्मणीत्यस्य प्रत्युदाहरणमेतत्। अत्र युद्धाभिलाषुकस्य विशेषणगत्योत्थानहेतुत्वात्काव्यलिङ्गभेदः ॥ ५८ ॥

स्फुरमाणेति। स्फुरमाणानि नेत्राण्येव कुसुमान्योष्ठाएव दलानि च यस्मिन् कर्म्मणि तद्यथा तथा धूताः कम्पिताः पृथवोभुजाएव लताः शाखायस्मिन् कर्म्मणि तत् यथा तथा चलितैः भूभृतो राजानस्तएव अङ्घ्रिपाः पादपास्तैः सदः सभामण्डपं इतः शोभा

स्फुरमाणनेत्रकुसुमोष्ठ
दलमभृत भूभृदङ्घ्रिपैः ।
धूतपृथुभुजलतश्चलितै
र्द्रुतवातपातवनविभ्रमं सदः ॥ ६० ॥
हरिमप्यमंसत तृणाय
कुरुपतिमजीगणन्न वा ।
मानतुलितभुवनत्रितयाः
सरितः सुतादविभयुर्न भूभृतः ॥ ६१ ॥

वातपातो वायुप्रचारो यस्य तस्य वनस्य विभ्रमं शोभां । विभ्रमः संशये भ्रान्तौ शोभायां चेति वैजयन्ती । अभृत बभार । भृञो लुङि तङ् उश्चेति सिचः कित्त्वाद्गुणाभावः ह्रस्वादङ्गादिति सलोपः । अत्र वनविभ्रममिति सादृश्याक्षेपादसम्भवद्वस्तुसम्बन्धा निदर्शना नेत्रकुसुमेत्यादिरूपकोत्थापितेति सङ्करः ॥ ६० ॥

हरिमिति । मानतुलितभुवनत्रितया अहङ्कारात् धारितजगत्त्रयाः भूभृतश्चैद्यपक्षा राजानः । हरिमपि तृणायामंसत तृणसमममन्यन्त । तथा लघुं मेनिरे इति अनादरोक्तिः । मन्यतेः कर्त्तरि लुङि च्लेः सिच् अनुदात्तत्वादिट्प्रतिषेधः मन्यकर्मणि इति चतुर्थी । कुरुपतिं च नाजीगणन्न धर्मराजं गणयन्ति स्मेत्यर्थः । गणेर्णौ चङि ई च गणः इत्यभ्यासस्येकारः । सरितः सुताद्भीष्मादपि नाबिभयुर्न भीताः । बिभीतेर्लङि श्लाविति द्विर्भावे सिजभ्यस्तविदिभ्यश्चेति झेर्जुसादेशः जुसि चेति गुणः ।

गुरु निश्वसन्नथ विलोल
सदवथुवपुर्वचोविषम् ।
कीर्णदहनकिरणाग्निकणः
फणवानिवैष विससर्ज चेदिपः ॥ ६२ ॥
किमहो नृपाः सममभीभि
रुपपतिसुतैर्न पञ्चभिः ।
बध्यमभिहत भुजिष्यममुं
सह चानया स्थविरराजकन्यया ॥ ६३ ॥

अत्र राजसु दर्थ्यमानाद्यनेकक्रियायोगपद्यात्समुच्चयः इति सर्वस्व कारः ॥ ६१ ॥

गुर्विति । अथैष चेदिपः फणवान् फणीव । गुर्वधिकं निश्वसन् फूत्कुर्वन् विलोलं सदवथु ससन्तापं । सन्तापोदवथुरित्यनेकार्थो दिति सज्जनः । तदपुर्यस्य स विलोलसदवथुवपुः । द्वितोऽथुच् । कीर्णाविक्षिप्तादहनकिरणाअग्निकणाइव यस्य सः तथ सन् वचो विषमिव तद्वचोविषं विससर्ज विषप्रायं वचउज्जगारेत्यर्थः । अतः फणवानिवेति व्यस्तोपमालिङ्गात्सर्वोपमितसमासाश्रयणम् ॥ ६२ ॥

अथैतद्वचोविषमेव चतुर्भिराह । किमित्यादि । हे नृपाः अमीभिः पञ्चभिरुपपतिसुतैः समं जारजैः सह पाण्डवानां चेत्र जत्वादित्थं प्रलापः । अनया स्थविरराजकन्यया चत्रियाकुन्तया च सह । कन्या कुमारिकानार्योरिति विश्वः । भीष्मस्योर्द्धरेत स्कत्वेन निन्दा । बध्यवधार्हं अराज्ञोराजार्हणग्रहणापराध।

अथवाध्वमेव खलु यूय
मगणितमरुद्गणौजसः।
वस्तु कियदिदमयन्न मृधे
मम केवलस्य मुखमीक्षितुं क्षमः ॥ ६४ ॥

दिति भावः। अराजत्वं व्यनक्ति। अमुं भुजिष्यं किङ्करं कंसपराङ्पा
लनादिति भावः। भुजिष्यः किङ्करो मत इति हलायुधः। किं
नाभिहत किमिति न मारयत किन्तु अभिहतेत्यर्थः। हन्तेर्ब
धार्थे लोट् लोटो लङ्वदिति थस्य तादेशः अनुदात्तोपदेशेत्या
दिनानुनासिकलोपः। अहो अतिवध्योऽपि न हन्यत इत्या
श्चर्य्यं। अत्रामर्षानुभावो वागारम्भः। क्रोधः कृतापराधेषु
स्थिरोऽमर्ष इतीर्य्यते ॥ ६३ ॥

अथवेति। अथवा अगणितमरुद्गणौजसः अवधीरितसुर
सङ्घसत्त्वाः यूयमाध्वमेव तूष्णीं तिष्ठतैव खलु। आसेर्लोटि
धि चेति सकारलोपः। इदं कृष्णहननं कियदस्तु कियत्कार्य्यं
अल्पमित्यर्थः। कुतः अयं कृष्णो मृधे युद्धे। मृधमास्कन्दनं सङ्ख्य
मिति युद्धपर्यायेष्वमरः। केवलस्यैकाकिनो ममैव मुखमीक्षितुं
न क्षमः युष्माकं का वार्त्तेति भावः। एतेनास्य बलगर्व्वोऽद्भ्यते
आत्मनोत्कर्षोऽन्यन्यक्कारो लावण्यविभूतिभिरिति लक्षणात् ॥ ६४ ॥

विदतुरिति। किञ्च नदीजधर्म्मजौ भीष्मयुधिष्ठिरौ। अत्र च
परिषदि सभायां सदि। परिषत् संसदिति विश्वः। यं कृष्णमक्षमं
विदतुर्विदितवन्तावित्यर्थः। विदो लटो वेति तसोऽतुसादेशः। अत्रौ
कृष्णः अधियुद्धं युद्धे। विभक्त्यर्थेऽव्ययीभावः। निकषं निकषणं

विदतुर्यमुत्तममशेष
परिषदि नदीजधर्म्मजौ ।
यातु निकषमधियुद्धमसौ
वचनेन किम्भवतु साध्वसाधु वा ॥ ६५ ॥

अचिरान्मया सह गतस्य
समरमुरगारिलक्ष्मणः ।
तीक्ष्णविशिखमुखपीतमसृक्
पततां गणैः पिबतु सार्द्धमुर्व्वरा ॥ ६६ ॥

परीक्ष्यतामित्यर्थः यातु । ततः साधूत्कर्षोऽसाध्वनुत्कर्षो वा भवतु व्यक्तमस्त्वित्यर्थः । वचनेन किं वृथा वाग्व्ययैरलमित्यर्थः अत्रापि सर्वामर्षौ व्यज्येते ॥ ६५ ॥

अचिरादिति । किञ्च मया सह समरं गतस्योरगारिलक्ष्मणः गरुडध्वजस्य सम्बन्धि तीक्ष्णैर्विशिखमुखैः पीतं मद्बाणोच्छिष्टमित्यर्थः। असृक् रक्तमुर्व्वरा भूमिः । उर्वरा सर्व्वसस्याढ्यभूमौ स्याद्भूमिमात्रक इति विश्वः। पततां गणैः पक्षिसमूहैः । पतत्पत्ररथाण्डजा इत्यमरः। सार्द्धमचिरात् पिबतु। अद्यैवाहमेनं हनिष्यामीत्यर्थः अत्रापि अमर्ष एवेति भावः ॥ ६६ ॥

अभिधायेति । स चेद्य इतीत्थं रूक्षं परुषमभिधाय ततः पृथासुतैः पार्थैरारितामुक्तामनुनयपरां मास्म गमोन गच्छेति वाचं । स्मोत्तरे लङ् चेति चकाराद्गमेराशिषि लुङि पुषादित्वात् च्लेरङादेशः न माङ्योगे इत्यडभावः । अवकर्ण्य वचना

अभिधाय रूक्षमिति मा स्म
गमदिति पृथासुतेरिताम् ।
वाचमनुनयपरां स ततः
सहसावकर्ण्य निरियाय संसदः ॥ ६७ ॥

गृहमागताय कृपया च
कथमपि निसर्गदक्षिणाः ।
क्षान्तिमहितमनसो जननी
स्वसुरात्मजाय चुकुपुर्न पाण्डवाः ॥ ६८ ॥

ईरितां श्रुत्वा सहसा संसदः सदसो निरियाय निर्ययौ अमर्षादिति भावः ॥ ६७ ॥

गृहमिति । निसर्गदक्षिणाः स्वभावतोदाक्षिण्यसम्पन्नाः परच्छन्दानुवर्त्तिन इत्यर्थः । त्रिषु वाक्कुशलावामपरच्छन्दानुवर्त्तिषु दक्षिणा इति वैजयन्ती । किञ्च क्षान्त्या क्षमया महितमनसः पूजितचित्ताः क्षमावन्तः पाण्डवाः किञ्च गृहमागतायाभ्यागतायेत्यर्थः । किञ्च जननीस्वसुर्मातृष्वसुरात्मजाय शिशुपालाय कृपया च कथमपि असह्यापराधेऽपीत्यर्थः न चुकुपुः न चुक्रुधुः । वध्यस्यापि तस्याभ्यागतत्वात् मातृबन्धुत्वात् स्वयं क्षान्तत्वात् दाक्षिण्यात् कृपया च कथमपि जिघांसां न चक्रुरित्यर्थः । क्रुधद्रुहे त्यादिना सम्प्रदानत्वाच्चतुर्थी । अत्राभ्यागतत्वादिविशेषणानां साभिप्रायत्वादकोपहेतुत्वाच्च परिकरः काव्यलिङ्गे सति सापेक्षत्वात्संकीर्य्यते ॥ ६८ ॥

चलितस्ततोऽनभिहतेच्छ
मवनिपतियज्ञभूमितः ।
तूर्णमथ यज्ञमिवानुययु
र्दमघोषसूनुमवनीशसूनवः ॥ ६९ ॥

विशिखान्तराण्यतिपपात
सपदि जवनैः स वाजिभिः ।
द्रष्टुमलघुरभसापतिता
वनिताश्चकार न स कामचेतसः ॥ ७० ॥

चलितमिति । अथ चैद्यनिर्य्याणानन्तरं अवनीशसूनवः तद्गुण राजपुत्रास्ततस्तस्याः अवनिपतेर्युधिष्ठिरस्य यज्ञभूमितो यज्ञ भूमेर्देवयजनात् । पञ्चम्यास्तसिल् । अनभिहतेच्छमप्रतिहतमनो रथं यथा तथा चलितं प्रस्थितं दमघोषसूनुं शिशुपालं । याति परलोकमिति ययुः परलोकप्रापकोऽश्वमेधीयोऽश्वः । ययुरश्वो ऽश्वमेधीयइत्यमरः । योद्धे चेति यातेरौणादिकउक् द्वित्वञ्च । तं ययुमिव तूर्णमनुययुः ययुरपि राजकैराजपुत्रैरन्वीयत । चतुः शतारचन्तीति श्रुतेः अश्वमेधाश्वोपमया चैद्यस्य वध्यत्वं व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ॥ ६९ ॥

विशिखान्तराणीति । स चैद्यः सपदि जवनैर्वेगशालिभिर्वाजिभि रश्वैर्विशिखान्तराणि रथ्यान्तराणि । रथ्या प्रतोली विशिखेत्य मरः । अतिपपात अतिचक्राम । अतएव द्रष्टुमलघुरभसेनाति वेगेनापतिता आधावन्तीर्वनिताः सकामानि साभिलाषाणि चेतांसि चित्तवृत्तयो यासां ताः सकामचेतसः सफलमनोरथाइत्यर्थः ।

क्षणमीक्षितः पथि जनेन
किमिदमिति जल्पता मिथः ।
प्राप्य शिबिरमविशङ्किमनाः
समनीनहद्द्रुतमनीकिनीमसौ ॥ ७१ ॥

त्वरमाणशाङ्खिकसवेग
वदनपवनाभिपूरितः ।
शैलकटकतटभिन्नरवः
प्रणनाद सान्नहनिकोऽस्य वारिजः ॥७२॥

न चकार अतिशीघ्रसन्नहनान्न दर्शनावकाशस्तासामासीदित्यर्थः । अनएत्र वाक्यार्थहेतुकं काव्यलिङ्गम् ॥ ७० ॥

क्षणमिति । असौ चैद्यः पथि किमिदमिति मिथः जल्पता कोऽयमनर्थः संवृत्त इति परस्परमालपता जनेन क्षणमीक्षितः सन् शिबिरं स्वकटकं प्राप्याविशङ्कितमना निःशङ्कचित्तः द्रुतं शीघ्रं अनीकिनीं सेनां समनीनहत् सन्नाहयति स्म । नह्यतेः सम्पूर्व्वकात् णौ लुङि चङ्युपधाया ह्रस्वः अभ्यासदीर्घश्च । शिबिरं शकटमिति केचित् । एतेनास्य रौद्रस्थायिनः कोपस्य प्रकृष्टत्वं वेदितव्यम् ॥ ७१ ॥

त्वरमाणेति । शङ्खः शिल्पमस्येति शाङ्खिकः । तदस्य शिल्पमिति ठक् । त्वरमाणस्य अवमानस्य शाङ्खिकस्य यः सवेगो वदनपवनो मुखमारुतः तेनाभिपूरितः प्रध्मातः शैलानां कटकतटेषु नितम्बप्रदेशेषु भिन्नरवो मूर्च्छितप्रतिध्वनिरस्य चैद्यस्य सम्बन्धि सन्नहनं प्रयोजनमस्येति सान्नहनिको योधानां रणसन्नाहप्रवर्त्तक इत्यर्थः ।

जगदन्तकालसमवेत
विषदविषमेरितारवम् ।
धीरनिजरवविलीनगुरु
प्रतिशब्दमस्य रणतूर्य्यमावधि ॥ ७३ ॥

सहसा ससम्भ्रमविलोल
सकलजनतासमाकुलम् ।
स्थानमगमदथ तत्परित
स्खलितोडुमण्डलनभःस्थलोपमाम् ॥ ७४ ॥

तदस्य प्रयोजनमिति ठक् । वारिजः शङ्खः । वारिजः शङ्ख पद्मयोरिति विश्वः । प्रणनाद दध्मौ । शङ्खमशङ्खं दध्मावित्यर्थः । उपसर्गादसमासेऽपि णोपदेशस्येति णत्वम् । एतेनास्य महानुत्साहो वीररसस्थायी व्यज्यते ॥ ७२ ॥

जगदिति । जगदन्तकाले कल्पान्ते समवेता मिलिताये विषदास्तोयदाः पुष्करावर्त्तकादयो मेघाः । विषं तु गरले तोये इति विश्वः । तैर्विषमं दारुणं यथा तथेरित उत्पादितो यश्चारवः स्वारवो यस्य तत् । धीरे गम्भीरे निजरवे विलीना अन्तर्गता गुरवः प्रतिशब्दाः शब्दान्तराणि यस्य तत् अस्य चैद्यस्य रणतूर्य्यं रणदुन्दुभिरावधि आहतं । व्याहन्तेः कर्मणि लुङ् आत्मनेपदेष्वन्यतरस्यामिति हनो वधादेशः । अत्राप्युत्साहो व्यज्यते । उपमालङ्कारः ॥ ७३ ॥

सहसेति । अथ रणदुन्दुभिताडनानन्तरं सहसा झटिति ससम्भ्रमं सत्वरं यथा तथा विलोलया चलन्त्या सकलया समग्रया

दधतोभयानकतरत्व-
मुपगतवतः समानताम् ।
धूमपटलपिहितस्य गिरेः
समवर्म्मयन्सपदि मेदिनीभृतः ॥ ७५ ॥
परिमोहिणा परिजनेन
कथमपि चिरादुपाहृतम् ।
वर्म्म करतलयुगेन मह-
त्तनुचूर्णपेषमपिषद् द्विषापरः ॥ ७६ ॥

समतया अनघमूल्येन समाकुलं सङ्कीर्णं तत् स्थानं परितस्खलितं प्रस्थितं उडुमण्डलं ज्योतिश्चक्रं यस्मिन् तस्य नभःस्थलस्योपमां सादृश्यमगमत् । अत्रोडुमण्डलस्य पद्मरागसम्बन्धेऽपि सम्भावनया तत्सम्बन्धोक्तेरतिशयोक्तिः उपमा तु तदुज्जीविता प्रतीतिमात्रसारा तदङ्गं तत्रैव चमत्कारस्फुरणात् । पुष्पं प्रवालोपहितं यदि स्यादित्यादिवत् ॥ ७४ ॥

दधत इति । मेदिनीभृतो राजानः । धूमपटलेन पिहितस्य छादितस्य अत एव भयानकतरत्वं अतिभयङ्करत्वं उपगतवतो गिरेः समानतां सादृश्यं दधतो दधानाः सपदि समवर्म्मयन् संवर्म्मयन्ति स्म । सम्यग्वर्म्मणा नद्धन्नित्यर्थः । सत्यापपाशेत्यादिना णिच् । उपमालङ्कारः ॥ ७५ ॥

परिमोहिणेति । परोऽन्यो नृपः परिमुह्यतीति परिमोही । सम्पृचानुरुधेत्यादिना इनुप्रत्ययः । तेन खेदयुक्तेनेत्यर्थः । परिजनेन सेवकजनेन कथमपि विलम्बेन कष्टसृष्ट्या चिरादुपाहृतं आनीतं

रणसम्मदोदयविकाशि
बलकलकलाकुलीकृते ।
शारिमशकदधिरोपयितु
न्द्विरदे मदच्युति जनः कथञ्चन ॥७७॥

मृदङ्गं मन्नाहं करतलयुगेन पाणितलद्वयेन तनुचूर्णपेषं तनुचूर्णं पिष्ट्वा । शुष्कचूर्णरूक्षेषु पिष इति णमुल्प्रत्ययः । अपिषत् चूर्णितवान् तच्च जिगीषोर्दुर्निमित्तमिति भावः । कषादिषु यथा विध्यनुप्रयोगइत्यनुप्रयोगः । पिषेर्लुङि पुषादिना च्लेरङादेशः । अत्र वर्म्मणः पेषणासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः । तया च अमानुषं वीर्य्यमस्य व्यज्यते ॥ ७६ ॥

रणेति । रणेन रणारम्भेण यः सम्मदो हर्षः । प्रमदसम्मदौ हर्षे इति निपातः । तस्योदयेन जन्मना विकाशिभिर्विस्तारिभिर्बल कलकलैः सैन्यकोलाहलैराकुलीकृते संक्षोभिते । अतएव मदं च्योततीति मदच्युति मदस्राविणि । क्विप् । द्विरदे गजे । जनः परिजनः शारिं पर्य्याणं । ना पर्य्याणे विहङ्गे स्त्री शारि धूतगुडे नपुंसि वैजयन्ती । शारिर्नाऽक्षोपकरणे स्त्रियां शकुनिकान्तरे । युद्धार्थे गजपर्य्याणे व्यवहारान्तरे क्वचिदिति विश्वप्रकाशश्च । अधिरोपयितुं आरोपयितुं कथञ्चन कृच्छ्रादशकत् शशाक । शके र्लुङि पुषादिना च्लेरङादेशः । अत्र विशेषणगत्या सेनाकलकलस्य मदहेतुत्वान्मदस्य शारिदुरारोपत्वहेतुत्वाच्च काव्यलिङ्गद्वयं तच्चापेक्षत्वात्सङ्कीर्य्यते ॥ ७७ ॥